
UṬṬAṄKITA SANSKRIT VIDYĀ ARAṆYA EPIGRAPHS

VOLUME - X

SANSKRIT INSCRIPTIONS PERIOD 11th CENTURY



Siva Temple at Ambarnath, Maharashtra State

Published by

UṬṬAṄKITA VIDYĀ ARAṆYA TRUST
KANCHEEPURAM

2017

ŚivaTemple at Ambarnāth

Several temples dedicated to Hindu gods and goddesses were constructed in Koṅkaṇ and the region round Kolhāpur in the time of the Śilāhāras. Of these, the Śiva temple at Ambarnāth is regarded the best and earliest example of the Deccan Style of Architecture, Fortunately, the date of this temple is definitely known. An inscription of the Śilāhāra king Mummuṇirāja dated Śaka 982, found engraved on a stone girder of the temple at Ambarnāth (No.23), shows that the construction of the temple commenced in the reign of Chhittarāja; it continued in the reign of his younger brother and successor Nāgārjuna and was completed during that of his younger brother Mummuṇirāja in 1061 A.D.

The temple consists of a sanctum enshrining a *svayambhū* type of Śiva-linga and a *maṇaḍpa,* both square in shape, articulated diagonally along a central axis and approached by three entrance porches. The *maṇḍapa* carries a bell-roof. The sanctum, the *maṇḍapa* and the three porches have separate *śikharas.* While the *śikhara* over the sanctum is of the Bhūmija style, the spires on the *maṇḍapa* and the porches are of the pyramidal type. The outer walls of the temple are decorated with the images of gods and goddesses, hermits and heavenly nymphs (*Sura-sundarīs*). This temple evinces the interest that the Śilāhāras of North Kōṅkaṇ took in constructing magnificent temples of their gods and goddesses.



UṬṬAṄKITA SANSKRIT VIDYĀ ARAṆYA EPIGRAPHS

VOLUME - X

UṬṬAṄKITA SANSKRIT VIDYĀ ARAṆYA EPIGRAPHS

VOLUME – X

SANSKRIT INSCRIPTIONS
PERIOD 11th CENTURY

General Editors
Prof. Dr. C.V. Vaidyanathan
Prof. Dr. V.S. Vishnu Potty
Prof. Dr. G. Srinivasu

***

Editor
Dr. K.M. BHADRI
Director (Epigraphy) (Retd.)
Archaelogical Survey of India, Mysore

This Book has been published with the Financial Assistance of Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya, Kancheepuram.

UṬṬAṄKITA VIDYĀ ARAṆYA TRUST
KANCHEEPURAM - 631 561.
2017

First Published in 2017

Registered Office :

Chairman & Board of Trustees

UṬṬAṄKITA VIDYĀ ARAṆYA TRUST

Administration Office : Administrative Block
Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya
Enathur, Kancheepuram - 631 561. Tamil Nadu, India.
Ph : 044-27264301 / 27264308 Fax : 044-27264295
E-mail : vc@kanchiuniv.ac.in / registrar@kanchiuniv.ac.in

Copies of this book available from our :
Liaison Office


UṬṬAṄKITA VIDYĀ ARAṆYA TRUST

13, IVth Cross Street, Purushothama Nagar,
Chromepet, Chennai - 600 044. Tamil Nadu, India.
Cell : 92831 86778
E-mail : ramasamyuppili@gmail.com

Price : Rs. 480/-

---

*Printed at the **J.P.A.I.PRESS,***
Chennai - 600 064. Ph : 044-22232952, Tamil Nadu, India.



His Holiness Jagadguru
Pujyasri Chandrasekharendra Sarasvati Swamigal of
Kanchi Kamakoti Pitha



समर्पणम्

करुणारससम्पूर्णहृदं कलिकिल्बिषभीत्तापहरम् ।
करधृतदण्डकमण्डलुमाचर्यं भजत शङ्करं काञ्च्याम् ॥ १ ॥
उट्टङ्कितपदपूर्वा विद्यारण्येति नामिका संस्था ।
काञ्चीवरपीठगतैराचार्यैः श्रीचन्द्रशेखरेन्द्रयतिवर्यैः ॥ २ ॥
आचारे व्यवहारे भाषायां सम्प्रदायकार्येषु ।
सत्यपि भेदे धर्मः सर्वेषां वैदिको ह्येकः ॥ ३ ॥
इत्यर्थं बोधयितुं शासनमूलेन भारतीयानाम् ।
आचार्यैरालोचितमेतत्कार्यं समष्टिरूपधरम् ॥ ४ ॥
ताम्राश्मदारुनाणककाञ्चनरजतेषूट्टङ्कितान्यनेकत्र ।
शासनजिज्ञासूनामितरेषां स्थापितानि सुबोधार्थम् ॥ ५ ॥
राजादिशासनान्यन्यानि च तत्र तत्र पठितानि बुधैः ।
सङ्गृह्य च संशोध्य च कालक्रमेण सुयोजितान्यत्र च ॥ ६ ॥
क्रिस्तोः परं एकादशशतककालगतानाम् ।
द्विचत्वारिंशत्संख्याकशासनानां मूलं ग्रथितं ह्यत्र ॥७ ॥
आङ्ग्लानुवादसहितमुपोद्घातटिप्पण्यादियुक्तम् ।
सर्वेषां सुखबोधं परमाचार्यैश्च दर्शितेन पथा ॥ ८ ॥
तदिदं दशमं पुष्पं नवमपुष्पमिव मनोरञ्जकम् ।
परमाचार्यपदाब्जे समर्प्यते भक्तिभावेन ॥ ९ ॥

॥ इति शुभम् ॥

Sri :

UṬṬAṄKITA VIDYĀ ARAṆYA TRUST

UNDER THE DIVINE PATRONAGE AND THE BLESSINGS OF

His Holiness Jagadguru Pujyasri
Chandrasekharendra Sarasvati Swamigal of Kanchi Kamakoti Pitha



Sankaracharya Swamigal of Sri Kanchi Kamakoti Pitha,
Pujyasri Jayendra Sarasvati Swamigal



Sankaracharya Swamigal of Sri Kanchi Kamakoti Pitha,
Pujyasri Sankara Vijayendra Sarasvati Swamigal

EDITOR

Dr. K.M. BHADRI
Director (Epigraphy) (Retd.), Archaelogical Survey of India, Mysore.



CONTENTS

List of Plates

FOREWORD

His Holiness Jagadguru Pūjya Śrī-Chandraśēkharendra Sarasvatī, the Śankaracharya-Paramāchāryal of Śri- Kāñchī-kamakōtipītha was deeply interested in preserveing and interpreting for the benefit of the present and future generations in India and abroad, the relics of the glorious culture and civilization of India. His Holiness was familiar with epigraphy, the richest and irrefutable among the sources of the history of India's culture and civilization. The idea of delving into, and publishing in a codified manner all the important Sanskrit and Prakrit inscriptions of India with English translation was conceived of by His Holiness and a Trust was formed in 1984 under His Instructions with a view to carry out this task. His Holiness named the Trust "The Uṭṭaṅkita Vidyā Araṇya Trust" meaning 'The Forest of Engraved Knowledge'. This expression 'Vidyā Araṇya' when made into a compound word recalls to our mind the famous scholar-statesman-saint 'Vidyāraṇyā' who was the guide to those princes who were instrumental in founding the great empire of Vijayanagara (also called Vidyānagara) at Hampi (in Bellary District, Karnataka State), in the 14th century A.D. and who (Vidyāraṇya) was the only person comparable to Ādi Śankarācharya (the rejuvenator of the ancient Advaita School of Philosophy of the Vēdas). The first volume published by the Trust in 1985 was appropriately dedicated to his (Vidyāraṇya's) memory and contains sixteen inscriptions relating to that great soul and it was released by Śri Paramāchāryāl himself.

Volume I Published in 1985

While the first volume of the Trust was just general and dedicatory, the further work of the Trust in pursuance of the objectives laid down by the Paramāchāryāl was planned to be executed by publishing (in a series of

volumes) the Sanskrit and Sanskritic inscriptions found in India and neighbouring countries which have been edited and published in several Indological publications, as follows :

VOLUMES I TO XII

Volume I	:	General, dedicatory and introduction volume about Vidhya Aranya 14th Century A.D.
Volume II	:	Epigraphs of the Period 257 B.C. - 320 A.D.
Volume III	:	Epigraphs of the Period 320 A.D. - 600 A.D.
Volume IV	:	(Consisting of III parts)
Part I		Epigraphs of the Period 600 A.D. - 650 A.D.
Part II		Epigraphs of the Period 651 A.D. - 700 A.D.
Part III		Epigraphs of the Period 500 A.D. - 700 A.D. (Foreign Inscriptions)
Volume V	:	Epigraphs of the Period 700 A.D. - 800 A.D.
Volume VI	:	Epigraphs of the Period 800 A.D. - 900 A.D.
Volume VII	:	Epigraphs of the Period 900 A.D. - 1000 A.D.
Volume VIII	:	Epigraphs of the Period 10th Century A.D.
Volume IX	:	Epigraphs of the Period 1000 A.D. - 1100 A.D.
Volume X	:	Epigraphs of the Period 1100 A.D. - 1150 A.D. *

* Subsequent Volumes are under preparation.

The periodisation of the inscriptional content of each of the above volumes, was not meant to be rigidly adhered to, but was left to be determined by the number of epigraphs that were available or selected for each period.

It may also be pointed out here that the preparation of volume for this series as envisaged is not as simple as it looks on the face of it. It is not a mechanical copying of the text and translation from what has already been published. Quite often, these texts as published are written in Roman and these have to be transliterated in to Nagari characters. Further a translation was not always given by the original editors and hence a translation or a summary of the contents has to be given anew. Mostly the concentration of the original editors had been on the aspects

of political history revealed by the records. They did not place due stress on the many technical terms occurring in the inscriptions. They were either left untranslated or if at all, were inadequately interpreted. The Trust volume is meant to provide the translation of the Sanskrit texts and interpretation of the technical terms contained in the inscriptions. Further, in the volumes being produced by the Trust, as all the inscriptions are being arranged in chronological sequence, many significant facts which could not have struck those who edited these inscriptions in isolation, get revealed by the juxtaposition of the records. The purpose of the Trust volumes is to make a systematic study and highlight such enlightening information revealed by these inscriptions in their entirety.

Volume II, Published in 1989

The second volume of the Epigraphical series was in the hands of Shri. K.G.Krishnan, and contained two hundred and eighteen inscriptions selected from about three thousand and odd records, majority of which are in the Prakrit language. It covered the period from 257 B.C. (i.e.) when Asoka's rule began, upto 320 A.D. when the Guptas began to rule.

It is very gratifying that the above volume was released in 1989 by the holy hands of the **Paramacharyal** himself.

Volume III, Published in 2002

The third volume of the Uttankita Vidya Aranya Sanskrit Epigraphs covers the period from 320 A.D. upto 600 A.D.(i.e.) a period which started with the emergence of the Guptas as the dominant power in Aryavarta covering most of Northern India. This was handled by Shri K.G.Krishnan. Some 345 inscriptions were selected

to be dealt with in this volume. But as he expired in the meanwhile, some portion of the text was completed by Dr. J. Sundaram. This volume was released by **Pūjyaśri Jayēndra Saraswati Swamigal,** the present head of Sankara Math, Kāñchi in 2002.

Volume IV, (Consisting 3 parts) Published in 2006 & 2008

The fourth volume was entrusted to Shri V. S. Subrahmanya Śāstri and Dr. J. Sundaram in 1993. Shri Subrahmanya Sastri informed the latter as to the things that were expected to be discussed in the volume by the **Paramāchāryāl Chandraśekhārendra Sarāswati,** as he was very close to him and he similarly guided the latter. Shri Sastri passed away in 1995 and it was left to Dr. J. Sundaram to carry on. This volume was planned to deal with inscriptions pertaining to the period 600 to 650 A.D.when the Guptas were seen on the wane and splinter dynasties subservient to the Guptas began emerging. That was also the period when in India south of the Vindhyas, after the decline of the Sātavāhanas, several dynasties had sprung up on and were vying for dominance.

Volume- IV- Part- I (600-650 A.D.) was released at New Delhi by **Dr. Karan Singh M.P.** in 2006. *Volume-IV Part-II covering the period 651-700 A.D. and Volume-IV Part-III covering Sanskrit inscriptions 500 A.D. to 700 A.D.* in foreign countries were released by **Pūjyaśri Dāyananda Śaraśwāthi Swamiji** at Chennai and received by **Dr. V. Kutumba Śāstrī** the then Vice-Chancellor of *Rashritya Sanskrit Sansthan, New Delhi*

Volume V, Published in 2009

This volume consisting 120 inscriptions in Sanskrit with English translation covering the period 700 AD - 800 AD was released in Kolkata on 28-4-2009 by **H.E.Sri Gopal Krishna Gandhi, Governor of West Bengal** under the auspices of the **Asiatic Society, Kolkatta.**

Volume VI, Published in 2010

This volume contains 106 Sanskrit inscriptions with English summary covering the period of 800 A.D. to 900 A.D. mostly relating to Rashtrakutas dynasties, was released on 18-th October 2010 at *Sri Chandrasekharendra Saraswathi Viswa Maha Vidyalaya* (University) Kanchipuram by **His Holiness Sri Sri Jayendra Saraswathi Swamiji.**

Volume VII, Published in 2011

This volume has 75 inscriptions covering the period 9th to 10th Century A.D. This volume tells about later Rashtrakutas, Eastern Chalukyas, Eastern Gangas, Chedis, Chandras Kings, Pramaras etc. The publication was released on 23-1-2011 at Mumbai by **His Holiness Sri Sri Jayendra Saraswathi Swamiji.**

Volume VIII, Published in 2013

This volume has 76 inscriptions covering the period complete 10th Century A.D. This volume tells about Bhama-Palas of Palas, Bhanjas of Khinjali, Bhauma-Kara, Kalachuris, etc.,

The publication was released on 25.7.2013 by **His Holiness Sri Sri Jayendra Saraswathi Swamiji,** the present Head of Sri Sankara Math, Kanchipuram, Tamil Nadu.

Volume IX, Published in 2015

This volume contains 84 inscriptions, both dated and undated, of the 11th century A.D. Many of them are dated in the Vikrama Samvat, those belonging to the Kalachuri dynasties, in the Kalachuri Year and others in the Regnal years of different rulers. The undated inscriptions included here are assigned to the 11th century on their palaeographical or historical evidence. Of the 84 inscriptions included in this volume, there are 42 copperplate charters and equal number of epigraphs engraved on boulders, stone-slabs and pedestals of stone images. They belong to different regions of the northern India and represent different ruling houses, major and minor, as well as some stray rulers.

Trust Management :

The value of the work envisaged and being carried out by the Trust was well appreciated and acknowledged by the Director of Epigraphy, **Dr.K.V. Ramesh.** In his D.O.No.55 1(5)84, dated 13.1.1984, he said that "the Project undertaken, by the Uṭṭaṅkita Vidya Araṇya Tṛust, of publishing the texts of all available Sanskrit inscriptions in a series of volumes, cannot be considered as repetitive or as mere duplication of any work done or being done by the Central Government Agency concerned or so far as I learn, by any of the State Government agencies. The completion of this project undertaken by then Uṭṭankita Vidyā Araṇya Tṛust is bound to make a significant contribution for the progress of Indological researches".

Dr. K.V. Ramesh, who later became the Joint Director General in the Archaeological Survey of India, served as advisor to the Trust and participated in all deliberations. Subsequently, the other directors (Epigraphy), Shri M.N.Katti, Dr. M.D.Sampath and Dr. K.M.Bhadri, and other staff of the ASI Epigraphy Office, Mysore, helped the editors in their work.

Eminent contributors of the Trust :

It is fitting and proper to record here the valuable contributions made by several enthusiastic, and well wishing eminent persons in managing the affairs of Trust. **Late Dr. D.C. Sircar**, former Govt. Epigraphist for India and the then Professor and Head of the Department of the Ancient Indian History and Culture, University of Calcutta, formulated and gave a shape to the work to be undertaken by the Trust. The late **Shri. S. Viswanathan** and Late **Prof. V.S. Pathak** ably guided the affairs of the Trust in the initial period. Late **Shri C.S. krishnamurthy,** I.A.S. (Retd.),

Late **Shri V.S. Subrahmanian** and Late **Dr. B.N. Mukherjee,** Carmichael Professor of Ancient History, Archaeology and Culture, University of Calcutta, besides attending to the administration of the Trust kept guiding in the execution of the work. Late **Shri C.G. Rangabhashyam,** I.A.S.(Retd.) Former Education Secretary, Govt. of T.N. ably managed and executed the affairs of the Trust till 2005.

Appreciation and Tributes to former Trustees

Shri. P. Sabanayagam, I.A.S. (Retd. Former Education & Cultural Secretary, Govt. of India and former Chairman of the Uttankita Aranya Trust) and **Sri. Dr. A.M. Swaminathan, I.A.S.**(Retd. Revenue Secretary, Govt. of Tamil Nadu and former Executive Trustee / Secretary of the Trust) had made immense contributions in managing the affairs of the Trust over several years. Due to their untiring and dedicated work, it was possible to get the seven volumes viz Vol IV (part I to III), Vol.V, Vol.VI & Vol.VII covering the period 600 A.D to 1000 A.D, Volume VIII complete 10th century A.D, released timely and also to improve the financial position of the Trust. The Board places on record its deep appreciation for their splendid work over the years.

Editorial Staff :

Dr. K.M. Bhadri was ably assisted by Sri. H.K. Subrahmanya Junior Scholar. We also wish to acknowledge the service rendered by Sri. N. Bhaskaran, Sri. N. Nagarajan and Sri. S. Chandramouli of S.C.S.V.M.V.

Financial assistance was received in the early years of 1985-1989 :

i) Tirumalai Tirupati Devasthanam.

ii) Govt.of Uttar Pradesh

iii) The members of the Board of Trustees

iv) The staff of Asian Development Bank of Manila.

Rashtriya Sanskrit Sansthan, New Delhi.

The publication of Volume IV, Parts I to III and Volumes V to VIII, has been accomplished with the financial assistance of the ***Rashtriya Sanskrit Sansthan*** (Deemed University) New Delhi. The Trust is indebted to Govt. of India M.H.R.D. Authorities New Delhi. We are also persuade them to give finance assistance for our subsequent Volumes publication.

The Trustees hope and request that these Volumes may be purchased by scholars, Libraries, Universities and other Institutions, to fulfill the noble objectives of the project.

28-05-2017

Prof. Dr. C.V. Vaidyanathan

CHAIRMAN

chiefs who served under the Śilāhāras of North Kōṅkaṇ are also included here.

The Yādavas of Dēvagiri

The predecessors of the Yādavas of Dēvagiri ruled over a country comprising Khāndesh, Nāsik and Ahmadnagar Districts of the Maharashtra State, as vassals of the Rāshṭrakūṭas and the Chālukyas of Kalyāṇa for more than three hundred years. The founder of this feudatory family was Dṛiḍhaprahāra, who is said to have been the son of Subāhu, king of Dvarāvātīpura, modern Dwārakā, in Kāthiāwār. Dṛiḍhaprahāra flourished in the first half of the ninth century A.D., and established his capital at Chandrādityapura, modern Chāndor, in the Nasik District. His son and successor Sēuṇachandra I founded a city called Sēuṇapura and also gave the name Sēuṇa-dēśa or Sēvuṇa-dēśa to his kingdom after his own. It was situated on the confines of Daṇḍaka and included Dēvagiri, modern Daulatābād, in the Aurangabad District. The successors of Sēvuṇachandra are referred to as the Sēvuṇas in their own inscriptions as well as in those of their neighbours. A remote successor of Sēuṇachandra was Karṇa, whose son Bhillama V was the first independent king of the dynasty.

The present volume includes 2 inscriptions of Bhillama II (29 and 30), 1 of Bhillama III (31), 2 of Sēuṇachandra II (32 and 33) and 1 of Āiramadēva (No.34) of the Yādava family.

The Eastern Chālukyas

A number of inscriptions of the Eastern Chālukya rulers having been published in *USVAE.,* Vols V, VI, VII and VIII, the present volume includes 8 inscriptions of

this dynasty. Śaktivarman (35), Vimalāditya (36), Rājarāja I (37-39), Rājarāja-Chōḍagaṅga (40) and Vira-Chōḍadēva (41, 42) are the Eastern Chālukya kings whose inscriptions figure in the volume.

ŚAIVA SECT

As the Śilāhāras of North and South Kōṅkaṇ were ardent Śaivas, they invited Śaiva ascetics to their capital even from distant places, and made liberal grants to them. We come across a few references to the Śaiva teachers in the inscriptions included in this volume. The Berlin Museum plates of Chhittarāja (No.15) record the grant, by the king, of a field to the ascetic Jñānaśiva, a disciple of the holy Vāḍāchārya, who belonged to the Western Āmnāya. These teachers are said to have belonged to the Śaiva sect. It is also said that there was a great centre of this sect in Western India.

The Khārepāṭaṇ plates of Raṭṭarāja (No.26) record the grant, by the king, of three villages to his learned preceptor Ātrēya, who was a disciple of the Śaiva ascetic Ambhōjaśambhu of the Karkarōṇī branch of the Mattamayūra clan. Karkarōṇī has not been identified, but Mattamayūra was a celebrated centre of Śaivism at the time of the epigraph referred to above.

Pāśupata sect

The Miraj plates of Mārasiṁha mention the Pāśupata Paṇḍita Brahmēśvara, who is highly eulogised therein. His disciple was Chikkadēva, who also was learned like him. Brahmēśvara Paṇḍita is said to have acquired the knowledge of the Pāśupata *āgamas* by the

touch of the holy Siṁha; and Chikkadēva is praised as well-versed in the *Siddhāntas.*

Kālamukha sect

Gaṇēshvāḍi inscription of the time of Chālukya Tribhuvanamalla (No.9) records several pious deeds, such as gift of land, erection of temple, *etc.,* performed by the emperor's Chief minister Bhīmanātha. The third section of the inscription describes the spiritual lineage of the *āchārya* Tatpurusha-Paṇḍita, who was the chief of the Sarasvatī-maṇḍapa and the priest in the temples built by Bhīmanātha at Pippalagrāma. Vādirudra-Paṇḍita, his disciple Kriyāśakti-Paṇḍita, his younger brother Trilōchanāchārya, and Kriyāśakti-Paṇḍita's disciple Tatpurusha-Paṇḍita are extolled in this section. There is not much difference in the description of these teachers. All of them are eulogised as renowned teachers of the Kālamukha sect of the Parvatāvalī school, well-versed in various religious sciences including logic, proficient in the Lākulāgama and adept in all the Yōgic practices, *viz., Yama, Niyama, etc.* enjoined by the Lākulāgama. Vādirudra-Paṇḍita's epithet 'destroyer of the Jainas and Buddhists' is reflective of contemporary Hindu attitude towards these heretic religions.

This epigraph is important as it refers to the chief place or *maṭha* at Pippalagrāma which belonged to the Śivaliṁgi-santāna of the Parvatāvalī sect of the Kālamukha school of the Lakulīśvara system and to the line of pontiffs of the same.

Jainism

Ḍubkuṇḍ stone inscription of the Kachchhapaghāta king Vikramasiṁha (No.1) is the only Jaina inscription in this volume. It records the construction of a Jaina temple by some private persons, and some grants made in favour of it by the king. This inscription introduces a line of Jaina sages, the first of whom was *Guru* Dēvasēna of the Lāṭa-Vāgaṭa-gaṇa. His disciple was Kulabhūshaṇa, and his disciple again was Durlabhasēna, from whom sprang Śāntishēṇa, who in an assembly held before the king Bhōjadēva, defeated hundreds of disputants who had assailed Ambarasēna and other learned persons.

Economic Conditions

Bhoighar plates of Chhittarāja (No.12) contain a *Vyavasthāpatra* laying down a tax of 4 *drammas* on a hundred areca-nut trees in the orchards of certain villages. The coconut, bread-fruit, *Champaka* and mango trees, were untaxable. The suramṇḍa (mahuā) trees belonged to the Government. They were not to be uprooted, cut or damaged by anybody. A tax of 3% was levied on the sale produce of areca-nut trees. Thus a systematic collection of tax on areca-nut trees and the state control over the mahuā trees whose flowers produced liquor must have brought very good revenue to the state exchequer.

Ṭhāṇā plates of Mummuṇirāja (No.20) mention grain measures *mūṭaka>khaṇḍikā>kuḍava.* These measures varied from village to village (*grāma-māna*).

In Koṅkaṇ there were imposts levied on ships engaged in foreign as well as coastal maritime trade. Anantadēva I exempted the ships and sailors of some high-ranking officers and their relatives from such imposts (No.25).

Literary merits

Yaśas or fame is described in three different ways in three verses in the Hoṭṭal inscription of the time of Chālukya Sōmēśvara (No.5). Verse 12 states that Dhōrarāja's fame, white like the moon, exists in the guise of the Himālayas, Mount Kailāsa and the milky ocean even today, as if amassed in the circle of the quarters. Verse 21 says that owing to the fame of Argadēva spreading everywhere, the *Mahābhārata,* the *Rāmāyaṇa,* the *Purāṇas,* and the *Ākhyāyikās,* were all forgotten. The very next stanza states that his fame, white like the pollen of a fresh Kētaka flower, out of curiosity and attraction, tirelessly wanders in the three worlds as it were to see someone equal to the king in virtues. The stanza reads:

अन्यं समानगुणमस्य नृपस्य कंचिद्द्रष्टुं विकृष्टहृदयेव कुतूहलेन ।

कीर्त्तिः परा प्रथमकेतकरेणुशुभ्रा लोकत्रयं भ्रमति संततमश्रमैव ॥ २२ ॥

Yet another fantastic description of the fame (*Yaśas*) is met with in the Raṇastipūṇḍi grant of the Eastern Chālukya king Vimalāditya (No.36). Verse 14 of this epigraph states that since the whole world was filled with the moon-white fame of the king, the god Śiva, in order to make his white body recognizable, wore on his throat a splendid black spot like the one in the moon. The verse reads:

शशिविशदयशोव्याप्त्या स्वशरीरविबोधनार्त्थमवत्कण्ठे ।

शशलक्ष्मलक्ष्मलक्ष्मीं शंभुर्ब्बिरुदंकभीमनृपतेर्य्यस्य ॥ १४ ॥

The last stanza (V.43) of the Hoṭṭal inscription mentioned above expressing some pious wishes is comparable with the *Bharatavākya* in classical Samskrit dramas. It wishes for the performance of sacrifices by Brāhmaṇas, protection of the world by kings, happiness to the cattle and the people, and non-rise of the wicked; it also wishes for distinction to the poets and dignity to the well-reputed courtesans. The reference to the dancing girls here seems to allude to the *Dēvadāsīs* a number of whom may have been dedicated to the temple to which certain grants were made by means of the epigraph under discussion. It is well-known that dancing girls (*Dēvadāsīs*) represented a permanent feature of the big Brahmanical temples of the early medieval period. The stanza in question reads:

विप्राः पर्व्वणि पर्व्वणि क्षितितलं कुर्व्वंतु यूपांकुरं

भूपालाः परिपालयंतु सकलं लोकं स्वधर्म्मस्थिताः ।

गावः संतु सुखं सुनंदतु जनो मा भूत्खलप्रोद्भवः

पूज्यंताम् कवयः सुकीर्त्तिगणिका नाट्यप्रतिष्ठा भुवि ॥ ४३ ॥

A Verse (No.19) occurring in the Thāṇā plates of Arikēsarin (No.11) describes the unsteady nature of prosperity, youth and life itself, and wonders at human indifference in earning merit (*puṇya*) for the acquisition of the other world. It reads:

चला विभूतिः क्षणभङ्गि यौवनं कृतान्तदन्तान्तरवर्ति जीवितम् ।

तथाप्यवज्ञा परलोकसाधने नृणामहो विस्मयकारि चेष्टितम् ॥ १९ ॥

This stanza has been repeated in several subsequent epigraphs of the Śilāhāra rulers. The central idea of this stanza is the same as the one contained in one of the replies of Dharmarāja in the *Yaksha-praśna* episode of the *Mahābhārata.* Here Dharmarāja says "seeing that every day beings are dying, others who are still living think that they never die. What can be more wonderful than this?"

Verses 27-32 of the Piṭhāpuram plates of Vīra-Chōḍa (No.42) are in praise of the Brāhmaṇa caste, which may be summerised as follows: Bhagavān Nārāyaṇa created Brāhmaṇas for the protection of the Vēdas. They offer oblations in the fire, because of which gods are alive in the heaven (v.27). Triśaṅku, who was depraved by birth, wicked-hearted and merciless, allayed his sins and attained heaven by appeasing a Brāhmaṇa, while Nahusha, though born in the family of kings, anointed as the king of gods by dint of his excessive religious merit, and a master himself, was thrown out of heaven due to the anger of a Brāhmaṇa (v.28). Śiva, whose commands are respected all over the world, could destroy the three cities (of demons) after worshipping Brāhmaṇas (v.29). The power of Brāhmaṇas enables the sun to shine, to move freely in the sky and to protect the worlds (v.30).

The next two stanzas praise Brāhmaṇas as shining like the Vēdas personified and as different forms Vishṇu respectively.

Of these stanzas verse 28 reads:

दुष्टो जात्या प्रकृत्या कलुषितहृदयः क्रूरकर्म्मापि येषा

मेकं विप्रं प्रसाद्य प्रशमितदुरितः स्वर्ग्गमाप्तस्त्रिशंकुः ।

राज्ञां वंशे विराजन् बहुसुकृतबलाद्देवराज्येभिषिक्तो

येषामेकस्य कोपात् प्रभुरपि नहुषः पातितो नाकलोकात् ॥ २८ ॥

This kind of adoration of the Brāhmaṇa caste as a whole is rarely met with in the epigraphic texts, though we come across eulogies of individual Brāhmaṇas and teachers frequently.

Many inscriptions included in this volume possess literary excellences. Only a few instances are mentioned above.

In the Nilgund plates of Vikramāditya VI, (No.8) some unusual names of villages and boundary marks are mentioned. Thus in lines 70-73 we come across Kamaṇḍalukārpāsagrāma, Lākshāgēhāgrāma, Gaja-pāshāṇa, Mahisha-pāshāṇa, Akshara-pāshāṇa, Khalvāṭa-parvata and Dīrghatuṁga-parvata. Here names of the two rocks (*pāshāṇa*) may be explained as based on their shape like a buffelo and elephant respectively. The Akshara-pāshāṇa was certainly a stone slab with some letters engraved on it which was erected as a boundary mark in lieu of a natural land-mark. In fact, the Gaṇēshvāḍi inscription of the time of Tribhuvanamalla (No.9) states that stone inscriptions were installed in all directions to mark the boundaries of the land granted

(एवं समन्तादाघाटविशुद्ध्यर्थं सर्वासु दिक्षु तत्र तत्र शिलाशासनं स्थापितमिति - ll.40-42).

The village Lākshāgēha reminds us of the Lākshāgṛiha of the *Mahābhārata.*

Similar strange names, *viz.,* Markkaṭa-gōpura (Monkey gate) and Vaḍavā-bhuvam (mare's ground) occur among the boundary marks in the Khārepāṭaṇ plates of Raṭṭarāja (No.26).

Verse 15 of the same epigraph informs that king Aiyapa of the Śilāhāra family of South Kōṅkaṇ was crowned with the waters of the cocoanut trees growing near Chandrapura. This again, is a curious custom probably restricted to the Kōṅkaṇ region rich in cocoanut trees.

The Samgamner copper-plate inscription of the Yādava Bhillama (II) mentions *Kandukāchāya* as a title of the king. This title has been rendered as 'a master in playing at ball.' Even though we do not know what kind of play it was in which the king attained expertise, the very fact that a king's pastime finds mention in his official document is quite interesting.

In the same epigraph we come across a Brāhmaṇa who served as a door-keeper of the royal palace (*Rājadauvārika*). One of the 21 donees receiving a village and some land from the king was *Bahvṛicha-rājadauvārika-Mahalapaiya* (l.72). This is a rare phenomenon occurring in inscriptions. How this person could do justice to the duties of a Brāhmaṇa (*shaṭkarmas*) and those of a watchman can only be imagined.

Yet another interesting matter in this epigraph is the due importance attached to the local customs in the process of writing royal charters. Lines 113-114 of this record read: *likhitamidaṁ śāsanapaṭṭaṁ sthānaniyamēna rājaniyamēna cha.* Even though it is not possible to know

about these '*niyamas*' (rules or customs) it is worthy of note that local customs received due consideration in the writing of royal charters.

This section may be concluded with a stanza (42) from the Hoṭṭal inscription of the time of Chālukya Sōmēśvara. It states that the bygone kings are alive even today because of either their poems or their accounts, so kindly composed by great poets earlier. Therefore, a poet alone, indeed, is the friend of a king. It reads:

काव्यामृतैर्वाथ कथामृतैर्वा अद्यापि जीवंति मृता महीशाः ।

पूर्वप्रसादात्कविपुंगवानां नृपस्य तस्मात्कविरेव मित्रम् ॥ ४२ ॥

Classified List of Inscriptions


Classified lists of inscriptions included in this volume are given below to facilitate easy access to specific inscriptions.

Dynastic List

Name of Dynasty	Serial Numbers	Remarks
Chālukyas of Kalyāṇa	4-9	Cp. And St. (3)
Chālukyas of Shirvaḷ	10	Cp.
Guhilas of Mēdapāṭa	3	Cp.
Eastern Chālukyas	35-42	Cp.
Kachchapaghātas of Ḍubkuṇḍ	1	St.
Kachchapaghātas of Gwalior	2	St.
Mōḍha Chiefs	16-18	St.
Śilāhāras of North Kōṅkaṇ	11-15 and 19-25	Cp. and St. (2)

Śilāharas of South Kōṅkaṇ	26-27	Cp.
Śilāharas of Kolhāpur	28	Cp.
Yādavas of Dēvagiri	29-34	Cp. and St. (1)


*Cp.= Copper-plate #St.= Stone





LIST OF INSCRIPTIONS

22. Divē Āgar plate of Mummuṇirāja: Śaka Year 975
23. Ambarnath temple inscription of Māṁvaṇi rāja: Śaka Year 982
24. Vihar Stone inscription of Anantadēva I: Śaka Year 1003
25. Kharepatan plates of Anantadēva I: Śaka Year 1006
26. Kharepatan plates of Raṭṭarāja: Śaka Year 930
27. Balipattana plates of Raṭṭarāja: Śaka Year 932
28. Miraj plates of Mārasiṁha: Śaka Year 980
29. Sangamner copper-plate inscription of the Yadava Bhillama II: Śaka Year 922
30. Kalas-Budrukh plates of Bhillama III: Śaka-Saṁvat 948
31. Two Yadava Charters from Devalali: Śaka 974
32. Bassein inscription of Seunachandra II: Śaka 991
33. Stone inscriptions at Vaghli in Khandes: Śaka Year 991
34. Asvi plates of Yadava Airamadēva: Śaka 1020
35. Andhra Sahitya Parishad plates of Śaktivarman
36. Ranastipundi grant of Vimalāditya: Regnal Year 8
37. Korumelli plates of Rājarāja I: Śaka 944
38. Nandampundi grant of Rājarāja I: Regnal Year 32
39. Kalidindi grant of Eastern Chālukya Rājarāja I
40. Teki plates of Rājarāja – Chōḍagaṅga (17th Year of Kulōttuṅga I)
41. Chellur plates of Vīra-Chōḍadēva (21st Year of Kulōttuṅga I)
42. Pīṭhāpuram plates of Vīra-Chōḍa (23rd Year of Kulōttuṅga I)



No.1

DUBKUND STONE INSCRIPTION OF THE TIME OF VIKRAMASIMHA: [VIKRAMA] YEAR 1145

Location	: Ḍubkuṇḍ, Shivpuri District, Madhya Pradesh
Date	: [Vikrama] Year 1145 = 1088 A.D.
Script	: Nāgarī
Language	: Sanskrit
King	: Vikramasiṁha
Dynasty	: Kachchhapaghātas of Ḍubkuṇḍ
Reference	: Trivedi, H.V., *CII,* VII, pt.3, pp. 528-535; No.154

Metre: Vv. 1-4, 7, 8, 10, 11, 15, 16, 20, 24, 26, 28, 35 *Śārdūlavikrīḍita;* 5, 31-34, 36, 37 *Anushṭubh;* 6, 18, 19, 21, 23, 25, 27, 30 *Vasantatilakā;* 9, 17 *Sragdharā;* 12, 13, 29 *Mālinī;* 14 *Śikhariṇī;* 22 *Upajāti*

Text

सिद्धम्। अं ॥ नमो वीतरागाय ॥

आनम्रेंद्रकिरीटपा . . टनाद्यत्पादपीठं लुठ

न्मंदारस्रगमंदगुंजदलिमन्निष्ठयूतसांराविणम्।

तत्पां . . वद्वचः परमु . . . . तां सं . . द्वे

गमिवाकरोत्स ऋषभस्वामी श्रिये स्तात्सताम्॥ १ ॥

बिभ्राणो गुणसंहतिं हततमस्तापो निजज्योतिषा

मुक्तात्मापि जगंति संगतजयश्चक्रे सरागाणियः।

उन्माद्यन्मकरध्वजोर्जितगजग्रासोल्लसत्केसरी

संसारोग्रगदच्छिदेस्तु स मम श्रीशांतिनाथो जिनः ॥ २ ॥

जाड्यं शश्वदखंडितं क्षयमपि क्षीणाखिलोपक्षयं

साक्षादीक्षितमक्षिभिर्दधदपि प्रौढं कलंकं तथा ।

चिह्नत्वाद्यदुपांतमाप्य सततं जातो यमानंदकृ

च्चंद्रः सर्व्वजनस्य पातु विपदश्चंद्रप्रभोर्हन्स नः ॥ ३ ॥

शोकानोकहसंकुलं रतितृणश्रेणिप्रणश्यद्द्रुम

द्युग्धात्मा ध्वगपूगमुद्धतमहामित्थ्यात्ववातध्वनि ।

यो रागादिमृगोपघातकृतधीध्यानाग्निना भस्मसा

द्भावं कर्म्मवनं निनाय जयतात्सोयं जिनः सन्मतिः ॥ ४ ॥

प्रसाधितार्थगुर्भव्यपंकजाकरभास्करः ।

अंतस्तमोपहो वोस्तु गो तमो मुनिसत्तमः ॥ ५ ॥

श्रीमज्जिनाधिपतिसद्वदनारविंद

मुद्यच्छदच्छतरबोधसमृद्धगंधम् ।

अध्यास्य या जगति पंकजवासिनीति

ख्यातिं जगाम जयतु श्रुतदेवता सा ॥ ६ ॥

आसीत्कच्छपघातवंशतिलकस्त्रैलोक्यनिर्यद्यशः

पांडु श्रीयुवराजसूनुरसमद्युद्भीमसेनानुगः ।

श्रीमानर्जुनभूपतिः पतिरपामप्याप यत्तुल्यतां


नो गांभीर्यगुणेन निर्ज्जितजगद्धन्वी धनुर्व्विद्यया ॥ ७ ॥

श्रीविद्याधरदेवकार्यनिरतः श्रीराज्यपालं हठा

त्कंठास्थिच्छिदनेकवाणनिवहैर्हत्वा महत्याहवे ।

S.No. 1 - Inscription No. 1

Dubkund Stone Inscription of the time of Vikramasimha; Vikrama Year 1145



डिंडीरावलिचंद्रमंडलमिलन्मुक्ताकलापोज्ज्वलै

स्त्रैलोक्यं सकलं यशोभिरचलैर्योजस्त्रमापूरयत् ॥ ८ ॥

यस्य प्रस्थानकालोत्थितजलधिरवाकारवादित्रशब्दा

वेगान्निर्ग्गच्छदद्रिप्रतिमगजघटाकोटिघंटारवाश्च ।

संसर्पंतः समंतादहमहमिकया पूरयंतो विरेमु

र्नो रोदोरंध्रभागं गिरिविवरगुरूद्यत्प्रतिध्वानमिश्राः ॥ ९ ॥

दिक्चक्राक्रमयोग्यमार्ग्गणगणाधारानेकान् गुणा

नच्छिन्नाननिशं दधद्विधुकलासंस्पर्द्धमानद्युतीन् ।

सूनुं छन्नधनुर्ग्गुणं विजयिनोप्याजौ विजित्योर्जितं

जातोस्मादभिमन्युरन्यनृपतीनामन्यमानस्तृणम् ॥ १० ॥

यस्यात्यद्भुतवाहवाहनमहाशस्त्रप्रयोगादिषु

प्रावीण्यं प्रविकत्थितं पृथुमतिश्रीभोजपृथ्वीभुजा ।

छत्रालोकनमात्रजातभयतो दृप्तारिभंगप्रद

स्यास्य स्याद्गुणवर्ण्णने त्रिभुवने को लब्धवर्ण्णः प्रभुः ॥ ११ ॥

तुरगखरखुराग्रोत्खातधात्रीसमुत्थं

स्थगयदहिमरश्मेर्मंडलं यत्प्रयाणे ।

प्रचुरतररजोन्याशेषतेजस्वितेजो

हतिमचिरत एवाशंसतीवानिवारम् ॥ १२ ॥

शरदमृतमयूखप्रेखदंशुप्रकाश

प्रसरदमितकीर्त्तिव्याप्तदिक्चक्रवालः ।

अजनि विजयपालः श्रीमतोस्मान्महीशः

शमितसकलधात्रीमंडलक्लेशलेशः ॥ १३ ॥

भयं यच्छत्रूणां त्रिदशतरुणीवीक्षितरणे

क्रमेणाशेषाणां व्यतरदसदप्यात्मनि सदा ।

सतोप्यंशन्नादादवनिवलयस्याधिकमतो

बुधानामाश्चर्यं व्यतनुत नरेंद्रो हृदि च यः ॥ १४ ॥

तस्माद्विक्रमकारिविक्रमभरप्रारंभनिर्भेदित

प्रोत्तुंगाखिलवैरिवारणघटोद्यन्मांसकुंभस्थलः ।

श्रीमान्विक्रमसिंहभूपतिरभूदन्वर्थनामा समं

सर्वाशाप्रसरद्विभासुरयशःस्फारस्फुरत्केसरः ॥ १५ ॥

बालस्यापि विलोक्य यस्य परिघाकारं भुजं दक्षिणं

क्षीणाशेषपराश्रयस्थितिधिया वीरश्रिया संस्थितम्

सर्व्वांगेष्ववगूहनाग्रहमहंकारादहंपूर्व्विकां

राज्यश्रीरकृताधिकस्य विमुखी सर्व्वान्यपुंवर्ग्गतः ॥ १६ ॥

अत्यंतोद्दस्तविद्विट्तिमिरभरभिदि च्छादादितानीतितारा

चक्रे विष्वक्प्रकाशं सकलजगदमंदावकाशं दधाने ।

निष्पर्यायं दिगास्यप्रसरदुरुकराक्रांतधात्रीधरेंद्रे

यस्मिन्राजांशुमालिन्यहह सति वृथैवेष कोन्योंशुमाली ॥ १७ ॥

यद्दिग्जये वरतुरंगखुराग्रसंग

क्षुण्णावनीवलयजन्मरजोभिसर्प्पत् ।

विद्वेषिणां पुरवरेषु तिरोहितान्य

वस्तूत्करं प्रलयकालमिवादिदेश ॥ १८ ॥

तस्य क्षितीश्वरवरस्य पुरं समस्ति

विस्तीर्ण्णशोभममितोपि च डोभसंज्ञम् ।

प्राप्तेप्सितक्रयसमग्रदिगागतांगि

व्यावर्ण्णमानविपणिव्यवहारसारम् ॥ १९ ॥ ढ ॥

असीज्जायसपूर्व्विनिर्ग्गतवणिग्वंशांबराभीशुमान्

जासूकः प्रकटीकृतार्थनिकरःश्रेष्ठी प्रभाधिष्ठितः ।

सम्यग्दृष्टिरभीष्टजैनचरणद्वंद्वार्च्चने यो ददौ

पात्रौघाय चतुर्व्विधं त्रिविबुधोदानं युतः श्रद्धया ॥ २० ॥

श्रीमज्जिनेश्वरपदांबुरुहद्विरेफो

विस्फारकीर्तिधवलीकृतदिग्विभागः

पुत्रोस्य वैभवपदं जयदेवनामा

सीमायमानचरितोजनि सज्जनानाम् ॥ २१ ॥

रूपेण शीलेन कुलेन सर्व्वं

स्त्रीणां गुणैरप्यपरैः शिरस्सु ।

पदं दधानास्य बभूव भार्या

यशोमतीति प्रथिता पृथिव्याम् ॥ २२ ॥

तस्यामजीजनदसावृषिदाहडाख्यौ

पुत्रौ पवित्रवसुराजितचारुमूर्त्ती ।

प्राच्यामिवार्कशशिनौ समयः समस्त

संपत्प्रसाधकजनव्यवहारहेतू ॥ २३ ॥

प्रोन्माद्यत्सकलारिकुंजरशिरोनिर्दारणोद्यद्यशो

मुक्ताभूषितभूरभूरपि भियान्नोन्मार्ग्गगामी च यः।

सोदाद्विक्रमसिंहभूपतिरतिप्रीतो यकाभ्यां युग

श्रेष्ठः श्रेष्ठिपदं पुरेत्र परमे प्राकारसौधापणे ॥ २४ ॥ ठ ॥

आसीद्विशुद्धतरबोधचरित्रदृष्टि

निःशेषसूरिनतमस्तकधारिताज्ञः।

श्रीलाटवागटगणोन्नतरोहणाद्रि

माणिक्यभूतचरितो गुरुदेवसेनः ॥ २५ ॥

सिद्धांतो द्विविधोप्यबाधितधिया येन प्रमाणध्वनि

ग्रंथेषु प्रभवः श्रियामवगतो हस्तस्थमुक्तोपमः।

जातः श्रीकुलभूषणोखिलवियद्वासो गुणग्रामणीः

सम्यग्दर्शनशुद्धबोधचरणालंकारधारी ततः ॥ २६ ॥

रत्नत्रयाभरणधारणजातशोभ

स्तस्मादजायत स दुर्ल्लभसेनसूरिः।

सर्व्वं श्रुतं समधिगम्य सहैव सम्य

गात्मस्वरूपनिरतोभवदिद्धधीयः ॥ २७ ॥

आस्थानाधिपतौ बुधादविगणे श्रीभोजदेवे नृपे

सभ्येष्वंबरसेनपंडितशिरोरत्नादिषूद्यन्मदान्।

योनेकान्शतशो व्यजेष्ट पटुताभीष्टोद्यमो वादिनः

शास्त्रांभोनिधिपारगोभवदतः श्रीशांतिषेणो गुरुः ॥ २८ ॥

गुरुचरणसरोजाराधनावाप्तपुण्य

प्रभवदमलबुद्धिः शुद्धरत्नत्रयोस्मात्।

अजनि विजयकीर्त्तिः सूक्तरत्नावकीर्ण्णां

जलधिभुवमिवैतां यः प्रशस्तिं व्यधत्त ॥ २९॥

तस्मादवाप्य परमागमसारभूतं

धर्मोपदेशमधिकाधिगतप्रबोधाः।

लक्ष्म्याश्च बंधुसुहृदां च समागमस्य

मत्वायुषश्च वपुषश्च विनश्वरत्वम् ॥ ३० ॥

प्रारब्धाधर्मकांतारविदाहः साधुदाहडः।

सद्विवेकश्च कूकेकः सूर्पटः सुकृते पटुः ॥ ३१ ॥

तथा देवधरः शुद्धःधर्मकर्मधुरंधरः।

चंद्रालिखितनाकश्च महीचंद्रः शुभार्जनात् ॥ ३२ ॥

गुणिनः क्षणनाशिश्रीकलादानविचक्षणाः।

अन्येपि श्रावकाः केचिदकृतेंधनपावकाः ॥ ३३ ॥

किं च लक्ष्मणसंज्ञोभू . ह देवस्य मातुलः।

गोष्ठिको जिनभक्तश्च सर्व्वशास्त्रविचक्षणः ॥ ३४ ॥

शृंगाग्रोल्लिखितांबरं वरसुधासांद्रद्रवापाण्डुरं

सार्थं श्रीजनमंदिरं त्रिजगदानंदप्रदं सुंदरम्।

संभूयेदमकारयन्गुरुशिरःसंचारिकेत्वंबर

प्रांतेनोच्छलतेव वायुविहतेर्घ्यामादिशत्पश्यताम् ॥ ३५॥ ढ॥

अथैतस्य जिनेश्वरमंदिरस्य निष्पादनपूजनसंस्काराय कालान्तरस्फुटित-त्रुटितप्रतीकारार्थं च महाराजाधिराजश्रीविक्रमसिंहः स्वपुण्यराशेरप्रति-हतप्रसरं परमोपचयं चेतसि निधाय गोणीं प्रति विंशोपकं गोधूमगोणी-

चतुष्टयवापयोग्यं क्षेत्रं च महाचक्रग्रामभूमौ रजकद्रहपूर्व्वदिग्भाग-

वाटिकां वापीसमन्वितां। प्रदीप्तमुनिजनशरीराभ्यंजनार्थं करघटिकाद्वयं

च दत्तवान् तच्चाचंद्रार्कं महाराजाधिराजश्रीविक्रमसिंहोपरोधेन ॥

बहुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः।

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥ ३६॥

इति स्मृतिवचनान्निजमपि श्रेयःप्रयोजनं मन्यमानैः

सकलैरपि भाविभिर्भूपालैः पालनीयमिति ॥ढ ॥

लिलेखोदयराजो यां प्रशस्तिं शुद्धधीरिमाम्।

उत्कीर्ण्णवान् शिलाकूटस्तील्हणस्तां सदक्षराम्॥ ३७॥

संवत् ११४५ भाद्रपदशुदि ३ सोमदिने ॥ मंगलं महाश्रीः ॥

Summary

This inscription, engraved on one of the pilasters in the south cloister of an old temple, consists 61 lines of fairly preserved and neatly executed writing. Except for the introductory obeisance, a portion in lines 54-58, and the date, *etc.,* in the end, this record is metrically composed throughout. It has 37 verses, which are not numbered.

The inscription belongs to the reign of Vikramasiṁha of the Ḍubkuṇḍ branch of the Kachchhapaghāta Dynasty. It records the construction of a Jaina temple by some private persons, and some grants made in favour of it by the *Mahārājādhirāja* Vikramasiṁha.

This inscription falls into four parts. The first of these parts (vv. 7-19) mentions the genealogy of

Vikramasiṁha and his ancestors, the second (vv.20-24) gives an account of the builder of the tmeple; the third (vv.25-35) names some sages; and the fourth (prose ll.54-60) records the donations made by the king.

The record begins with six introductory verses which either invoke the blessings of or praise (the Jaina Tīrthaṅkaras) Ṛishabhasvāmin, Śāntinātha, Chandraprabha and Jina (Mahāvīra), and the sage Gōtama and last of all, Śrutadēvī, *i.e.,* the goddess of learning.

The genealogical account of the ancestors of the ruling king Vikramasiṁha begins with v.7. The first name introduced here is that of Yuvarāja, who was the originator of the Kachchhapaghāta house (vv.7-9). Yuvarāja's son was Arjuna, and his son was Abhimanyu (vv.10-13), whose son again was Vijayarāja (v.14). Vijayarāja's son was Vikramasiṁha whose stronghold (*pura*) was known as Ḍōbha (*s.a.* Ḍubkuṇḍ), which was then a flourishing place noted for its trade (vv.15-19). The description of these princes is conventional and devoid of historical interest, except what is stated in v.8, that Arjuna, as an ally or feudatory of Vidyādhara, killed Rājyapāla, and in v.11 that his son Abhimanyu's skill in management of horses and chariots and in the use of powerful weapons was highly spoken of by the king Bhōja.

Vidyādhara, whose ally Arjuna is mentioned in the record, was evidently the homonymous Chandēlla king; and Rājyapāla is no other than the Gurjara king of Kanauj, as is well-known; and thus the Kachchhapaghāta Arjuna was a contemporary of both these rulers who flourished in the first quarter of the eleventh century A.D. As regards

the other statement which alludes to Arjuna's son Abhimanyu's military skill as highly spoken of by Bhōjadēva, Ganguly suggests that Abhimanyu entered into an alliance with the Paramāra Bhōja on the eve of the latter's northern expedition, whereas Ray holds that during the weak rule of the Chandēlla rulers who succeeded Vidyādhara Bhōja exerted his influence in the north as for as Ḍubkuṇḍ and Abhimanyu became subservient to him. The title *Mahārājādhirāja* given to Vikramasiṁha in l.55 of this inscription indicates that he was then enjoying the status of an independent ruler. It appears, therefore, that during the time when the Chandēlla Kīrtivarman was busy restoring the fame of his house, Vikramasiṁha may have succeeded in throwing off the Chandēlla yoke to whom his house had been paying obeisance.

Verses 20-24 introduce two Jaina merchants called Ṛishi and his brother Dōhaḍa. on whom king Vikramasiṁha conferred the rank of *śrēshṭhin* in his town. They were sons of Jayadēva by his wife Yaśōmatī and grandsons of Jāsūka, a devoted Jaina, who is stated to have been the head of a family or a guild of merchants, migrated from the city of Jāyasa (v.20) which cannot be identified for want of details.

The third part of the inscription introduces some Jaina sages, the first of whom was *Guru* Dēvasēna of the Lāṭa-Vāgaṭa-*gaṇa* (v.25). His son (disciple) was Kulabhūshaṇa (v.26), and his son again was Durlabhasēna (v.27), from whom sprang Śāntishēṇa, who in an assembly held before the king Bhōjadēva, defeated hundreds of disputants who had assailed Ambarasēna and

other learned persons (v.28). Śāntishēṇa's son was Vijayakīrti, who composed the present *praśasti* (v.29) and who also induced Dāhaḍa and some other persons, by his religious teachings, to build the temple where the inscription was engraved (v.30). Then the names of those who contributed towards the construction of the temple are mentioned. They are: Dāhaḍa (referred to above), Kukēka, Sūrpaṭa, Dēvadhara, Mahīchandra, Lakshmaṇa, and some others. Then there is a verse (35) which extols the temple in a poetic way.

The prose passage, commencing in line 54, records that the *Mahārājādhirāja* Vikramasiṁha, for the building of the temple and for keeping it in good repair, as well as for purposes of worship, assigned (a tax of) one *viṁśōpaka* on each *gōṇī* (a measure of grain) and gave a piece of land in the village of Mahāchakra, capable of being sown with four *gōṇīs* of wheat, and a garden with a well to the east of Rajakadraha; and that he moreover provided with a certain amount of oil for lamps and for anointing the bodies of holy men.

After the usual appeal to future rulers to keep the above donations intact, lines 60-61 give the names of the writer and of the engraver, *viz.,* Udayarāja and mason Tilhaṇa. And the document then closes with the date, *viz.,* Monday, the third of the bright half of Bhādrapada of the (Vikrama) Year 1145, corresponding to Monday, the 21st August, 1088 A.D.



No.2
GWALIOR STONE INSCRIPTION OF MAHIPALA VIKRAMA YEAR 1150

Location	: Gwālior, Gwalior District, Madhya Pradesh
Date	: Vikrama Year 1150 = 1092 A.D.
Script	: Nāgarī
Language	: Sanskrit
King	: Mahīpāla
Dynasty	: Kachchhapaghātas of Gwālior
Reference	: Trivedi, H.V., *CII,* VIII, pt.3, pp.535-552; No.155

Text

Metres: Vv. 1, 5, 6, 10, 16-19, 29, 60-64, 77, 109 *Śārdūlavikrīḍita;* 2, 11, 13-15, 21, 24, 25, 32-34, 65, 66, 69, 79-99, 100, 101-105, 107, 108, 110-112 *Anushṭubh;* 3, 27 *Sragdharā;* 4, 26, 28, 67 *Śikhariṇī;* 7 *Drutavilambita;* 8, 74 *Upēndravajrā;* 9, 72, 75 *Indravajrā;* 12, 20, 23, 35-59, 70, 78 *Vasantatilakā;* 22, 30, 68, 71, 73, 76, 106 *Upajāti;* 31 *Mandākrāntā*

ओं ओं नमः पद्मनाथाय ॥

हर्षोत्फुल्लविलोचनैर्दिशि दिशि प्रोद्गीयमानंजनै

र्म्मेदिन्यां वितितन्ततो हरिहरब्रह्मास्पदानि क्रमात् ।

श्वेतीकृत्य यदात्मना परिणतं श्रीपद्म भूभृद्यशः

पायादेष जगन्ति निर्म्मलवपुः श्वेतानिरुद्धश्चिरम् ॥ १ ॥

मौलिन्यस्तमहानीलशकलः पातु वो हरिः ।

दर्शयन्निव केशस्थनवजीमूतकार्ण्णिकाम् ॥ २ ॥

मुक्ताशैलच्छलेनक्षितितिलकयशोराशिना निर्म्मितोय

न्देवःपायादुषायाः पतिरतिधवलस्वच्छकान्तिर्ज्जगन्ति ।

मन्वानः सर्व्वथैव त्रिभुवनविदितं श्यामतापह्नवं यः

शङ्के स्वं वर्ण्णचिह्नं मुकुटतटमिलन्नीलकान्त्या बिभर्ति ॥ ३ ॥

इदं मौलिन्हस्तं न भवति महानीलशकलं

न मुक्ताशैलेन स्फुरति घटितश्चैष भगवान् ।

उषाकर्ण्णोत्तंसोकरणसुभगं नीलनलिनं

वहत्यद्याप्यस्याश्चिरविरहपाण्डूकृततनुः ॥ ४ ॥

आसीद्वीर्यलघूकृतेन्द्रतनयो निःशेषभूमीभृतां

वन्द्यः कच्छपघातवंशतिलकः क्षोणीपतिर्ल्लक्ष्मणः ।

यः कोदण्डधरः प्रजाहितकरश्चक्रे स्वचित्तानुगा

ङ्गामेकः पृथुवत्पृथूनपि हठादुत्पाट्य पृथ्वीभृतः ॥ ५ ॥

तस्माद्वज्रधरोपमः क्षितिपतिः श्रीवज्रदामाभव

द्दुर्व्वारोर्ज्जितबाहुदण्डविजिते गोपाद्रिदुर्ग्गेयुधा ।

निर्व्याजम्परिभूय गाधिनगराधीशप्रतापोदयं

यद्वीरव्रतपूरकः समचरत्प्रोद्घोषणाडिण्डिमः ॥ ६ ॥

न तुलितः किल केनचिदप्यहञ्जगति भूमिभृतेति कुतूहलात् ।

तुलयति स्म तुलापुरुषैः स्वयं स्वमिह यः सु विशुद्धहिरण्मयैः ॥ ७ ॥

ततो रिपुध्वान्तसहस्रधामा नृपोभवन्मंगलराजनामा ।

य ईश्वरैकप्रणतिप्रभावान्महेश्वराणाम्प्रणतः सहस्रैः ॥ ८ ॥

श्रीकीर्त्तिराजो नृपतिस्ततोभूद्यस्य प्रयाणेषु चमूसमुत्थैः ।

धूलीवितानैः सममेव चित्रं मित्रस्य वैवर्ण्यमभूद्विषश्च ॥ ९॥

किं ब्रूमोस्य कथाद्भुतं नरपतेरेतेन शौर्याब्धिना

दण्डो मालवभूमिपस्य समरे संख्यामतीतो जितः

यस्मिन्भङ्गमुपागते दिशि दिशि त्रासात्कराग्रच्युतै

ग्र्ग्रामीणाः स्वगृहाणि कुन्तनिकरैः संछादयांचक्रिरे ॥ १० ॥

अद्भुतः सिहपानीयनगरे येन कारितः ।

कीर्त्तिस्तंभ इवाभाति प्रासादः पार्व्वतीपतेः ॥ ११ ॥

तस्मादजायत महामतिमूलदेवः

पृथ्वीपतिर्भुवनपाल इति प्रसिद्धः ।

आनन्दयञ्जगदनिन्दितचक्रवर्त्ति

चिन्हैरलंकृततनुर्मनुतुल्यकीर्त्ति ॥ १२ ॥

यस्य ध्वस्तान्यभूपालां सर्व्वाम्पालयतः प्रभोः ।

भुवन्त्रैलोक्यमल्लस्य निःसपत्नमभूज्जगत् ॥ १३ ॥

राज्ञी देवव्रता तस्य हरेर्ल्लक्ष्मीरिवाभवत् ।

तस्यां श्रीदेवपालोभूत्तनयस्तस्य भूपतेः ॥ १४ ॥

त्यागेन कर्ण्णमजयत्पार्थङ्कोदण्डविद्यया ।

धर्मराजञ्च सत्येन स युवा विनयाश्रयः ॥ १५ ॥

सूनुस्तस्य विशुद्धबुद्धिविभवः पुण्यैः प्रजानामभू

न्मान्धातेव स चक्रवर्त्तितिलकः श्रीपद्मपालः प्रभुः ।

मत्स्वाम्येपि करप्रवृत्तिरपरस्येतीव यश्चिन्तय

न्दिग्यात्रासु मुहुः खरांशुमरुणत्सान्द्रैश्श्रमूरेणुभिः ॥ १६ ॥

कृत्वान्याः स्ववशे दिशः क्रमवशादाशाङ्गतैर्द्दक्षिणा

मुत्क्षिप्ताचलसन्निभानविरतं यत्सैन्यवाजिवज्रैः ।

उद्धूतान्पततः पयोधिमभितः संप्रेक्ष्य रेणूत्करा

न्भूयोप्युद्भटसेतुबन्धनधियात्रस्यंति नक्तञ्चराः ॥ १७ ॥

यस्येन्दुद्युतिडम्बरेण यशसा नीते सुराणाङ्गणे

वैवर्ण्यं भ्रमशीलखण्डन भयादप्राप्नुवन्तः प्रियान् ।

नूनं शक्रपुरःसरामरवधूसंघाः श्रिये सांप्रतं

गौर्यै च स्पृहयन्ति ये प्रथमतः पत्युर्वपुः संश्रिते ॥ १८ ॥

कैर्हृष्टाः क्व समस्तवांछितफलभ्राजिष्णवः पादपा

गावः कामदुघाः क्व कै क्व मणयः कैश्चिन्तितार्थप्रदाः ।

दृष्टाः कस्य मनोरथा इह न कैः पत्यामुना पूरिता

वीरोद्यानितटस्य तद्गुणवतः कल्पद्रुमादीन्यपि ॥ १९ ॥

श्रुत्वा न पद्मनृपतिं परिरक्षिता भूः

प्राप्तोन्यथापि यदसौ बत नग्नभावः ।

दौस्थ्यान्निरम्बरतनुर्व्विपिनेष्वशोच

द्यस्मात्प्रतिक्षणमिति प्रतिपंथिसार्थः ॥ २०

भ्रमः कुलालचक्रेषु लोभः पुण्यार्ज्जनेष्वभूत् ।

काठिन्यं कुचकुंभेषु तस्मिञ्शासति मेदिनीम् ॥ २१ ॥

असम्मतोदूटगुणस्य पीडा साधुर्न्न निस्त्रिंशपरिङ्गतापि ।

इत्यालम्बे न धनुर्न चासिं तथापि यो वैरिगणञ्जिगाय ॥ २२ ॥

सद्यः स्नुतास्रवृषतव्यतीकीर्ण्णरूपो

वैरिद्विषाधिपशिरोमणिभिः समन्तात्।

लोकानुरागयशसामिव बीजवापं

विस्तारयां यदसिरास रणाजिरेषु ॥ २३ ॥

वने यदरिनारीणां हैमनीरजनिश्चयः।

भृङ्गाणां तन्मुखे नातो हैमनीरजनिश्चयः ॥ २४ ॥

स विमृश्य नदीपूरगत्वरे संपदायुषी।

पूर्त्तधर्म्मे मतिश्चक्रे जिघृक्षुरनयोः फलम् ॥ २५ ॥

प्रजाभर्त्रा तेन क्षितितिलकभूतेन भवनं

हरेर्द्धर्म्मज्ञेन त्रिदशसदृशा कारितमदः।

वदाम्यस्योच्चैस्त्वंकथमिव गिरा यस्य शिखरं

समारूढः सिंहो मृगमिव मृगाङ्कस्थमशितुम् ॥ २६ ॥

प्रासादस्यास्य शश्वद्विधुधरशिखरिस्पर्द्धिनो हैममण्ड

दण्डाग्रात्पावनीयं शशधरधवला वैजयन्ती पतन्ती।

निर्व्वाम्भाति भूतिच्छुरित निजतनोर्द्देवदेवस्य शम्भोः

स्वर्ग्गाद्गङ्गेव पिङ्गस्फुटविकटजटाजूटमध्यं विशन्ती ॥ २७ ॥

तदेतद्ब्रह्माण्डं स इह भविता पङ्कजभवः

पुनर्यं वोढास्मो वयमिह विमानेन वियति।

सुवर्ण्णाण्डं हंसास्तदिदमुररीकृत्य सकलं

ध्रुवं संसेवन्ते हरिसदनमुच्चैः स्थितमपि ॥ २८ ॥

तुङ्गिम्ना कनकाचलः शुभविधावन्तः स्थितः श्रीपति

र्ब्बिभ्राणो द्विजसत्तमानुदधिजावासो नृसिंहान्वितः।

निर्म्मातास्य वृतः समस्तविबुधैर्ल्लब्धप्रतिष्ठैरयं

प्रासादश्चधरातले सममहो कल्पं हरेः कल्पताम्॥ २९॥

देवेर्द्धसिद्धे द्विजपुङ्गवेषु प्रतिष्ठितेष्वष्टसु पद्मपालः।

युवैव दैवप्रतिकूलभावात्संक्रन्दनाङ्कासनभाग्बभूव॥ ३०॥

तस्य भ्राता नृपतिरभवत्सूर्यपालस्य सूनुः

श्रीगोपाद्रौ सुकृतनिलयः श्रीमहीपालदेवः।

यम्प्राप्यैव प्रथितयशसन्तावभूतां सनाथौ

शौर्यत्यागौ हरिरविसुताभावदुःस्थौ चिरेण॥ ३१॥

सृष्टिङ्कुर्व्वन्नमात्यानां विप्राणां स नृपः स्थितिम्।

प्रलयं विद्विषामासीद्ब्रह्मोपेन्द्रहरात्मकः॥ ३२॥

यत्र धामनिधौ राज्ञि पालयत्यवनीतलम्।

न भास्वान्भास्करादन्यो न राजान्यो विधोरभूत्॥ ३३॥

कृताभिषेकं सद्वृत्तैरूपविष्टं नृपासने।

यमुदारपदैरेवन्तुष्टुवुः सूतगायनाः॥ ३४॥

त्वामुद्वहन्ति शिरसा खलु राजहंसाः

सृष्टास्त्वया पुनरिमाः समयावसन्नाः।

नाथ प्रजाः सुमनसां प्रथमोसि कोसि

त्वं सिद्धवीररस तामरसोद्भवस्य॥ ३५॥

लक्ष्मीपतिस्त्वमसि पङ्कजचक्रचिह्नं

पाणिद्वयं वहसि भूप भुवं बिभर्षि।

श्यामं वपु प्रथयसि स्थितिहेतुरेक

स्त्वङ्कोसि नीतिविजितोद्धव माधवस्य ॥ ३६ ॥

त्वं पालयस्यनिशमार्यजनस्य कामं

रामः श्रिया त्वमसि नाथ गुणैरनन्तः ।

सङ्कर्षणः समितिविद्विषदायुषस्त्वं

त्वं कोसि सच्चरितहाल हलायुधस्य ॥ ३७ ॥

ख्याता रतिस्तव निजप्रमदासु नित्यं

रूपन्तवातिशयविस्मयकारि देव ।

त्वं मीनचिह्न पुरुषोत्तमसम्भवोसि

कस्त्वं क्षितीशवर शम्बरसूदनस्य ॥ ३८ ॥

भूभृत्सुतापतिरसि द्विषतां पुराणां

भेत्ता त्वमीश वृषपोषरतोसि नित्यम् ।

भूतिन्दधास्यमलचन्द्रविभूषिताङ्गः

कस्त्वं सदम्बुजविभाकर शंकरस्य ॥ ३९ ॥

त्वन्तेजसा शिखिनमिद्धमधः करोषि

शक्तिन्दधासि नरदेव विपन्निहन्त्रीम् ।

त्वन्तारकं रिपुबलस्य बलान्निहंसि

कस्त्वं नवीननल नीलगलध्वजस्य ॥ ४० ॥

त्वं वज्रभृत्वमसि पक्षभिदप्यशेष

भूमीभृताम्विबुधवंद्य गुरुप्रियोसि ।

श्रीकम्बुवर्णगिरि दुर्ग्गचणोसि कोसि

त्वं भीमसाहस सहस्रविलोचनस्य ॥ ४१ ॥

ख्यातन्तवेश बहुपुण्यजनाधिपत्यं

कान्तालका बलिभिराप्ततमैश्च गुप्ताः ।

त्वामामनन्ति परमेश्वरबद्धसख्यं

त्वङ्कोसि सद्गुणनिधात धनाधिपस्य ॥ ४२ ॥

तेजोनिधिस्त्वमसि भूमिभृतः समग्राः

क्रान्ताः करैः प्रसभमुग्रतरैस्तवेश ।

प्राप्तोदयः सततमर्थिजनस्य कोसि

त्वं कल्पभूरुह सरोरुहबान्धवस्य ॥ ४३ ॥

आनन्ददोसि जनतानयनोत्पलाना

माप्यायिताखिलजनः करमार्द्दवेन ।

त्वं शश्वदीश्वरशिरस्तलदत्तपाद

स्त्वं कोसि मर्त्त्यभुवनेश निशाकरस्य ॥ ४४ ॥

त्वामंशमीश निगदन्ति मधुद्विषोमी

श्यामाभिरामतनुरस्यमलप्रबोधः ।

पुण्यं च भारतमिदं विहितं त्वयैव

त्वङ्कोसि सत्यधन सत्यवतीसुतस्य ॥ ४५ ॥

नीतात्मकीर्त्तिसुरसिंधुरियं समुद्र

प्रान्तन्त्वयोन्नतिमसौ गमितः स्ववंशः ।

पूर्व्वे पवित्रतनवो विहिताश्च कोसि

त्वं सत्सु लब्धपरभाग भगीरथस्य ॥ ४६ ॥

एतत्त्वया कृतमताडकमाशु विश्वं

व्याप्ता मही हरिभिरीशमनोजवैस्ते ।

पुण्यावतारकरणक्षतदुर्द्दशास्य

स्त्वं कोसि दत्तरिपुलाघव राघवस्य ॥ ४७ ॥

धर्मप्रसूस्त्वमसि सत्यधनस्त्वमेक

स्त्वं वासुदेवचरणार्च्चनदत्तचित्तः ।

त्वं कोसि विप्रजनसेवितशोषवृत्तिः

सङ्ग्रामनिष्ठुर युधिष्ठिरपार्थिवस्य ॥ ४८ ॥

त्वं भूरिकुञ्जरबलो भुवनैकमल्ल

विद्याविभूषिततनुर्नृपपाबनोसि ।

प्रच्छन्नसूपकृतिसंभृतबंधुवाञ्च्छः

कस्त्वं कवीन्द्रकृतमोद वृकोदरस्य ॥ ४९ ॥

एकस्त्वमीश भुवि धर्मभृतां वरिष्ठः

सस्वामिकारिगणदर्पहरस्त्वमाजौ ।

गंधर्वराजपृतनाविजयाप्तकीर्त्ति

स्त्वं कोसि सुंदर पुरन्दरनन्दनस्य ॥ ५० ॥

दुर्योधनारिबलदर्पहतस्तवेश

यत्नः पराज्र्जुनयशःप्रसरं निरोद्धुम् ।

त्वं कोसि सूर्यजनित प्रमदार्थिसार्थ

दौर्ग्गत्यकर्त्तन विकर्त्तनसंभवस्य ॥ ५१ ॥

रत्नालयस्त्वमसि धाम गभीरताया

स्त्वं पासि पार्थ समभूमिभृतः प्रविष्टान्।

अंतःस्थितस्तव हरिः सततं नरेश

कस्त्वं वितीर्ण्णरिपुजागर सागरस्य ॥ ५२ ॥

शौर्य्यैकभूः क्रमसमागतसत्त्ववृत्ति

स्त्वं राजकुञ्जरशिरःप्रवितीर्ण्णपादः।

दृप्तारिभास्करतिरस्कृतिसिंहिका भूः

कस्त्वं महीपतिमृगाङ्क मृगाधिपस्य ॥ ५३ ॥

दानन्ददासि विकटोन्नतवंशशोभ

स्त्वं दन्तपालिकरवालहतारिदर्पः।

क्षोणीभृतो जयसि तुङ्गतया नरेन्द्र

त्वं कोसि वैरिबलवारण वारणस्य ॥ ५४ ॥

सद्म श्रियस्त्वमसि मित्रकृतप्रमोद

स्त्वं राजहंससमलंकृतपादमूलः।

स्वामिन्नधःकृतजडोसि गुणाभिरामः

कस्त्वं स्मिताढ्यमुखपंकज पंकजस्य ॥ ५५ ॥

सत्पत्रभूषिततनुः सुविशुद्धकोश

स्त्वं चंद्रकांतिसमलङ्कृत कांतमूर्तिः।

ख्यातन्तवैव कविवल्लभ सौमनस्यं

त्वं ब्रूहि कः समरभैरव कैरवस्य ॥ ५६ ॥

त्वं पश्यतां हरसि देव मनांसि शश्व

न्माङ्गल्यभूस्त्वमसि निर्मलताभिरामः।

कोसि प्रसीद वद सद्गुणरत्नयोनि

स्त्वङ्कच्छपारिकुलभूषण भूषणस्य ॥ ५७ ॥

धात्रा परोपकरणाय विसृष्टकाय

सच्छाय जन्मसमलङ्कृततुङ्गगोत्र ।

ब्रूहि त्रिसंध्यमवनीश्वरवन्दनीय

त्वङ्कोसि सूर्यनृपनन्दन चन्दनस्य ॥ ५८ ॥

नाथः कृतद्विजपतिर्न्न मदान्वितोसि

न त्वं विशुद्धहृदय प्रथितोग्रमायः ।

त्वं जातु न क्षतवृषो न जडे कृतास्थ

स्तेनास्तु नाथ हरिणोपमितिः कथं ते ॥ ५९ ॥

नित्यं सन्निहितक्षयः स तमसा प्रायोभिभूयेत स

त्वत्त्रासाद्भुवनैकनाथ हरिणस्तस्योदरे प्राविशत् ।

मूर्त्तिस्तस्य कलङ्किता स जडतां धत्ते स दोषाकरः

शब्दस्ते विदितस्तथापि नृपते राजा त्वमित्यद्भुतम् ॥ ६० ॥

एकेनोत्तरगोग्रहे विमुखतां पार्थेन नीताः परे

व्यासेन स्तुतिरर्ज्जुनस्य विहितेत्यज्ञायि पूर्व्वं किल ।

तत्सम्यक्प्रतिभाति संप्रति पुनः श्रीमन्महीपालन

स्त्वामालोक्य सहस्रशो रिपुबलं निघ्नन्तमेकं रणे ॥ ६१ ॥

किं ब्रूमोधिकतत्त्वमीश भवतस्त्वं नीतिपात्रं परं

वृत्तान्तं जगतीपते चतसृणामात्मप्रियाणां शृणु ।

कीर्त्तिर्भ्राम्यति दिक्षु गीर्ग्गुणवताङ्कण्ठे लुटत्यादृता

मर्यादारहिता मही द्विजसुहृद्गेहे रता श्रीरपि ॥ ६२ ॥

किं चित्रं भुवनैकमल्ल यदियं मन्दाकिनी पद्मभू

लोकादुद्धरता भगीरथनृपेणानायि निम्नां महीम् ।

आश्चर्यम्पुनरेतदीश यदितो निम्नान्महीमण्डला

दूद्ध्वं कीर्त्तितरङ्गिणी कमलभूलोकं त्वया प्रापिता ॥ ६३ ॥

चित्रं नात्र स लक्षशस्त्वमकरोः सर्व्वात्मना विद्विषो

देव प्रत्ययलोपमाशु विशिखैः संमूर्च्छितस्याहवे ।

क्रोधाद्भैरव मूर्त्तिरुल्लसदसिक्रूरप्रहाराद्भुतै

रस्य त्वं यदनीनशः प्रकृतिमप्येतन्न नाश्चर्यकृत् ॥ ६४ ॥

अत्यंबुधि भवद्धैर्यमत्यादित्यं भवन्महः ।

अतिसिंहं भवत्शौर्यमनः केनोपमीयसे ॥ ६५ ॥

केयूरं तव भूपाल भुजदण्डे विराजते ।

किरीटमिव बाह्वन्तर्न्निवासिविजयश्रियः ॥ ६६ ॥

यदर्च्चां संतत्य त्रिभुवनगुरोः स्तोत्रमकृथा

स्तदेष प्रीतस्त्वां ध्रुवमकृत कल्पस्थितिमिह ।

यदुत्सङ्गे तुङ्गे धवलरविचन्द्रांशुविमला

प्रलम्बव्याजेन क्षितितिलक तारावलिरियम् ॥ ६७ ॥

वैतालिकैरित्थमभिष्टुतेन संपूजितामर्त्त्यगुरुद्विजेन ।

विमुक्तकारागृहसंयतेन वितीर्ण्णभूताभयदक्षिणेन ॥ ६८ ॥

तेनाभिषक्तमात्रेण प्रतिजज्ञे द्वयं स्वयम् ।

पद्मनाथस्य संसिद्धिः कन्यायाः सद्वरार्पणम् ॥ ६९ ॥

तच्चद्वयं कृतमनेन विवेकभाजा

राजात्मजा मदनहारिवाराय दत्ता।

श्रीपद्मनाथसुरमन्दिरमेतदुच्चै

र्नीतं समाप्तिमविनाशि यशःशरीरम्॥ ७०॥

समर्पिता ब्रह्मपुरी च तेन शेषान्विधायावनिदेवमुख्यान्।

प्रवर्त्तितं सत्त्रमतन्द्रितेन मिष्टान्नपानैरतिधार्म्मिकेण॥ ७१॥

श्रीपद्मनाथस्य स लोकनाथश्चक्रे द्वयं भूपतिचक्रवर्त्ती।

नैवेद्यपाकाय विपक्वबुद्धिः प्रादात्प्रदीपाय च गोत्रदीपः॥ ७२॥

ब्रह्मोत्तरं मण्डपिकासमुत्थं द्विधा विधाय स्वयमीश्वरेण।

श्रीपद्मनाथाय वितीर्ण्णमर्द्धमर्द्धञ्च वैकुण्ठसुरेश्वराय॥ ७३॥

विलासिनीवादकगायनादेर्यथार्हतः पादकुलस्य वृत्तिम्।

स पद्मनाथस्य पुरः समग्रामकल्पयत्प्रेक्षणकाय भूपः॥ ७४॥

पाषाणपल्लीं प्रविभज्य सम्यग्देवाय सार्द्धानि पदानि पंच।

संपादयामास तथा द्विजेभ्यः सार्द्धाश्चतुर्व्विंशतिमुत्तमेभ्यः॥ ७५॥

ददौ करस्कन्धकवाटपीटं महीपतिस्तत्रभवं समस्तम्।

आकाशपातालसमुद्गतञ्च देवद्विजेभ्यो लवणाकरं च॥ ७६॥

तस्याष्ट . सहायतामुपगतो योगेश्वरांगोद्भवः

ख्यातः सूरिसलक्षणः क्षितिपतेः सर्व्वत्र विश्वासभूः।

आधारो विनयस्य शीलभुवनं भूमिः श्रुतस्याकरः

स्वाध्यायस्य कृतज्ञतैकवसतिः सौजन्यकोशालयः॥ ७७॥

तत्प्रत्ययेन निदधे निखिलानि धर्म

कार्याणि धर्मनिरतः स नरेन्द्रचन्द्रः।

विप्रः स निःस्पृहतया गुणगौरवेण

चित्तं विवेश समवृत्तितया च राज्ञः॥ ७८॥

महीपालेन ये विप्रास्तस्मिन्ग्रामे प्रतिष्ठिताः।

तेषां नामानि लिख्यन्ते विस्तरः शासनोदितः॥ ७९॥

देवलब्धिः सुधीराद्यस्ततः श्रीधरदीक्षितः।

सूरिः कीर्त्तिरथः सार्द्धपदिनो वै द्विजास्त्रयः॥ ८०॥

गङ्गाधरो गौतमश्च मलकोथ गयाधरः।

देवनागो वसिष्ठश्च देवशर्म्मा यशस्करः॥ ८१॥

कृष्णो वराहस्वामी च गृहदासः प्रभाकरः।

इच्छाधरो मधुश्चैव तिल्हकः पुरुषोत्तमः॥ ८२॥

रामेश्वरो द्विजवरस्तथा दामोदरो द्विजः।

अष्टादशैते विप्राश्च पदिनः षष्ठभोद्विजः॥ ८३॥

पादोनपदिको रत्नतिहुणोकौ सुरार्चकौ।

द्वावर्द्धपदिनावेष विप्राणां सङ्ग्रहः कृतः॥ ८४॥

ददौ देवपदानाञ्च मध्यादर्धपदं नृपः।

विधाय शाश्वतं लोहभटकायस्थसूरये॥ ८५॥

देवाय दत्तः सौवर्णो राज्ञा रत्नैः समाचितः।

मुकुटः सुमहान्मध्ये मणिर्यत्र विराजते॥ ८६॥

हरिन्मणिमयं भूपतिलकस्तिलकन्ददौ।

रत्नैर्व्विचित्रं निष्कञ्च निष्कलङ्कः स भूपतिः॥ ८७॥

प्रादात्केयूरयुगलं रत्नैर्बहुभिराचितम्।

कङ्कणानाञ्चतुष्कञ्च महार्हमणिभूषितम्॥ ८८॥

इति रत्नमयन्तावदेकमाभरणं विभोः।

द्वितीयमनिरुद्धस्य सौवर्णं केवलं यथा॥ ८९॥

कङ्कणानां चतुष्कञ्च तालपट्टद्वयन्तथा।

कृत्तिदारं स्वर्णमुष्टिम्बिभर्त्यन्वहमच्युतः॥ ९०॥

रूप्यमङ्गालिहादत्ता कञ्चालैः पंचभिर्युता।

नैवेद्यधारणार्थञ्च कांस्यस्थालचतुष्टयम्॥ ९१॥

सुवर्णाण्डत्रयं देवपरिवारविभूषणम्।

धृतं चोपरि हेमाब्जमातपत्रीकृतं विभोः॥ ९२॥

निवेश्य ताम्रपट्टे च तन्मयेनैव गड्डुना।

स्नास्यते प्रतिमानित्यमनिरुद्धस्य राजती॥ ९३॥

प्रतिमा वामनस्यैका द्वितीया लधुराच्युती।

राजावर्त्तमयी चान्या द्वे पूर्व्वे रीतिनिर्म्मिते॥ ९४॥

ताः प्रयत्नेन तिस्त्रोपि पूज्यन्ते गर्भवेश्मनि।

तत्र ताम्रमयं दत्तन्दीपार्थं मञ्चिकाद्वयम्॥ ९५॥

स्नानार्थं ताम्रकुण्डे द्वे दत्ते द्वे ताम्रपात्रिके।

ताम्रार्घपात्रद्वितयं तथा दत्तं महीभुजा॥ ९६॥

सधूपदहनाः सप्त घण्टाश्चारात्रिकान्विताः।

दत्ता शंखाश्च सप्तैव ताम्रपात्रीचतुष्टयम्॥ ९७॥

स कांस्यवाढढां प्रादान्नृपतिः काहलाद्वयम्।

चामरं दण्डयुग्मं च रीतिस्फटिकसम्भवम् ॥ ९८ ॥

बृहच्चरुद्वयं ताम्रमयं ताम्रालुकाद्वयम् ।

ताम्रभाण्डचयस्तथा पञ्च दत्ताश्चाद्दश्च तन्मयः ॥ ९९ ॥

एष देवोपकरणद्रव्याणां सङ्ग्रहः कृतः ॥ १०० ॥

शिलाकुट्टस्थपत्यादियन्त्रिशाकटिकादिषु ।

वापीकूपतडागादिखननाबन्धनेषु च ॥ १०१ ॥

दशमांशं तथा विंशत्यंशं सर्व्वत्र मण्डले ।

ददौ राजानिरुद्धाय तेन सत्त्रं प्रवर्त्तते ॥ १०२ ॥

अयं देवालयः पद्मनृपतेः स्फटिकामलः ।

भूयादुपार्ज्जितः पुण्यैर्विष्णुलोक इवाक्षयः ॥ १०३ ॥

भारद्वाजेन मीमांसान्यायसंस्कृतबुद्धिना ।

कवीन्द्ररामपौत्त्रेण गोविन्दकविसूनुना ॥ १०४ ॥

कविना मणिकण्ठेन सुभाषितसरस्वता ।

प्रशस्तिर्द्विजमुख्येन रचितेयमनिन्दिता ॥ १०५ ॥

प्रतापलङ्केश्वरवाग्द्वितीयां बभ्रत्सुहृत्तां मणिकण्ठसूरेः ।

अशेषभाषासु कविर्लिलेख वर्णान्यशोदेवदिगंबरार्क्कः ॥ १०६ ॥

एकादशस्वतीतेषु संवत्सरशतेषु च ।

एकोनपञ्चाशति च गतेष्वब्देषु विक्रमात् ॥ १०७ ॥

पञ्चाशे चाश्विने मासे कृष्णपक्षे नृपाज्ञया ।

रचिता मणिकण्ठेन प्रशस्तिरियमुज्ज्वला ॥ १०८ ॥

अंकतोपि ११५० ॥

आश्विनबहुलपंचम्यां ओं ॥

तैस्तैस्तस्य महीपतेः प्रतिरणं प्रौढप्रतापानले

नाश्चर्यं यदनेकशो रिपुचमूचक्रैः पतङ्गायितम् ।

यस्येन्द्रप्रतिमस्य बुद्धिसहितः सर्व्वज्ञकल्पोभव

न्नीत्यानिर्ज्जितसौर्य्यवंशतिलकाचार्यः स गौरः सुधीः ॥ १०९ ॥

किञ्चित्रं यन्महीपालो भुनक्ति स्माखिलां महीम् ।

यस्य गीर्व्वाणमन्त्रीव मन्त्री गौरोभवत्सुधीः ॥ ११० ॥

प्रशस्तिरियमुत्कीर्ण्णा सद्वर्ण्णा पद्मशिल्पिना ।

देवस्वामिसुतेन श्रीपद्मनाथसुरालये ॥ १११ ॥

तथैव सिंहवाजेन माहुलेन च शिल्पिना ।

प्राप्नुवन्तु समुत्कीर्ण्णान्यक्षराणि यथार्थ्यताम् ॥ ११२ ॥

Summary

This inscription is found engraved on two long stone slabs found inside a temple within the fortress of Gwalior. Each of the slabs contains 21 lines of well-preserved, carefully written and beautifully incised writing. With the exception of the introductory *Ōṁ ōṁ namaḥ Padmanāthāya* and the expressions showing the date in l.40, the entire inscription is in verse. There are 112 verses in all. The language is correct, fluent, containing elegant and florid expressions as in the best Kāvya style using figures of speech like *upamā, rūpaka, ślēsha, sandēha, etc.*

The inscription refers itself to the reign of Mahīpāla who belonged to the Kachchhapaghāta dynasty of Gwalior and records the completion of the temple of Padmanātha, begun by his cousin Padmapāla and grants

made by the king in honour of the deity installed therein and in favour of some Brāhmanas. The date of the record is expressed in words to be expired Vikrama year 1149, and it is repeated in figures as the current year 1150, the day being the fifth of the dark half of Āśvina. This year corresponds to 1092 A.D.

The inscription falls into three parts, the first of which (vv.5-33) gives an account of the king Mahīpāla and his ancestors, the second (vv.34-67) glorifies him in bardic expressions, and the third (vv.68-103) records the construction of the temple and the establishment of a Brāhmaṇa colony in its vicinity and the endowments made to them.

Following obeisence to Padmanātha and four *maṅgala-ślōkas* in praise of Aniruddha, Hari and Ushā's husband in the temple, the inscription describes in 26 verses the genealogy of the Kachchhapaghāta (Kachchhapāri, as mentioned in v.57) family to which Mahīpāla, who completed the temple belonged. Lakshmaṇa was the originator of the house (v.5). His son was Vajradāman who put down the valour of the ruler of Gādhinagara (Kānyakubja) and performed *tulā-dāna* a number of times (vv. 6-7). He was succeeded by Maṅgalarāja, who was a Śaiva (v.8), and the latter by Kīrtirāja, who vanquished the countless army of the king of Mālava[2] and also built a Śiva temple at Siṁhapānīya which is the modern town of Suhāniyā in the Morena District near Gwalior (vv.8-11). Kīrtirāja's son was Mūladēva, who was also known as Bhuvanapāla and bore the title *Trailōkyamalla.* His wife was Dēvavratā (vv.12-13), and the son of this union was Dēvapāla (v.14). Dēvapāla's son was Padmapāla, who, in a poetic language, is described as valorous, munificent and an able ruler (vv.14-24). Then we are told that considering fortune and life unsteady and determining to perform pious deeds Padmapāla, caused the temple of Hari to be built.

The temple is described at length (vv.25-29). The next two verses state that unfortunately Padmapāla deceased, and his brother Mahīpāla who was the son of Sūryapāla, occupied the throne at Gōpādri.[1]

The only historical information that can be gathered from this part of the inscription is that Mahīpāla's great-grandfather Kīrtirāja achieved a crushing victory over the Paramāra king Bhōja of Mālwā. A Chandēlla inscription from Mahōbā states that the Paramāra king Bhōja was defeated by the Chandēlla king Vidyādhara. It is possible that Kīrtirāja who was then a feudatory of the Chandēlla Vidyādhara, may have inflicted a crushing defeat on the Paramāra army.

The second part of the inscription refers to the coronation of Mahīpāla and states that he was praised by bards in a high poetic style when his coronation was performed and when he was seated on the throne. This long panegyric in 33 stanzas (vv. 35-67) describes his valour, fame, glory, benefactions and religious merit, comparing him with deities like Brahmā, Vishṇu, Śaṅkara and their various incarnations, with Indra, Kuvēra, the Sun and the moon, with legendary kings and sages like Yudhishṭhira, Bhagīratha, Māndhāta and the Pāṇḍavas, and with objects like the ocean, lotus and the sandle tree, *etc.* This account is all void of historical interest, except that it shows that Mahīpāla was the son of king Sūrya, *i.e.,* Sūryapāla (vv. 51 and 58) that he belonged to the family of the Kachchhapaghātas (v.57), his title was *Bhuvanaikamalla* (vv. 49 and 63), and that he vanquished an army of a king of Gandharvas (v.50) about which nothing is so far known.

Following this bardic account is a mention of Mahīpāla's religious and charitable works; and here it is also stated that he completed the construction of the temple which was begun by his brother Padmapāla

(vv.68-70). He also established a Brahmapurī, *i.e.,* a settlement for Brāhmaṇas, and selected the other (in addition to those already settled there by Padmapāla) occupants. He also established a *sattra* (charitable feeding hall) where dainty food and drink were distributed (vv.70-71). He made donations for the cooking of the *naivēdya* of Padmanātha and for lights, and divided the sanctuary of the temple into two parts, assigning one-half to Padmanātha and the other half to Vaikuṇṭha (vv. 72-73), and also arranged for the maintenance of dancing girls, musicians, singers and the rest for public performances (*prēkshaṇakāya* – v.74).

The inscription records, then, that for the maintenance of the activities mentioned above, the king properly divided (the village of) Pāshāṇapallī, and allotted five shares and a half to the god and twenty-four shares and a half to the most excellent Brāhmaṇas to whom he made gifts (vv.75-76); and to look after this, he kept a learned Brāhmaṇa called Salakshaṇa who enjoyed the confidence of the king (vv.77-78). The following seven verses (79-85) contain the names of donees, beginning with Dēvalabdhi, Sudhīra, and verses 86-100 mention the implements for the gods, such as ornaments, dresses, pots for worship, *etc.,* which were donated by the king on this occasion.

Then it is stated that the king also made arrangements for stone-cutters, carpenters, engravers, car-men and other persons and also for excavating and building reservoirs, wells, tanks and so forth, by donating the tenth part (of the revenue) in his whole dominions, also giving the twentieth part to Aniruddha, to keep up the charitable distribution of food (vv.101-102). The next stanza expresses the hope that the temple of Padmanātha built by the king of that name, may be everlasting.

The following two stanzas (104-105) state that the *praśasti* was composed, by the order of the king, by the poet Maṇikaṇṭha, an eminent Brāhmaṇa of the Bhāradvāja *gōtra,* who was well-versed in Mīmāṁsā and Nyāya, and who took delight in eloquent sayings (*subhāshitasarasvatā*), and that it was written by his friend Yaśōdēva Digambarārka who was a poet in all the languages (*aśēshabhāshāsu kaviḥ*). Then is given the date in vv.107-08 which has been noticed above.

The next two verses (109-10) introduce the king's minister Gaura, who is compared to Vasishṭha and Bṛihaspati. The inscription closes with two stanzas mentioning the artisans Padma, Siṁhavāja and Māhula, who engraved the record and expressing the hope that the letters engraved here may serve the purpose (*yathārtthatā*).

Notes

1. Gōpādri is evidently the city of Gwalior where the inscription was found (*CII.,* VII, pt.3, p.539).

2. Mālava roughly corresponds to the present Mālwā region of Madhya Pradesh (*ibid.*).



No.3
KADMAL PLATES OF GUHILA VIJAYASIMHA
V.S.1140

Location	: Kadmāl, Udaipur District, Rajasthan
Date	: V.S. 1140 = 1083 A.D.
Script	: Nāgarī
Language	: Sanskrit
King	: Vijayasiṁha
Dynasty	: Guhilas of Mēdapāṭa
Reference	: Vyas, A.K., *EI.,* XXXI, pp.237-248

Text

Metre: Vv. 1, 5-9, 11-12 *Anushṭubh;* 2 *Āryā;* 3-4 *Vasanta-tilakā;* 10 *Śārdūlavikrīḍita*

ओं माली ।

निलीयते जगद्यस्मिञ्जातं यस्माच्च येन वै ।

पाल्यते श्र्येकलिंगं हि शिवं भक्त्या नमाम्यहम् ॥ १ ॥

ओं नमः शिवाय ।

आनंदपुरविनिर्गतविप्रकुलानंदनो महीदेवः ।

जयति श्रीगुहदत्तः प्रभवः श्रीगुहिलवंशस्य न ॥ २ ॥

एकत्र योजयति भोजमहेन्द्रनाग

शीलापराजितमहेन्द्रभटैर्नृवीरैः ।

जातैर्यथाक्रमसुशोभ्यथ कालभोज

खोम्माणमत्तटनृपैः सह भर्तृपट्टः ॥ ३ ॥

सिंहोभवत्तदनु तस्य सुतोथ जज्ञे

खोम्माण इत्यथ सुतोऽथ महायकोऽभूत्।

खोम्माणमात्मजमवाप स चाथ तस्मा

ल्लोकत्रयैकतिलकोऽजनि भर्तृपट्टः ॥ ४ ॥

राष्ट्रकूटकुलोद्भूता महालक्ष्मीरिति प्रिया।

आसीद्यस्यामभूत्तस्य तनयः श्रीमदल्लटः ॥ ५ ॥

तस्माद्बभूव तनयो महीपाल इति बुधः।

उवाह संज्ञां सोऽन्वर्थां महीपालनकर्म्मणि ॥ ६ ॥

वैरटोजनि नवमो हंसपालोऽतिवीर्यवान्।

अन्यत्रलब्धराज्यस्योमाश्रीभ्यां सेवितः समम् ॥ ७ ॥

ततोप्यासीन्महावीरो वैरिसिंहो महीपतिः।

सहायितसहायेन वैरिकुंजरमुद्वहन् ॥ ८ ॥

अथ तस्य सुतः श्रीमान् सिंहो विजयप्रिष्ठकः ॥ ९ ॥

पूर्वप्रसिद्धसमस्तराजावलीविराजमानपरमभट्टारकमहाराजाधिराजपरमे-
श्वरमंडलीकः श्रीनागह्रदावस्थितः सर्व्वानेवामात्यमन्त्रिपुरोहितादीन् निजमण्डलनिवासिलोकान्। ब्राह्मणोत्तरांश्च बोधयत्यस्तु वः संविदितं यथा- अर्थाः पादरजोपमा गिरिनदीवेगोपमम् यौवन

मायुष्यं जलबिन्दुलोलचपलं फेनोपमं जीवितम्।

धर्म्मं यो न करोति निर्म्मलमतिः स्वर्ग्गार्ग्गलोद्घाटनं

पश्चात्तापहतो जरापरिणतः शोकाग्निना दह्यते ॥ १० ॥

इत्यादिसंसारासारतां विचिन्त्य नलिनीदलगतजललवतरलतरान् प्राणानर्थानाकलय्य कृतानतमौलिना ज्ञातशास्त्रेण श्रीविक्रमनृप-

कालातीतसंवत्सरशतेष्वेकादशसु चत्वारिंशदधिकेष्वाश्विनमासामावास्यायां सूर्य्यस्य ग्रासेऽङ्कतोऽपि संवत् ११४० वर्षे आश्विन वदि १४। अथाद्येह नागह्रदराजधान्यां संजातसूर्य्यग्रहणपर्वणि श्रीएकलिंगदेवसन्निधौ भोजतडागे स्नात्वा शुचिवाससि परिधाय स्वपितॄन् संतर्प्य भगवंतं भवानीपतिं चराचरगुरुं ब्रह्मविष्णुशक्रादिसेवितविश्वंसृष्टिस्थितिसंहृतिहेतुं संसारसागरोत्तारपोतं देवदानवयक्षरक्षःसिद्धविद्याधरादिनुतं महत्या भक्त्या शक्त्या च सुगंधिपुष्पैरभ्यर्च्य पुनःपुनः वैश्वानरं पूजयित्वा होमद्रव्यैः संतर्प्य मातापित्रोरात्मनश्चामितपुण्ययशोभिवृद्ध्यर्थमैहिकमामुष्मिकं च फलमंगीकृत्य सगिरिव्रजविटपः सर्व्वकालसजलः पल्लिग्रामपंचमो विभागः स्वसीमापर्यन्तस्य ग्रामस्य अरघट्टकाष्ठतडागादिसमस्तस्य पंचमो विभागः सर्वादायः तदर्धकरपानीयभागभोगादिसमन्वितो नागह्रदस्थानविनिर्ग्गताय वत्ससगोत्राय पंचप्रवराय माध्यंदिनशाखिने इहैव वास्तव्यपरममान्यवराचार्यसाहीयसुताय श्रीऊणलाचार्यायोपर्यारोपितग्रामपंचमविभाग आचंद्रार्क्कार्ण्णवक्षितिसमकालं यावत् उदकपूर्व्वकं शासनेन प्रदत्तः। इति मत्वा अत्र ग्रामनिवासिभिर्ज्जनैराज्ञाश्रवणविधेयैर्भूत्वा सर्वैरपि पूर्व्वप्रदीयमानमखिलममुष्मै आचार्याय समुपनेतव्यम्। एतदीयपुत्रपौत्राणां सांतानिकानां च भुंजतां भोजयतामस्मद्वंशजैरन्यैरपि भाविभूपालैः परिपंथना प्रतिषेधो वा न कर्त्तव्यः। यथा दानापहारसंबंधिप्राक्तनमहर्षिप्रणीतानि स्मृतिवचनान्यनेकशः श्रूयंते। तानि यथा।

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः।

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥ ११ ॥

सुवर्णमेकं गामेकां भूमेरप्येकमंगुलम्।

हरंतो हारयंतश्च दहंत्यासप्तमं कुलम्॥ १२ ॥

इत्यादिस्मृतिवाक्यान्यवगम्यास्मत्प्रदत्तब्रह्मदायोयं सर्व्वथा पालनीयः।

इति लिखितमिदं शासनं पंचकुलिकपंडितऊहिलसुतेन नागपालेन इति।

दूतकोऽत्र चाहमानराजपुत्रसगंडासुतधारणधवलः।

इति महाराजाधिराराजश्रीविजयसिंहस्य ॥

Summary

This inscription, written on a set of two copper-plates, consists 40 lines of writing exceuted by an ignorant engraver. Without knowing the signs of different letters that were written or the sense they were intended to convey, the blind engravement done by the engraver has rendered the record perfectly illegible. This inscription is composed in a mixture of verse and prose. There are in all 12 stanzas including a renunciatory verse and two imprecatory verses, the last three interspersed with the prose portion beginning from the latter half of line 12. The inscription records the grant made by the king Vijayasiṁha, of certain part of the produce of a village, to a Brāhmaṇa.

The inscription opens with *Ōṁ svasti* which is followed by an invocatory verse in praise of Śrī-Ēkaliṅga, the guardian deity of the ruling dynasty of Udaipur. Then obeisance is again paid to Śiva in the passage *Ōṁ namaḥ Śivāya* occurring in between vv.1and 2.

Then follows the genealogical portion in vv.2-9. Verse 2 introduces Guhadatta, the founder of the Guhila family. He is called a *mahī-dēva* (a ruling prince of the Kshatriya stock) and praised as the delighter of a Brāhmaṇa family emigrated from Ānandapura. The next verse (3) merely mentions in chronological order princes Bhōja, Mahēndra (I), Nāga, Śīla, Aparājita, Mahēndra-(II), Kālabhōja, Khōmmāṇa (I), Mattaṭa and Bhartṛipaṭṭa-(I). Śila or Śīlāditya and Aparājita of these princes are known from their inscriptions. Verse 4 continues the list of princes. Bhartṛipaṭṭa (I)'s son was Siṁha. His son was Khōmmāṇa (II), after whom came Mahāyaka. His son was Khommāṇa (III) from whom sprang Bhartṛipaṭṭa (II). The relation of each succeeding prince with his immediate predecessor is given in this stanza. Only Siṁha of this continued list of princes has been referred to in an inscription. Verse 5 informs that Mahālakshmī, born in the Rāshṭrakūṭa family, was the consort of Bhartṛipaṭṭa II and gave birth to his son Allaṭa.

From Allaṭa sprang his son Mahīpāla (v.6). Thereafter the ninth prince was Vairaṭa who had obtained rulership elsewhere.[1] His son was Haṁsapāla (v.7). From Haṁsapāla sprang the prince Vairisiṁha (v.8). His son was the illustrious Vijayasiṁha (half v.9). Vairisiṁha is here stated to have snatched away his enemy's elephant with the help of those who received assistance from him in the past (*sahāyita-sahāyēna*).[2]

The prose portion beginning from the latter half of line 12 states that *Paramabhaṭṭāraka Mahārājādhirāja Paramēśvara Maṇḍalīka* Vijayasiṁha, stationed at Nāgahrada, addressed an order to his *Amātya, Mantri,*

Purōhita, Brāhmaṇas and others regarding the grant made by him by means of the present charter. Then follows a renunciatory stanza (v.10) which describes the worthlessness of riches, fleetness of youth and transience of human existence, and states that one who fails to do pious deeds that can lead to the heaven will have to repent at the fag end of his life and be burnt by the fire of sorrow.

The prose portion that follows informs that the king, having considered the worthlessness of the worldly existence, made a grant on the 14th day of the darkhalf of the month of Āśvina in Vikrama Saṁvat 1140 (corresponding to 13th October 1083 A.D.) on the occasion of a solar eclipse for the enhancement of the spiritual welfare of himself and his parents. This grant consisted of the fifth part of the produce of the village of Pallī,[3] embracing all its receipts, given to Ūṇalāchārya, son of *āchārya* Sāhīya who was a resident of Nāgahrada[4] but whose son had since migrated elsewhere, probably to Pallī. He belonged to the Mādhyandina school and the Vatsa *gōtra* and had five *pravaras.* The donee was given full right over the fifth part of every item of the produce of the donated village to the extent of its boundaries, with the exception of taxes and drainage, in which he received only half (*i.e.,*) one-tenth part.

The gift was made at and issued from Nāgahrada *i.e.,* Nāgdā, the donor's capital city. The religious rites connected with this donation were performed somewhere near the temple of the god Ēkaliṅga after the donor had bathed in the Bhōja-taḍāga and worshipped his tutelary deity.

Then follow the usual admonition addressed to the residents of the donated village to obey the donee and pay him all dues and the exhortation to the future rulers not to hinder the enjoyment of the grant by the desendants of the donee. After this there are two imprecatory verses.

At this juncture the donor appeals, again, that his grant made to the Brāhmaṇa may be protected by all efforts.

The scribe who wrote the grant on the copper-sheets was Nāgapāla, the son of *Paṇḍita* Ūhila, belonging to the Pañchakulika (*mod. Pañchōlī*) caste which forms a sub-division of the Kāyastha community. The *dūtaka* of this charter was Raṇadhavala, son of Sagaṁḍā who was a Chāhamāna *Rājaputra.* The record concludes with the sign-manual of Vijayasiṁha, the donor. It is represented by a small spear-head[5] to left, at the extreme end of the last line.

Notes

1. It is stated that Vairaṭa was a descendant of the branch of Allaṭa's family, of which Mahīpāla, the younger brother of Naravāhana, was the head, and that he was required for some unknown reason to succeed Yōgarāja of the main line, whose progeny had been deprived of accession to the throne (*E.I.,* XXXI, p.241).

2. Hostility prevailed, during this period of history, between the Guhilas of Mēdapāṭa and the Paramāras of Mālwā, to which the incident briefly narrated here may have some reference (*ibid.*).

3. Pallī is evidently the same as the modern town of Pālī in Rājasthan (*ibid.,* p.244).

4. Nāgahrada is stated to be identical with Nāgdā near Ēkliṅgjī, which was the first capital of the Guhilas of Mēdapāṭa (*ibid.*).

5. This tiny spear-head mark, having been developed in course of time, assumed the shape of a complete spear later on,as found on copper-plate grants of the 17[th] and following centuries issued by the Mahārāṇās of Udaipur (*ibid.*).



No.4

MIRAJ PLATES OF JAYASIMHA II: A.D.1024

Location	: Miraj, Sangli District, Maharashtra
Date	: Śaka 946 = 1024 A.D.
Script	: Nāgarī
Language	: Sanskrit
King	: Jayasiṁha II
Dynasty	: Chālukyas of Kalyāṇa
Reference	: L.D. Barnett, *EI.*, XII, pp.303-314

Metre: Vv. 1, 17-22, 32, 33, 44-49 *Anushṭubh;* 2, 4, 10, 11, 25, 43 *Mālinī;* 3, 24 *Āryāgīti;* 5, 7, 14, 28, 42, 51 *Vasantatilakā;* 6, 27, 29, 37 *Śārdūlavikrīḍita;* 8, 9, 23, 26, 30 *Ārya;* 12, 13 *Mandākrāntā;* 15 *Drutavilaṁbita;* 16, 31, 34, 35, 38-40 *Upajāti;* 36, 41 *Upēndravajra;* 50 *Śālinī*

Text

ओं स्वस्ति ॥

जयत्याविष्कृतं विष्णोर्व्वाराहं क्षोभिताण्र्णवम् ।


दक्षिणोन्नतदंष्ट्राग्रविश्रान्तभुवनं वपुः ॥ १ ॥

श्रियमुपहरताद्वः श्रीपतिः क्रोडरूपो

विकटविशददंष्ट्राप्रान्तविश्रान्तिभाजम् ।

S.No. 2 -Inscription No. 4

Miraj Plates of Jayasimha II; A.D.1024



अवहददयदंष्ट्राकृष्टविस्पष्टकांड

प्रतनुविसजटाग्रग्रंथिवद्यो धरित्रीम् ॥ २ ॥

करिमकरमकरिकांकितजलनिधिरशनां वशीकरोत्ववनिवधूम् ।

जगदेकमल्लभूपतिरकलंकयशोंवुराशिवलयितभुवनः ॥ ३ ॥

स्वस्ति समस्तभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतिपुत्राणां कौशि-कीवरप्रसादलब्धश्वेतातपत्रादिराज्यचिह्नानां सप्तमातृकापरिरक्षितानां कार्त्तिकेयवरप्रसादलब्धमयूरपिच्छकुंतध्वजानां भगवन्नारायणप्रसादा-सादितवरवराहलांछनेक्षणक्षणवशीकृताराातिराजमंडलानां समस्तभुवना-श्रयसर्व्वलोकाश्रयविष्णुवर्द्धनविजयादित्यादिविशेषनाम्नां राजरत्नाना-मुद्भवभूमिः ।

वृत्तम् ॥

कवलितनललक्ष्मीर्दुर्ज्जयौर्जित्यहारी

विहतपृथुकडंवाडंवरो मौर्य्यनिर्जित् ।

निजभुजबलभून्नोत्पाटयत्राष्ट्रकूटा

न्विलितकलचुरिश्रीरस्ति चालुक्यवंशः ॥ ४ ॥

तज्जेषु राज्यमनुपाल्य गतेषु राज

स्वेकान्नषष्टिगणनेषु पुराध्ययोध्यम् ।

तद्वंशजास्तदनु षोडश भूमिपालाः

क्ष्मां दक्षिणापथजुषम् विभरांवभूवुः ॥ ५ ॥

दुष्टावष्टवधायां च कतिपयपुरुषांतरांतरितायां चालुक्यकुलसंपदि भूयश्चालुक्यवंश्य एव ॥

वृत्तम् ॥

कन्दः कीर्त्तिलतांकुरस्य कमलं लक्षीविलासास्पदं ।

वज्रं वैरिमहीभृतां प्रतिनिधिर्देवस्य दैत्यद्रुहः ।

राजासीज्जयसिंहवल्लभ इति ख्यातश्चरित्रैर्निजै

र्यो रेजे चिरमादिराजचरितोत्कण्ठाः प्रजानां हरन् ॥ ६ ॥

यो राष्ट्रकूटकुलमिंद्र इति प्रसिद्धं

कृष्णाह्वयस्य सुतमष्टशतेभसैन्यम् ।

निर्ज्जित्य दग्धनृपपंचशतो वभार

भूयश्चलुक्यकुलवल्लभराजलक्ष्मीम् ॥ ७ ॥

चटुलरिपुतुरगपटुभटकरटिघटाकोटिघटितरणरागः ।

सुकृतहरचरणरागस्तनयोभूत्तस्य रणरागः ॥ ८ ॥

तत्तनयः पुलकेशी केशिनिषूदनसमोभवद्राजा ।

वातापिपुरीवरपतिरकलितखलकलिकलंककलः ॥ ९ ॥

वयमपि पुलकेशीक्ष्मापतिं वर्ण्णयन्तः

पुलककलितदेहाःपश्यताद्यापि संतः ।

स हि तुरुगगजेंद्रग्रामसारं सहस्र

द्वयपरिमितमृत्विक्साच्चकाराश्वमेधे ॥ १० ॥

तत्तनयः ।

नलनिलयविलोपी मौर्यनिर्याणहेतुः

प्रथितपृथुकडंवस्तंभभेदी कुठारः ।

भुवनभवनभागापूरणारंभभारे

व्यवसितसितकीर्त्तिः कीर्त्तिवर्मा नृपोभूत् ॥ ११ ॥

तदनुतस्यानुजः ॥

सर्व्वद्वीपाक्रमणमहसो यस्य नौसेतुवन्धै

रुल्लंघ्याब्धिं व्यधित पृतना रेवतीद्वीपलोपम् ।

राज्यश्रीणां हठपतिरभूद्यश्च कालच्चुरीणां

वभ्रेभूमिं सह स सकलैर्मंगलैर्मंगलीशः ॥ १२ ॥

ज्येष्ठभ्रातुः सति सुतवरेप्यर्व्भकत्वादशक्ते

यस्मिन्नात्मन्यकृत हि धुरं मंगलीशः पृथिव्याः ।

तस्मिन्प्रत्यार्प्पिपदथ महीं यूनि सत्याश्रयेसौ

चालुक्यानां क इव हि पथो धर्म्यतः प्रच्यवेत ॥ १३ ॥

जेतुर्द्दिशां विजितहर्षमहानृपस्य

दातुर्मनोरथशताधिकमर्थयद्भ्यः ।

सत्यादिसर्व्वगुणरत्नगणाकरस्य

सत्याश्रयत्वमुपलक्षणमेव यस्य ॥ १४ ॥

अडमरीकृतदिग्वलयोर्द्दितद्विडमरीपरिगीतमहायशाः ।

भिदमरिष्टकृतं मनसोद्वहन्नेडमरिक्षितिपोजनि तत्सुतः ॥ १५ ॥

सुतस्तदीयो गुणरत्नमाली भूवल्लभोभूद्भुजवीर्यशाली ।

आदित्यवर्म्मार्जितपुण्यकर्मा तेजोभिरादित्यसमानधर्मा ॥ १६ ॥

तत्सुतो विक्रमादित्यो विक्रमाक्रान्तभूतलः ।

ततोऽपि युद्धमल्लाख्यो युद्धे यमसमो नृपः ॥ १७ ॥

तज्जन्मा विजयादित्यो वीरानेकांगसंगरे ।

चतुर्ण्णां मंडलानामप्यजयद्विजयोपमः ॥ १८ ॥

तद्भवो विक्रमादित्यः कीर्त्तिवर्मा तदात्मजः ।

येन चालुक्यराज्यश्रीरन्तरायिण्यभूद्भुवि ॥ १९ ॥

विक्रमादित्यभूपालभ्राता भीमपराक्रमः ।

तत्सूनुः कीर्त्तिवर्माभून्मृत्प्रासार्द्दितदुर्ज्जनः ॥ २० ॥

तैलभूपस्ततो जातो विक्रमादित्यभूपतिः ।

तत्सूनुरभवत्तस्माद्भीमराजोऽरिभीकरः ॥ २१ ॥

अय्यणार्यस्ततो जज्ञे यद्वंशस्य श्रियं स्वकां ।

प्रापयन्निव वंशं स्वं स वव्रे कृष्णनंदनाम् ॥ २२ ॥

अभवत्तयोस्तनूजो विजयविभासी विरोधिविध्वंसी ।

तेजोविजितादित्यः सत्यधनो विक्रमादित्यः ॥ २३ ॥

चेदीशवंशतिलकां लक्ष्मणराजस्य नंदनां नुतशीलाम् ।

वोंथादेवीं विधिवत्परिणिन्ये विक्रमादित्यः ॥ २४ ॥

सुतमिव वसुदेवाद्देवकी वासुदेवं

गुहमिव गिरिजामिर्द्देवमर्द्धेंदुमौलेः ।

अजनयदथ वोंथादेव्यतस्तैलभूपं

विभवविजितशक्रं विक्रमादित्यनाम्नः ॥ २५ ॥

अरिकुंभिकुंभभेदनरिपुदुर्ग्गकवाटभंजनप्रभृतिः ।

सहजवलस्य हरेरिव वालक्रीडाभवद्यस्य ॥ २६ ॥

किं च राष्ट्रकूटकुलराज्यसंभवौ ॥

और्जित्याच्चरणाविव प्रचलितौ साक्षात्कलेः क्रामतः

क्रूरौ वद्धशरीरकौ गुरुजनद्रोहप्ररोहाविव ।

कालात्खंडितराष्ट्रकूटककुलश्रीवल्लिजातांकुरौ

लूनौ येन सुखेन कर्क्कररणस्तंभौ रणप्रांगणे ॥ २७ ॥

इत्थं पुरादितिसुतैरिव भूतधात्रीं

यो राष्ट्रकूटकुटिलैर्ग्गमितामधस्तात् ।

उद्धृत्य माधव इवादिवराहरूपो

वब्रे चलुक्यकुलवल्लभराजलक्ष्मीम् ॥ २८ ॥

ह्रूणप्राणहरप्रतापदहनो यात्रात्रसन्मारव

श्चैद्यच्छेद्यखिलक्षमाजयनयन्युत्पं नधीरुत्पलः ।

येनात्युग्ररणाग्रदर्शितवलप्राचुर्यशौर्योदयः

कारागारनिवेशितः कविवृषा यं वर्ण्णयन्घूर्ण्णते ॥ २९ ॥

भम्महरट्टादभवद्भूपालाद्राष्ट्रकूटकुलतिलकात् ।

लक्ष्मीरिव सलिलनिधेः श्रीजाकव्वाह्वया कन्या ॥ ३० ॥

चालुक्यवंशांवरभानुमाली

श्रीतैलभूपाल उपायतैनाम् ।

तयोश्च लोकाभ्युदयाय योग

स्सचंद्रिकाचंद्रमसोरिवासीत् ॥ ३१ ॥

श्रीतैलभूमिपालाच्छ्रीजाकव्वा समजीजनत् ।

श्रीमत्सत्याश्रयं स्कन्दमंबिका त्र्यंबकादिव ॥ ३२ ॥

विद्विषद्गोत्रवित्रासी देवो विवुधसम्म्तः ।

दिवीव भुवि यो धत्ते सर्व्ववर्ण्णधरं धनुः ॥ ३३ ॥

अपि च ॥

यस्य प्रतापज्वलनेन दग्धः प्ररोहतीवारिगणस्यवंशः ।

वालैःप्ररूढांकुरजालकल्पैर्द्दिशां विजेतुःपथि सन्निविष्टैः ॥ ३४ ॥

तस्यानुजः श्रीदशवर्म्मनामा तद्वल्लभा भाग्यवतीति देवी ।

तयोरभूद्विक्रमशीलशाली श्रीविक्रमादित्यनृपस्तनूजः ॥ ३५ ॥

असौ निजज्येष्ठपितुःपरोक्षं वभार वाराशिवृतां धरित्रीम् ।

भुजेन केयूरलतामिवोच्चैर्व्विदारितारातिकदंवकेन ॥ ३६ ॥

ज्योत्स्नेवाच्छसुनिर्मला निशि सरस्तीरेषु हंसाकृतिः

काशस्तोमसमा सरित्सु गगने गौराभ्रवृंदद्युतिः ।

कीर्त्तिर्यस्य तदुद्यमोचितशरच्चिह्नायमाना रिपू

न्नित्यं भाययतीत्थमन्यसमयेऽप्यामासविद्वेषिणी ॥ ३७ ॥

वर्ण्णाश्रमाणां स्थितये स्थितोऽपि यश्चाकरोद्वर्ण्णविशेषहानिम् ।

स्वकीर्त्तिभिर्व्याप्तदिगंवुराशिस्तथाऽपि लोके महनीय एव ॥ ३८ ॥

त्यागादयो यस्य गुणाःप्रसिद्धास्संख्यामतिक्रम्य सदा प्रवृत्ताः ।

यैस्सज्जनानां हृदयानि वद्ध्वा समाचकर्ष स्वसमीपदेशम् ॥ ३९ ॥

तदनु तस्यानुजः ॥

यस्याखिलव्यापि यशोवदातमकाण्डदुग्धांबुधिवृद्धिशंकाम् ।

करोति मुग्धामरसुंदरीणामभूत्सभूपो जगदेकमल्लः ॥ ४० ॥

सदावनस्थःपटुविक्रमाढ्यो मदान्धगन्धेभघटाविपाटी ।

धरोर्जितप्रस्फुरितप्रभावो रराज योऽसौ जयसिंहराजः ॥ ४१ ॥

यत्र प्रसीददति समस्त जगच्छरण्ये
न्यक्क्कुरन्तकमपि क्षितिपास्सकोपम्।
यस्मान्मनोरथपथातिगमर्थमर्थी
संप्राप्य संस्मरति न स्म सुरद्रुमाणाम्॥ ४२॥
अगमदखिलधात्री येन राजन्वतीत्वं
निवसति नृपलक्ष्मीर्यस्य शुभ्रातपत्रे।
स सकलनमितारिक्षोणिभृन्मौलि रत्न
द्युतिशवलितपादो गण्डरोल्गण्डभूपः॥ ४३॥
अदोषाकरसंगोपि विनापि मखदूषणम्।
सद्भूतिभूषणो यश्च संप्राप जगदीशताम्॥ ४४॥

स तु श्रीपृथ्वीवल्लभमहाराजाधिराजपरमेश्वरपरमभट्टारकसत्याश्रयकुल-तिलकसमस्तभुवनाश्रयचालुक्याभरणश्रीमज्जगदेकमल्लदेवः। श्रीमद्वल्लभ-नरेंद्रदेवः॥ कुशली सर्व्वानेव यथासंवद्ध्यमानकान्राष्ट्रपतिविषयपति-ग्रामकूटकायुक्तकनियुक्तकाधिकारिकमहत्तरादीन्समादिशत्यस्तु वः संविदितं यथास्माभिश्शकनृपकालातीतसंवत्सरशतेषु नवसु षट् चत्वारिंशदधिकेषु अंकतः संवत् ९४६ रक्ताक्षिसंवत्सरांतर्गतवैशाख-पौर्ण्णमास्यामादित्यवारे पंचद्रमिलाधिपतिं वलवंतं चोलं निर्द्धाट्य सप्तकोंकणाधीश्वराणां सर्व्वस्वं गृहीत्वा उत्तरदिग्विजयार्थं कोल्लापुर-समीपसमावासितनिजविजयस्कन्धावारे पगलटिविषयांतःपातिमुदुनीर-ग्रामजाताय कौशिकगोत्राय बह्वृचशाखाय ब्रह्मचारिणे श्रीधरभट्टपौत्राय रेवणार्यभट्टपुत्राय वासुदेवार्यशर्म्मणे यजनयाजनादिषट्कर्म्मनिरताय

वेदवेदांगपारगाय एडदोरेद्विसहस्रान्तःपातिकरटिकल्लुत्रिशतमध्ये माडदूझूरुनामग्रामः सधान्यहिरण्यादेयः निधिनिधानसमेतः राजकीया-नामनंगुलिप्रेक्षणीयः सशुल्कः सर्व्वकरवाधापरिहारो सर्व्वनमस्योग्रहारो दत्तः ॥ तस्य चाघाटाः पूर्व्वतः जालिहाडुनामग्रामः दक्षिणतः उणहल्लि-नामग्रामः पश्चिमतः वव्वुलिखेटनामग्रामः उत्तरतः गोवन्तिनामग्रामः एतेषां चतुर्ण्णां ग्रामाणां मध्ये पूर्व्वप्रसिद्धस्वकीयसीमासहित-श्चतुराघाटविशुद्धः स युष्माभिरागामिभिरस्मद्वंश्यैरन्यैश्च भूमिपालैः-पालनीयः ॥ तथा चोक्तं भगवता वेदव्यासेन व्यासेन ॥

बहुभिर्व्वसुधा दत्ता राजभिस्सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ ४५ ॥

अपहरणेऽपि च दोषस्तैनैवोक्तः ॥

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।
षष्टिं वर्ष सहस्राणि विष्ठायां जायते कृमिः ॥ ४६ ॥

विंध्याटवीष्वतोयासु शुष्ककोटरशायिनः ।
कृष्णसर्प्पा हि जायन्ते ब्रह्मदेयापहारकाः ॥ ४७ ॥

सुवर्ण्णमेकंगामेकां भूमेरप्येकमंगुलम् ।
हरन्नरकमाप्नोति यावदाभूतसंप्लवम् ॥ ४८ ॥

अन्यायेन हृता भूमिरन्यायेन तु हारिता ।
हरतो हारयतश्च दहत्यासप्तमं कुलम् ॥ ४९ ॥

रामभद्रेणाप्युक्तं ॥

सामान्योयं धर्म्मसेतुर्नृपाणां

काले काले पालनीयो भवद्भिः ।

सर्व्वानेतान्भाविनः पार्थिवेन्द्रान्

भूयो भूयो याचते रामभद्रः ॥ ५० ॥

मद्वंशजाः परमहीपतिवंशजा वा

पापादपेतमनसो भुवि भाविभूपाः ।

ये पालयंति मम धर्म्मीमिमं समस्तं

तेभ्यो मया विरचितोऽंजलिरेष मूर्ध्नि ॥ ५१ ॥

श्रीमद्राजाधिराजराजचूडामणेः श्रीमज्जयसिंहदेवस्य दत्तिः ॥

शासनाधिकारिमहाप्रचंडदंडनायकश्रीमत्प्रोलार्यप्रतिबद्धलेखकमाइपय्येन

लिखितम् ॥ मंगलं महती श्री श्री श्री ॥

Summary

This inscription, engraved on a set of 3 copper-plates strung on a ring having a seal with the representation of a boar, the crest of the Chālukyas, consists 84 lines of well-shaped, well-executed and well-preserved writing. The text of this record is a mixture of prose and verse and composed in a classical poetic style. There are 51 verses in all including 7 imprecatory stanzas in this inscription. It records a grant of a village to a Brāhmaṇa by the Chālukya king Jayasiṁha II of Kalyāṇa. Its first part (ll.1-61) is the well-known poem narrating the pedigree of the Western Chālukya kings, which is here carried down as far as the reign of Jagadēkamalla-Jayasiṁha II. The second part (l.61 to the end) is a deed of gift of the village as already mentioned.

The record opens with the usual Chālukyan prelude, *Jayaty=avishkṛitaṁ, etc.,* invoking the Varāha incarnation of Vishṇu, and then, after another verse, also

mentioning the same form of Vishṇu under the name Krōḍa, invokes a blessing upon the reigning sovereign. Then begins the pedigree of the Chālukya kings. As a preamble to the enumeration of the princes the family itself is introduced elaborately in prose (ll.4-8). This passage has been adopted from the Bādāmi Chālukyan grants. However, the names of Vishṇuvardhana and Vijayāditya are added here as excellent rulers (*rāja-ratna*). Verse 4 describes this family as the conqueror of the Nala, Kadamba, Maurya, Rāshṭrakūṭa and Kalachuri rulers.

59 sovereigns of this family, we are told, ruled formerly in Ayōdhyā, and later 16 of them ruled in the South (v.5). After a temporary obscuration their fortunes were restored by Jayasiṁha I, who overcame the Rāshṭrakūṭa king Indra, son of Krishṇa, and slew 500 other kings (vv.6-7). Then came his son Raṇarāga (v.8); his son Pulakēśin I, the performer of the Aśvamēdha sacrifice (vv.9-10); his son Kīrtivarman I, the conqueror of Nalas, Kadambas and Mauryas (v.11); his younger brother Maṅgalīśa, who captured the island of Rēvatī and humbled the Kalachuri dynasty, reigning as regent during the childhood of his elder brother's son (vv.12-13); and then the latter, Satyāśraya I (in other inscriptions styled Pulakēśin II), who conquered king Harsha, *i.e* Harshavardhana of Kanauj (v.14). We are then informed that the next two monarchs were Satyāśraya's son Neḍamari and the latter's son Ādityavarman (vv.15-16). The pedigree then enumerates Vikramāditya I, here called the son of Ādityavarman and the former's son Yuddhamalla (v.17); his son Vijayāditya, the conqueror of four princes (v.18); his son Vikramāditya II; his son Kīrttivarman II, under whom the star of the dynasty suffered an eclipse (v.19); a brother of Vikramāditya II, whose name is not given, but was possibly Bhīma; the latter's son Kīrttivarman III (v.20); his son Taila I; his son Vikramāditya III; his son Bhīma II (v.21); his son Ayyaṇa

(I), who married a daughter of Rāshṭrakūṭa Kṛishṇa III (v.22); their son Vikramāditya IV, who married Bonthādēvī, daughter of king Lakshmaṇa of Chēdi (vv.23-24); their son Taila II, who conquered the Rāshṭrakūṭas Karkara and Raṇastambha, restored the fortunes of his dynasty, defeated Utpala and took him prisoner, and married Jākabbā, daughter of Raṭṭa Bhammaha (vv.25-31); their son Satyāśraya II (v.32); his younger brother Dēvaśarman who married Bhāgyavatī; their son Vikramāditya V, who reigned after his father's elder brother (vv.35-36); Vikramāditya V's younger brother Jayasiṁha II, stlyed Jagadēkamalla, the donor of the present grant (vv.40-41), whose conventional praise in vv.42-44 contain no historical information.

After this, the prose passage commencing from the latter half of line 61 formally introduces the donor king Jayasiṁha II. He is given the titles *Pṛithvīvallabha, Mahārājādhirāja, Paramēśvara* and *Paramabhaṭṭāraka* and styled *Satyāśrayakulatilaka, Samastabhuvanāśraya, Chālukyābharaṇa, Jagadēkamalla* and *Vallabhanarēndra.*

Then follows the royal command addressed to the concerned *Rāshṭrapati, Vishayapati, Grāmakūṭaka, Āyuktaka, Niyuktaka, Ādhikārika, Mahattara, etc.* It states that on Sunday, the full-moon day of Vaiśākha in the cyclic year Raktākshi, when the Śaka year 946 had elapsed, the king, having defeated the Chōla ruler, the sovereign of the Five Dravidian Realm, and having taken into his possession the wealth of the Lords of the Seven Koṅkaṇs, while at his victorious camp pitched in the neighbourhood of Kollāpura[1] with a view to a northern expedition, granted the village of Māḍadūjhūru in the three-hundred of Karaṭikallu[2] situated within the two thousand of Eḍadore,[3] with income in the form of grain and gold, with treasures, not to be pointed at with finger (for hypothecation) by royal officers, with its tolls, with exemption from all taxes and as a rent-free holding.

The donee of the grant was Vāsudēvārya Śarman, born in the village of Mudunīra[4] in the Pagalaṭi[5]-*vishaya*, a member of the Kauśika-*gōtra* and the Bahvṛicha-*śākhā*, a grandson of Śrīdhara Bhaṭṭa and son of Rēvaṇārya Bhaṭṭa, a person devoted to the six-fold duties enjoined on a Brāhmaṇa, and master of the Vēdas and their ancillary sciences.

The village gifted was bounded on the east by the village Jālihāḍu; on the south by the village Uṇahalli; on the west by the village Vavvulikhēṭa; and on the north by the village Govanti. Here the donor exhorts the future kings to protect his grant.

Then there are seven customary benedictory and imprecatory stanzas followed by the statement that this is the garnt of the king Jayasiṁha II and that it was written by Māipayya, a scribe attached to Prōlārya, officer in charge of grants (*śāsanādhikārī*) and general of forces (*daṁḍanāyaka*). The record concludes with auspicious words.

Notes

1. Kollāpura is modern Kolhāpūr, a District headquarters in Maharashtra (*EI.*, XII, p.306).

2. Karaṭikallu, the chief town of Karaṭikallu–300 district, has been identified with present day Karaḍikal in the Raichur District of Karnataka (*ibid.*, p.309).

3. Eḍadore-2000 province was a stretch of country between the rivers Kṛishṇā on the north and Tuṅgabhadrā on the south, and consisted a large part of the present Raichur District of Karnataka (*ibid.*, p.308).

4. Mudunīra, the birth place of the donee has been represented by present day Hire-Mudanūr and Chikka-Mudanūr in the Kalaburgi District of Karnatka (*ibid.*, pp.306-07).

5. Pagalaṭi, the chief town of Pagalaṭi-*vishaya* comprising 300 towns and villages, has been identified with the village Hagaraṭṭagi in the Kalaburgi District of Karnataka (*ibid.*).



No.5
HOTTAL INSCRIPTION OF THE TIME OF CHALUKYA SOMESVARA

Location : Hoṭṭal, Nanded District, Maharashtra

Date : 11th century A.D.

Script : Nāgarī

Language : Sanskrit

King : Sōmēśvara (I or II)

Dynasty : Chālukyas of Kalyāṇa

Reference : Sircar, D.C. and Bhattacharya, G., *EI.*, XXXV, pp. 159-68

Text

Metre: Vv. 1, 2, 4, 10, 12, 13, 15-18, 21, 24, 26, 27, 30, 31, 35-40, 43 *Śārdūlavikrīḍita;* 3, 7, 8, 19, 25 *Sragdharā;* 5, 22, 28, 32 *Vasantatilakā;* 6, 14 *Mandākrāntā;* 9 *Svāgatā;* 11, 23, 42 *Indravajrā;* 20, 29 *Upajāti;* 33, 34, 41 *Anushṭubh*

॥ओं नमः शिवाय ॥

ते वः पांतु पिनाकिनः कतिपये क्रुद्धस्य भालस्थली

जन्मानः किरणावली स्तबकिताकाशाः कृशानोः कणाः ।

येषामेकतमस्य तेजसि जगज्जालं जिगीषो रिपोः

संधानेपि पतंगपातमपतत्पुष्पायुधः सायुधः ॥ १ ॥

कैलासोस्ति समस्तपर्व्वतपतिर्यः संश्रयः श्रेयसां

यं देवाः समुपासते सुरगिरिर्येनाल्पधारः कृतः ।

यस्मै स्वस्ति वदंति सिद्धमुनयः सिद्धेर्निधानं यतः

सीमा यस्य न विद्यते कृतधियां यत्र स्तवो वास्तवः ॥ २ ॥

शृंगैरालिंगितार्कः प्रविततकटकाक्रांतनानादिगंतः

सोस्ति स्वेच्छानिवासस्त्रिदशमृगदृशां मीनकेतोश्च भूमिः ।

प्राप्तुं रत्नाकरत्वं पुनरिव विलसद्रत्न सर्व्वस्वसारे

स्फारे यस्योपकंठे लुठति जलनिधिर्व्वंजराव्याजमेत्य ॥ ३ ॥

बिभ्राणस्य तपोविभूतिमसमामास्ते ह्यगस्त्याख्यया

विख्यातस्य महामुनेः शमवतां सेव्यस्य तत्राश्रमः ।

यस्मिन्यामिकनादवन्मुनिवटुस्वाध्यायपाठध्वनिः

प्रोद्भासी कलिकालतस्करतिरस्काराय सन्नह्यति ॥ ४ ॥

तस्मिन्मुहुः प्रहुतपावकधूमराजि

स्फारीभवद्विटपिपल्लवमेचकौघे ।

पुण्योटजाग्रघटमानमृगे कदाचि

त्तेपेतपांसि स शमैकधनो मुनींद्रः ॥ ५ ॥

उन्मार्गेण प्रसभमवनीवल्लभाः पर्यटंतो

न प्रेक्षंते त्रुटदपि यशः स्वच्छहारप्रकारम् ।

यत्तस्यापि प्रचुरतपसामग्रगण्यस्य पुण्यां

पापाचारास्त्वरितमहरन्होमदां कामधेनुम् ॥ ६ ॥

अंतः संचिंत्य किंचित्तदनु स विरतः शापदानान्मुनींद्रः

सांद्रीभूतं दधानः स्फुरदधररुचा क्रोधवह्नेरिवार्च्चिः ।

प्रत्यर्थ्युत्पातकेतुप्रविभवविलसद्धूम्रधूमानुबद्ध

स्फूर्जज्ज्वालाकलापे हुतभुजि हुतवानाहुतिं हूंविमिश्राम् ॥ ७ ॥

भास्वत्तेजः कलापैरिवपरिघटितस्तारहारानुकारि

प्रत्यग्रब्रह्मसूत्रस्त्रिदशगिरिरिव स्वर्गनद्या सनाथः।

बिभ्राणः स्वर्ण्णतूणायुगलमथ पुमान् कोपि चंडाग्निकुंडा

त्कोदंडाकांडसिंजारवजनितजगद्भीतिराविर्बभूव ॥ ८ ॥

पत्रिभिः स भुवनत्रयवीरस्तान् नृपांश्च सकलान्विनिहत्य ।

होमगामुपनिनाय ततोस्मै मानसिद्धिमिव मूर्त्तिम . . ॥ ९ ॥

दूरोत्सारितकंटकव्यतिकरामेकांगवीरः क्रमा

द्धे . . . णलीलयैव सकलामाक्रम्य लोकत्रयीम् ।

साम्राज्यं विजय . . . भुवने ख्यातः कृशानोः सुतः

शक्रस्यापि सहायतां प्रकटयन्नुत्पाट्य देवद्विषः ॥ १० ॥

सत्यंततोभूदिह तस्य नाम वीरस्य लोके मुनिमानसिद्धिः ।

तस्मात्तृतीयोभवदेष वंशो वैरिप्रतापानलकालमेघः ॥ ११ ॥

वह्नेर्व्वंशमलंचकार शतशः क्रूरासिधाराहति

क्रीडादारितवैरिकुंजरततिः श्रीघोरराजो नृपः ।

यस्याद्यापि हिमाद्रिशंकरगिरिक्षीराम्बुराशिच्छला

दास्ते दिग्वलयेषु पुंजितमिव श्वेतांशुगौरं यशः ॥ १२ ॥

यश्चाच्छिद्य समस्तपार्थिवकुलं प्राणाधिकं तद्यशो

जग्राहोभयचक्रवर्त्तिकटके श्रीमुंजतैलेश्वरे ।

यद्वा . . . . . . रक्षित . . . . . ष्टयन्

गोपालः कटकस्थ . . . . नच्छासनम् ॥ १३ ॥

क्षोणीचक्राक्रमणनिपुणोद्दंडदोर्द्दंड . .

लीला भग्नप्रतिभटनृपप्रेयसीकेलिहासः ।

क्षीराम्भोधेरिव सुमनसामाश्रयः पारिजातो

जातस्तस्माद्यम इव परक्ष्माभृतामुत्तमाख्यः ॥ १४ ॥

तस्माच्छ्रीकलिचोरभूपतिरभूद्दुच्चंडकंठीरव

क्रीडापाटितशत्रुसिंधुरघटः क्ष्मापालमूलंकषः ।

पीतानेकजलाशयैः प्रतिकलं यत्सैन्यपांसूत्करै

र्न्निःशेषः ककुभो मरुत्स्थलभुवां सब्रह्मचारीकृताः ॥ १५ ॥

मूर्त्तो वीररसः समाश्रित इव क्ष्मापालदावानलः

संजातः पृथुदीर्घबाहुपरिघव्यूढोग्गदेवस्ततः ।

चक्रे शत्रुकबंधतांडवविधावुद्दंडमाचार्यकम्

ज्यानादप्रकटीकृतोग्रपटहध्वानैर्यदीयं धनुः ॥ १६ ॥

यत्खड्गः समरांगणे रिपुशिरःश्रेणीः समासादय

न्नस्थिग्रंथिविभेदकः खणदिति ध्वानेन नूनं द्विषाम् ।

भूर्ल्लोकं त्यजत प्रयात च दिवं स्वर्ल्लोकरामाजनैः

संभोगं भजत प्रयच्छत यशो व्याभाषतेति श्रुतौ ॥ १७ ॥

चक्षुर्मुग्धमरीचि वेषविकलः कायो मनो व्याकुलं

भ्रश्यंति स्मृतयः स्खलंति च गिरो नश्यंति सर्वा दिशः ।

यस्मिन्विक्रमभाजि राजनि मिलत्संग्राममभूमौ भृशं

क्व स्थैर्यं क्व भुजौ क्व वीर्यगरिमा क्वात्मा पुनः क्ष्माभृताम् ॥ १८ ॥

गर्ज्जज्जीमूतमूर्त्तिप्रबलरिपुबलाजौ हि भूपेन येन

मायानिर्माणकर्मप्रतिकृतिविकृतानेकनेपथ्यभांजि ।

वैरिप्राणप्रयाणप्रवणनिपुणया खड्गयष्ट्या स्थितेन

प्रेतप्रोतांत्रतंत्रीनिरयविचरितान्याशु रक्षांसि येन ॥ १९ ॥

स्निग्धं स्वकीयं प्रियभाषणं च मनोभिरामे मणिकुंडले च ।

येनैतदाशु द्विषदंगनानामगोचरं श्रोत्रयुगस्य चक्रे ॥ २० ॥

भग्ना भारतभावता विगलितो रामायणोपक्रमः

शीर्ण्णा जीर्ण्णपुराणपद्धतिरितो नाख्यायिकानां गतिः ।

प्रत्याशं प्रतिमंडलं प्रतिपुरं प्रत्यापगं प्रत्यगं

तस्य क्षत्रियपुंगवस्य यशसा त्रैलोक्यमापूरितम् ॥ २१ ॥

अन्यं समानगुणमस्य नृपस्य कंचि

द्द्रष्टुं विकृष्टहृदयेव कुतूहलेन ।

कीर्त्तिः परा प्रथमकेतकरेणुशुभ्रा

लोकत्रयं भ्रमति संततमश्रमैव ॥ २२ ॥

तस्याभवद्व्याकरणं प्रमाणं राज्ये प्रजारंजनतत्परस्य ।

चोरध्वनेर्दारुणकारणस्य अनयत्र चित्रे यदि वा प्रचारः ॥ २३ ॥

भूर्भिद्येत सुरालयोपि शतधा शीर्येत दीर्येतच्च

ब्राह्मांडम् . . मेयुरुग्रकिरणाः शुष्येयुरंभोधयः ।

वाक्सेतुर्न हि भिद्यते पु . . . . प्यस्ति च

अगर्गाख्यस्य महीपतेः पुनरितः सत्यायते विक्रमः ॥ २४ ॥

पूज्यानां प . रीशः सुभटपरिषदामर्थिनां क . .

. . . मस्य सूनुः परयुवतिजनस्यार्त्तविप्रस्य तातः ।

स .... योयं हरचरणरजोराजिरज्यच्छरीरो

यो जातोत्साह युक्तः प्रसभमरिबलं चैकविरः पिनष्टि ॥ २५ ॥

राज्यं निःश्रितकंटकं प्रतिभटैः शून्याश्चतस्रो दिशः

शांतः सुस्थसुखी च नंदति जनो निर्द्वंद्वमुर्व्वीतलम् ।

सर्व्वस्यापि परीप्सितं तदभवद्राज्यं प्रजारंजितं

भूभर्त्तुः कलिचोरकस्य सकलक्ष्मापालचूडामणेः ॥ २६ ॥

विंशद्ग्रामशतीपतिः कथमयं वीरो विधिप्रक्रमैः

शक्यो वर्ण्णयितुं प्रयत्नपठितैर्द्वित्राक्षरैर्मादृशैः ।

देवः पद्मगुहामहागृहपतिस्तुत्योत्र सूत्रक्रिया

पूर्व्वाचार्यधुरं बिभर्त्ति भगवान् यद्येष मृष्यामहे ॥ २७ ॥

वंशे विशां विशदकीर्त्तिमतां बभूव

श्रीसिद्धगिर्न्नरपतेरिह तस्य मित्रम् ।

कामो मधोरिव यथा जलधेश्च चंद्रः

वायोः शिखीव हि यथा शिखिनां पयोदः ॥ २८ ॥

निक्षिप्तमंभोजभवेन लक्ष्म्याः सर्वस्वमस्मिन्निति तर्कयामि ।

कुतोस्य वा राजपरंपरेयमास्ते निविष्टा सदनोपकंठे ॥ २९ ॥

स्वर्लोकादपि दंदशूकभवनादासप्तसिंधूल्लसद्

वेलातीरतरंगिताद्धि भवनादन्विष्य भूमंडलात् ।

एकैकं गुरुचारुसारचरितं लोकप्रबोधास्पदं

धात्रा पात्रमिदं विचित्रविभवैः श्रीसिद्धगिर्निर्मितः ॥ ३० ॥

किं नागार्जुन एष कर्ण्णनृपतिः किं वावतीर्ण्णो भुवि

किं वा विक्रमभूपतिः शिबिरयं किं वाथ वैरोचनिः।

इत्थं भ्रान्तिमयं जनस्य जनयन्नज्ञायते तेषु कः

श्रीमत्सिद्धुगिरित्यगात्पुनरसौ ख्यातिं जने सांप्रतम्॥ ३१॥

श्रीसिद्धुगेर्हि यशसा विजितो बिभर्त्ति

कालुष्यमंतरिदमिंदुरतः सदैव।

ज्योत्स्नापटेन पृथुना स्वमसौ पिधाय

रात्रौ परं प्रचरति त्रपयेव गुप्तः॥ ३२॥

तेन संस्थापितः स्थाणुः कल्याणे गुणिनां गृहे।

पुरे चालुक्यचंद्रस्य सोमेश्वरमहीपतेः॥ ३३॥

निष्कं द्रम्मं च भूमीशो ग्रामे ग्रामे पुरे पुरे।

ददौ तस्मै स देउआय चंद्रराशिगुरोः पुरः॥ ३४॥

यावत्पावकसंततिर्विजयिनी देवश्च सिद्धेश्वरो

यावत्सिद्धुगिनिर्मितो विजयते कल्पान् सहस्रं क्षितौ।

तावद्ग्रामसहस्रकेपि विहितो द्रम्मः सनिष्कः सदा

श्रीरैभेयमहीभुजा मृगमदामोदेन कृत्वा शिलाम्॥ ३५॥

पृथ्वीतीर्थपुराग्रहारनगरग्रामैरशून्योदरा

यावन्नंघत नंदति क्रमहरं चक्रं च भूमीभुजाम्।

श्रीसिद्धेश्वरदैवताय विषये श्रीयेर्गधात्रीपतिः

प्रत्याशं प्रतिमंडलं प्रतिपुरं द्रम्मं च निष्कं ददौ॥ ३६॥

राका कृत्तिकया युता किमपरं मासो यदा कार्त्तिकः

भानुर्मध्यदिनं गतो गुरुमठे रेभेश्वरे तिष्ठता।

श्रेष्ठं श्रेष्ठिनिवेदितां शुभकथां भूपेन संशृण्वता

श्रीसिद्धेश्वरपूजनाय विहितं भक्त्या शिलाशासनम् ॥ ३७ ॥

यन्नारायणबाणरावणमुखा जीर्ण्णा दधीचादयः

श्रूयंते शिवशासनैकनिरता मान्याश्च धन्याश्च ते ।

तेषां त्वं निगलंकमल्ल चरमः काले कलौ संप्रति

श्रीचंडीश्वरपादपंकजरजोधूलीभिरापांसुलः ॥ ३८ ॥

किंवान्यः स महेशपादपतनप्रोद्भूतपीडाचयो

रैभेयो रिपुराजमस्तकमणिप्रक्षुण्णभूमीतलः ।

यत्पाणिं मणिमुद्रिकानिभवशादासाद्य चिंतामणि

र्द्दीनार्त्तिप्रशमैककेलिकलनाकौतूहलं पुष्यति ॥ ३९ ॥

स्तुत्यान्येव शिरांसि राक्षसपतेश्छिंधीति छिंधीति मां

प्रत्येकं करकर्त्तिकाग्रसरणभ्रष्टानि शंभोः पुरः ।

स्तुत्यः किं स हरप्रसादनपरो गौरीशरीरो हरिः

स्तुत्यः श्रीनिगलंकमल्लनृपतिस्ताभ्यां तृतीयः शिवः ॥ ४० ॥

यद्यपीयं धरा भुक्ता भूपालैः सगरादिभिः ।

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ ४१ ॥

काव्यामृतैर्वाथ कथामृतैर्वा अद्यापि जीवंति मृता महीशाः ।

पूर्व्वप्रसादात्कविपुंगवानां नृपस्य तस्मात्कविरेव मित्रम् ॥ ४२ ॥

विप्राः पर्व्वणि पर्व्वणि क्षितितलं कुर्व्वंतु यूपांकुरं

भूपालाः परिपालयंतु सकलं लोकं स्वधर्म्मस्थिताः ।

गावः संतु सुखं सुनंदतु जनो मा भूत्खलप्रोद्भवः

पूज्यंताम् कवयः सुकीर्त्तिगणिका नाट्यप्रतिष्ठा भुवि ॥ ४३ ॥

लिखितं लेखकलक्ष्मणेन । इति शुभम् ।

Summary

This inscription, engraved on two sides of a stone pillar, consists 125 lines of neatly engraved writing. As the first side of the inscription was exposed to the sun and rains, its writing is damaged in some places and rubbed off at others, whereas the writing on the second side is better preserved. Above the beginning of the inscription, the figures of the sun, the crescent, a recumbent bull, a cow with calf and a Śiva-liṅga are engraved in relief. This fact indicates the Śaivite character of the epigraph. Excepting the salutation to the god Śiva at the beginning and two passages in the last line, the whole text is written in verse. There are 43 stanzas in all and they are consecutively numbered.

This undated inscription mentions the Later Chālukya king Sōmēśvara ruling at Kalyāṇa. Possibly he was Sōmēśvara I (1043-68 A.D.) or Sōmēśvara II (1068-76 A.D.). Thus the inscription may be assigned to the latter half of the eleventh century A.D. It records the installation of a Śiva-liṅga by a Vaiśya named Siddhugi at Kalyāṇa[1] which was the capital of king Sōmēśvara and certain grants made by king Kalichōra II, a feudatory of the Chālukya king Sōmēśvara.

The inscription opens with the expression *Om namaḥ Śivāya* which is followed by a stanza (v.1) in adoration of the god Śiva. Vv. 2-3 describe Mount Kailasa, while v.4 mentions the hermitage of Agastya

resounding with the chanting of the Vedic hymes by young ascetics at prescribed hours. V.5 mentions the austere penance of Agastya in that hermitage. Vv. 6-11 describe the birth of a hero who was a progenitor of 'the family or race of Fire'. These verses narrate snatching away of Agastya's Kāmadhēnu by certain rulers, offering of an oblation to the fire by the sage, and the birth of a great hero from Agastya's fire pit, who after having killed those rulers brought back the *hōma-dhēnu* to the sage. Further it is stated that by his prowers,'the son of Fire' became a powerful ruler after having conquered enemies in the three worlds and helped Indra by uprooting demons and became known as Munimānasiddhi (*lit.*, 'the restorer of the sage's prestige'). Vv. 11 and 12 introduce a ruler named Dhōrarāja (Dhruvarāja) as an ornament of the 'Fire family' which is represented as the third dynasty, the celebrated solar and lunar races probably being the other two. Vākpati Muñja (973-96 A.D.) of the Paramāra dynasty and Taila II (973-97 A.D.) of the Western Chālukya family and probably armies of these two imperial rulers are referred to in v.13. Dhōrarāja was thus a contemporary of the said kings who flourished about the last quarter of the tenth century. The second half of the verse seems to refer to a certain Gōpala. V.14 introduces another member of 'the Fire race', whose name was Uttama. V.15 introduces Uttama's son Kalichōra (I) who was succeeded by his son Argadēva according to v.16. The next eight stanzas (vv. 17-24) describe Argadēva's valour and his achievements on the battle-fields.

Vv. 25-26 appear to introduce Kalichōra (II), a devotee of Hara (Śiva). Due to damaged state of v.25 it is not possible to ascertain whether Kalichōra was another

name of Argadēva or it was the name of the son and successor of Argadēva. The description of the 'Fire family' ends with v.27 which continues to describe the glory of Kalichōra II. This stanza represents the chief as the ruler of twenty thousand villages.

Verse 28 introduces a Vaiśya named Siddhugi who was a friend of the king, apparently meaning Kalichōra II of the 'Fire race'. In the following stanzas (vv. 29-32), Siddhugi is highly praised for his noble qualities. V.31 compares him to Nāgārjuna, Karṇa, Vikrama (*i.e.*, king Vikramāditya), Śibi and Vairōchani (*i.e.*, Bali). V.33 states that Siddhugi installed Lord Sthāṇu (Śiva, *i.e.*, Śiva-liṅga) at Kalyāṇa which was the capital (*pura*) of king Sōmēśvara, the moon of the Chālukya family (*Chālukya-chandra*). Then the king is stated to have donated a *nishka* and a *dramma* from every village and town for [the worship of] the said god in the presence of 'the preceptor' Chandrarāśi (v.34). This seems to refer to the ratification, by the Chālukya monarch, of a grant actually made by one of his provincial rulers as indicated later in the record. The Śaiva ascetic Chandrarāśi, who was the preceptor of Sōmēśvara or of the provincial ruler, appears to have requested the Chālukya king for the ratification.

Verse 35 states that, as long as the members of the 'Fire family' (*Pāvaka-santati*) and the god Siddhēśvara, made by Siddhugi, would flourish on this earth, for that length of time covering a thousand *kalpas*, the arrangement regarding a *dramma* together with a *nikshka* from each of a thousand villages was made by king Raibhēya after creating the *śilā*, *i.e.*, after causing the

praśasti to be written on the same. Verse 36 again speaks of the same arrangement made for the god Siddhēśvara by the ruler of the territory of Yerga[2] (*śrī-Yergadhātrīpati*) in respect of a *dramma* and a *nishka* from every town, *etc.*, in the district (*vishaya*, *i.e.*, the Yerga district).

This section thus suggests that Raibhēya belonging to the 'Fire race' was the governor of the Yerga *vishaya* under the Chālukya king Sōmēśvara. There is also little doubt that Raibhēya was the same as Kalichōra II of the 'Fire race', who was either the son of Argadēva or Argadēva himself.

According to v.37, the epigraph was caused to be made by the ruler (*i.e.*, Raibhēya *alias* Kalichōra II) out of devotion to and for the worship of the god Siddhēśvara while he was listening to an auspicious tale narrated by a *śrēshṭhin* in [the temple of the god] Rēbhēśvara, which was the *guru-maṭha*, when the sun was in the meridian (*i.e.* at midday), the month was Kārttika, the *tithi* Pūrṇimā and the *nakshatra* Kṛittikā. It is not impossible that the *śrēshṭhin* referred to is no other than the Vaiśya Siddhugi and the auspicious tale is the news of the ratification of Raibhēya's grant by Sōmēśvara.

Thus it has been suggested that the grant of a *nishka* and *dramma* out of the revenue income of each one of the one thousand villages in the Yerga district was made by Raibhēya *alias* Kalichōra II of the 'Fire race', who was ruling over the said territory, and the gift was ratified by his overlord, the Chālukya king Sōmēśvara. It is also suggested that the Yerga *vishaya* consisted of one thousand villages (that is to say it was called Yerga-1000)

and that the gift consisted of one thousand *nishkas* and one thousand *drammas*. Of these two coins, *nishka* was a gold coin also called *gadyāṇa*, *varāha*, *hon* or *pagōda*, while *dramma* was a silver coin often called *gadyāṇa* (silver), *etc*., and was sometimes regarded as equal to one-sixteenth of a gold *nishka*.

Vv.38-40 praise Raibhēya *alias* Kalichōra II as a great devotee of Śiva and a generous donor and suggest that he was also known by the name Nigalaṅkamalla. V.41 is one of the usual imprecatory verses and v.42 states that the dead kings live either through poetical works or through stories and, as such works are composed by poets, the poet is the friend of the king. V.43 which is the last stanza in the epigraph, expresses some pious wishes as in the case with the concluding stanza (*Bharatavākya*) in classical Sanskrit dramas. The following passage in prose states that the epigraph was written by a scribe named Lakshmaṇa.

The importance of the inscription lies in the fact that it reveals for the first time the existence of a 'Fire family' ruling in the eleventh century A.D.in the Nanded region apparently forming parts of the dominions of the Chālukyas of Kalyāna. The story of the origin of the family from the fire-pit of the sage Agastya on the Mount Kailāsa in the Himalayas as given in the record closely resembles that of the fire-pit origin of the Paramāras, which first occurs in their inscriptions about the middle of the eleventh century A.D. The 'Fire race' of this record is not known so far from published records. But two inscriptions of the same family are noticed on a pillar in the village Karaḍkhēl about 6 miles from Hoṭṭal, the find

spot of the present record. Both these records are in Kannaḍa and belong to the time of the Western Chālukya king Vikramāditya VI (1076-1126 A.D.). They give the genealogy of the chiefs of the 'Fire family', who were apparently feudatories of the Kalyāṇa Chālukyas, and record the construction of certain temples by a chief named Karka of the 'Fire family'.

Notes

1. Kalyāṇa is the same as modern Kalyan in the Bidar District of Karnataka (*EI.,* XXXV, p.164).

2. Yerga seems to be the district around the village of Yergi, 3 miles from Hoṭṭal (*ibid.*).



No.6
TIDGUNDI PLATES OF THE TIME OF VIKRAMADITYA VI
[Chalukya-] Vikrama Samvat 7

Location	: Tiḍgundi, Bijapur District, Karnataka
Date	: Chālukya-Vikrama Samvat 7 = 1083 A.D.
Script	: Nāgarī
Language	: Sanskrit
King	: Vikramāditya VI
Dynasty	: Chālukyas of Kalyāṇa
Reference	: Kielhorn, *EI.*, III, pp.306-11

Text

Metre: Vv. 1, 3, 6, 7 *Anushṭubh;* 2 *Pṛithvī;* 4, 5 *Śārdūla-vikrīḍita*

जयत्याविष्कृतं विष्णोर्व्वाराहं क्षोभिताण्णर्वं ।

दक्षिणोन्नतदंष्ट्राग्रविश्रांतभुवनं वपुः ॥ १ ॥

वपुर्द्दलनसंभ्रमात्स्वनखरंध्रनष्टे रिपौ

क्व यात इति विस्मयात्प्रहितलोचनस्सर्व्वतः ।

वृथेति करधूनने निपतितं पुरो रेणुव

न्निरीक्ष्य भुवि दानवं जयति जातहासो हरिः ॥ २ ॥

पांडुपंकजसंलीनमधुपालीसमं गलम् ।

यो बिभर्त्ति विधेयात्ते ना कपाली स मंगलम् ॥ ३ ॥

स्वस्ति ॥

समस्तभुवनाश्रयश्रीपृथ्वीवल्लभमहाराजाधिराजपरमेश्वरपरमभट्टारक-

सत्याश्रयकुलतिलकचालुक्याभरणश्रीत्रिभुवनमल्लदेवस्य विजयराज्ये श्रीकल्याणपुरे बहुदिवसस्थिरनिवासिनि पृथ्वीं पालयति सति श्रीविक्रम-कालसंवत्सरेषु षट्स्वतीतेषु सप्तमे दुंदुभिसंवत्सरे प्रवर्त्तमाने तस्य कार्त्तिकशुद्धप्रतिपदादिवारे ॥ तत्पादपद्मोपजीविनो मुंजमहीपतेरन्वयः। प्रत्यण्डकचतुःसहस्रदेशाधिपतिः सिंदवंशप्रभवो रणांगणेष्वगणितभी-र्भीमो नाम तदग्रसुतः प्रख्यातकीर्त्तिरणांगणार्जितोर्जितजयश्रीवल्लभः सिंदराजो नाम तत्सुतस्य मुंजमहीपतेः प्रशस्तिस्तंभः॥ स्वस्ति। समधिगतपंचमहाशब्दमहामण्डलेश्वरभोगावतीपुरपरमेश्वरफणींद्रवंशो-द्भवनागकुलतिलकसिंदकुलकमलमार्त्तण्डगुणुकवडवानलमंडलिकजग-थापनामावलीसमलंकृतमहामण्डलेश्वरश्रीमुंजराजदेवस्याशीर्व्वचनमिदं ॥

पूर्व्वं यो बलिराजबंधनविधौ दैन्यं मनो मा ग्रही

न्नायं वामन एष मुंजनृपतिर्भूपालचूडामणिः।

नाप्यंगीकृतकोल एष जगतः पाते चिरं शत्रुभिः

सोऽयं राजितराजराजिविजयी जीयान्महीवल्लभः॥ ४ ॥

चित्रं मुंजमहीपते तव रिपुस्वांते सुतप्तेनिशं

तद्वाःपांबुधिभीकरे विचरितुं लोला च कीर्त्यंगना।

आ ज्ञातं त्वयि विद्यते शिखिविषस्तंभादिविद्याबलं

तेनेऽयं हिमसेतुवर्तिरिपुसंघाताशुसंचारिणी ॥ ५ ॥

तेन च स्वमंडलमध्ये ॥ स्वस्ति। श्रीः।

समधिगतपंचमहाशब्द महासामंतं वीरलक्ष्मीकांतं परबलकृतांत अदटसामंतघनपटलविघटनप्रभंजनं वैरिसामंतगजकेसरि सामंतबेंटेकारं

मगरकीर्त्तिनवसारं बंटरभावं रेवणदेवानंककार पतिहिताचार्यनचलितधैर्य गोत्रपवित्रं सुजनैकमित्रं धर्म्मधर्म्मात्मज सत्यराधेयं तुरगरेवंतं विक्रांतकंठीरवं श्रीमत्त्रिभुवनमल्लदेवपादाराधकश्रीमत्कन्नसामंतः।

तस्याश्रीर्वचनमिदं ॥

जीयाच्छ्रीकन्नसामंतो हरपादार्च्चनप्रियः।

लाटीकुचतटस्पर्शी चिरं वैरिकृतांतकः ॥ ६ ॥

तस्मै क्रयदानपूर्व्वकं सात्मीयमन्नेयसाम्यं वाय्वडद्वादशग्रामा दत्तास्त-न्मध्ये टक्कलिकाभिधानग्रामं वर्जीयित्वा ॥ तत्प्रधानपुरुषश्रीखंभय्य-नायको मधुकरिनायकः संधिविग्रही ॥ भम्मैय्यनायको निंबयनायक एतेषां पुरतः संधिविग्रहिनन्नैपैप्रतिहस्तेन लिखित्वा श्रीमुंजमहीपतिना कन्नसामन्ताय स्वहस्तेन दत्तमिदं ताम्रशासनं ॥ श्लोकः ॥

स्वदत्तां परदत्तां वा यो हरेत्तु वसुंधराम्।

षष्टिं वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥ ७ ॥

Summary

This inscription, engraved on a set of 3 copper-plates, consists 50 lines of perferctly preserved writing. The circular seal attached to the ring on which the plates were strung, contains, in relief on a countersunk surface, in the center a lion or tiger, standing to the proper right, with the head turned to the front, above it, in the middle the moon, on the left the sun, and certain other figures.

The language of the inscription is Sanskrit; but the *birudas* in lines 32-39 have the terminations of the Kannaḍa nominative case (*anu, aṁ* or *a*), and the text contains, in addition to some Kannaḍa proper names, five

words which are Kannaḍa, *adaṭa* (l.34), *baṇṭa* (l.36), *bēṇṭekāra* (l.35) and *manneya* and *sāmya* (ll.42-43).

The inscription opens with 3 verses glorifying, or invoking the blessings of, the gods Vishṇu and Śiva and ends with one of the ordinary imprecatory verses, and it also contains 2 verses in ll.24-32 and one verse in ll.40-42; the rest is in prose.

After the invocatory verses, the inscription refers itself to the reign of the Western Chālukya king Tribhuvanamalladēva (Vikramāditya VI) who is vested with the titles *Samastabhuvanāśraya, Prithvīvallabha, Mahārājādhirāja, Paramesvara, Paramabhaṭṭāraka, Satyāśrayakulatilaka* and *Chālukyābharaṇa.* He is stated to have been staying in the city of Kalyāṇa. Then follows the date of the inscription, *viz.,* [Chālukya-] Vikrama year 7, Dundubhi saṁvatsara, Kārttika śu. 1, Sunday.

Then ll. 14-32 introduce a dependent of the king Tribhuvanamalla, the *Mahāmaṇḍalēśvara* king (*mahīpati*) Muñja- a son of Sindarāja, who was the eldest son of Bhīma, the governor of the Pratyaṇḍaka-Fourthousand, of the Sinda family. This Muñja was adorned with the titles *Samadhigatapaṁchamahāśabda, Mahāmaṇḍalēśvara, Bhōgāvatīpuraparamēśvara, Phaṇīṁdravaṁśōdbhava, Nāgakulatilaka, Siṁdakulakamalamārttaṇḍa, Guṇuka-vaḍavānala* and *Maṁḍalīkajagathāpa.* He is compared to the two incarnations of Vishṇu, Vāmana and the Boar, and suggested to be superior to them. His fame is said to wander between the Himālaya and Rāma's bridge (*sētu*).

From the second half of l.32 commences the introduction of another dependent of Tribhuvanamalla,

the *Mahāsāmanta* Kannasāmanta who also bore the titles of *Samadhigatapaṁchamahāśabda, Mahāsāmanta, etc.*, of which *Rēvaṇadēvanaṁkakāra*[1] is interesting. He is described as Yudhishṭhira in righteousness, Karṇa in truthfulness and Rēvanta in the management of horses.

The object of the inscription is to record that on the date mentioned above *Mahāmaṇḍalēśvara* Muñja, son of Sindarāja, referred to above, sold the Vyāvaḍa group of twelve villages, together with his own rights, with the exception of the village of Ṭakkalikā,[2] to *Mahāsāmanta* Kannasāmanta, also mentioned above. In the presence of his chief officer Kambhayya *Nāyaka;*. Madhukari *Nayāka,* the *Sāndhivigrahin*; Bhammaiyya *Nāyaka*; and the *Nāyaka* Nimbayya, had this copper-edict, written by Nannapai, the deputy of the *Sāndhivigrahin,* been given by the king Muñja with his own hand to Kannasāmanta.

The charter concludes with the imprecatory stanza, *svadattāṁ paradattāṁ, etc.*

Notes

1. Going by the meaning of the Kannaḍa word *aṁkakāra* (a chief servant, a leading hero) it is obvious that Rēvaṇadēva was the master of Kannasāmanta. This very sense is borne out by the phrase *patihitāchāryan* that follows the word *aṁkakāra.*

2. Ṭakkalikā, one of the group of the Vyāvaḍa – twelve, may perhaps be the village of 'Takulkee', about twelve miles north-west of the city of Bijapur and fourteen miles south-west of Tiḍgundi (*EI.*, III, p.308).



No.7

SITABALDI INSCRIPTION OF THE TIME OF VIKRAMADITYA VI: SAKA - SAMVAT- 1008

Location : Sītābāldī, Nagpur District, Maharashtra

Date : Śaka - Saṁvat 1008 = 1087 A.D.

Script : Nāgarī

Language : Sanskrit

King : Vikramāditya VI

Dynasty : Chālukyas of Kalyāṇa


Reference : Kielhorn, F., *EI.*, III, pp.304-06

Text

ओं स्वस्ति ॥

शकनृपकालातीतसंवत्सरांतर्ग्गतदशशात यत्र अष्टत्यधिके सकु १००८ प्रभवसंवत्सरे वैशाखशुद्धतृतीयाशुक्रदिने अद्येह समस्तभुवनाश्रय-श्रीपृथ्वीवल्लभमहाराजाधिराजपरमेश्वरपरमभट्टारकसत्याश्रयकुलतिलक-चालुक्याभरणश्रीमत्त्रिभुवनमल्लदेवमहीप्रवर्द्धमानकल्याणविजयराज्ये तत्पादपद्मोपजीवी लतलौरविनिर्ग्गतो महाराष्ट्रकूटान्वयप्रसूतो महासामंतः धाडीभंडकः अरिबलचडकसंग्रामसहस्रबाहुपरनारी-सहोदरसमस्तमल्लमल्लचामुण्डावरलब्धप्रसादनामादिसमस्तराजावलीस-मलंकृतश्रीधाडिअदेवराणकः ॥ तत्पादपद्मोपजीवी लतलौरविनिर्ग्गतः काण्वशाखायां वत्सगोत्रीयः पंचप्रवरीयो भट्टवीठपैपणती भट्टबोपपैनीती भट्टपद्मनाभपुत्रो गोब्राह्मणदासु विष्णुपादपंकजाराधनतत्परु उभय-द्वादशोधवलु नारसिंहवरलब्धप्रसाददंडनायकश्रीवासुदेवेन गोप्रचारस्यार्थे

S.No. 3 - Inscription No. 7



Sitabaldi Inscription of the time of Vikramadiya VI, Saka Samvat 1008

सुवर्ण्णेन गृहीतभूमिनिवर्त्तनद्वादसु अंके १२ तथा गवाह्निकनिवर्त्तनसप्त ७ वाहकनिवर्त्तनपंच ५ एतदीयभूमौ प्रतिपादनीया ।

एता भूमिर्यें लोपयंति ते ब्रह्मविष्णुमहेश्वरांल्लोपयंति ।

एवं यो गौ लोपयति स कुंभीपाके पतति ॥

Summary

This inscription, engraved on an elaborately sculptured pillar, consists 11 lines of fairly well-preserved writing. Above the inscription is a row of small figures, and above these are, in the center a *liṅga,* and on the two sides of it representations of the god Brahma and Vishṇu; below the inscription are some cows and calves, and below these there is again a row of small figures, apparently fighting.

Text of this inscription contains the Prākṛit termination *u* in as many as five words, *saku, dāsu, etc;* and words, *chaḍaka, paṇatī* (a great-grandson) and *nītī* (a grandson), which must have been taken from the author's vernacular. The inscription records the gift of certain lands for the maintenance of cattle by *Daṇḍanāyaka* Vāsudēva.

The record opens with the auspicious words *Ōṁ svasti* and refers itself to the reign of the Chālukya king Vikramāditya VI, who is given the titles of *Samasta-bhuvanāśraya* (the refuge of the universe), *Pṛithvīvallabha* (the favourite of the Earth), *Mahārājādhirāja, Paramēśvara, Paramabhaṭṭāraka, Satyāśrayakulatilaka* (the frontal ornament of the family of Satyāśraya), *Chālukyābharaṇa* (ornament of the Chālukyas) and *Tribhuvanamalla.* It then mentions, as a dependent of the

king, the *Mahāsāmanta* Dhāḍibhaṁḍaka, also called the *Rāṇaka* Dhāḍiadēva, who had emigrated from Latalaura,[1] was born in the Mahārāshṭrakūṭa lineage, and was distinguished by such titles as *Aribalachaḍaka,*[2] *Sangrāmasahasrabāhu, Paranārīsahōdara, Samasta-mallamalla* and *Chāmuṇḍāvaralabdhaprasāda.* Next comes the introduction of the donor of the grant, *Daṇḍanāyaka* Vāsudēva, who was a dependent of *Rāṇaka* Dhāḍiadēva. This Vāsudēva was a son of the *bhaṭṭa* Padmanābha, grandson of the *bhaṭṭa* Bōpapai and great-grandson of the *bhaṭṭa* Viṭhapai, belonged to the Kāṇva *śākhā* and Vatsa *gōtra* and had five *pravaras,* and had emigrated from Latalaura. He is further described as *gōbrāhmaṇadāsu* (a slave to cows and Brāhmaṇas), *Vishṇupādapaṁkajārā-dhanatatparu* (an ardent worshipper of the god Vishṇu), *ubhayadvadsōdhavalu*[3] and *Nārasiṁhavaralabdhaprasāda* (who had obtained favour by a boon of the god Narasiṁha).

Then follows the purport of the record stating that *Daṇḍanāyaka* Vāsudēva gave 12 *nivarttanas* of land, which had been purchased by him (*suvarṇēna gṛihīta-bhūmi*), for the grazing of cattle (*gō-prachāra*); also 7 *nivarttanas* for daily food given to cattle (*gavāhnika*); and 5 *nivarttanas* for *vāhaka,*[4] apparently to a temple at which the inscription was put up. The concluding line of the record states that, whosever appropriates the land so given, robs the gods Brahman, Vishṇu and Mahēśvara (Śiva); and that, who steals the cows from it, falls into hell.

The inscription is dated, at the very outset, in Śaka-Saṁvat 1008, on Friday, the third lunar day of the

bright half of Vaiśākha of the year Prabhava. It has been stated that the day intended by this date is really Thursday, the 8th April, A.D. 1087, and the writer made a mistake in regard to the week-day.

Notes

1. Latalaura, sometimes spelt as Lattalūra has been identified with modern Latur in the Osmanabad District of Maharashtra. The Rāshṭrakūṭas are often styled *Lattalūra-pura-varādhīśvara* (*ISPS.*, pt. II, p.352, *n.* 44).

2. The word *chaḍaka* is not Sanskrit; it probably is connected with the root *chaṭ*, 'to break', and apparently the whole *biruda* (*aribalachaḍaka*) is equivalent to *aribalanishūdana* (*EI.*, III, p.306, *n.*3).

3. The epithet *Ubhayadvādasōdhavalu* perhaps refers to religious observances on the 12th day (*dvādaśī*) of the two halves of the month (*ibid.*, *n.*14).

4. This word *vāhaka* perhaps denotes here the drivers or attendants of the cattle (*ibid.*, p.305, *n.* 6).



No.8

NILGUNDA COPPER-PLATE INSCRIPTION OF VIKRAMADITYA VI: CHALUKYA-VIKRAMA YEARS 12 AND 48

Location	: Nīlgunda, Bellary District, Karnataka
Date	: Chālukya-Vikrama Years 12 (1087 A.D.) and 48 (1123 A.D.).
Script	: Southern Nāgarī
Language	: Sanskrit
King	: Vikramāditya VI
Dynasty	: Chālukyas of Kalyāṇa
Reference	: Barnett, L.D. *EI.*, XII, pp.142-55 Sircar, D.C., *Select Inscriptions,* Vol. II, pp.523-35

Text

Metre: Vv. 1, 17-22, 31 *Anushṭubh;* 2, 4, 10, 11, 25, 36 *Mālinī;* 3 *Āryāgīti;* 5, 7, 14, 28, 40, 42 *Vasantatilakā;* 6, 27, 43, 47 *Śārdūlavikrīḍita;* 8, 9, 23, 26, 29, 37 *Āryā;* 12, 13, 44, 46 *Mandākrāntā;* 15 *Drutavilambita;* 16, 24, 30, 32, 34, 38, 41 *Upajāti;* 33, 35 *Upēndravajrā;* 39 *Sragdharā;* 45 *Praharshiṇī*

ओं ॥

जयत्याविष्कृतं विष्णोर्वाराहं क्षोभिताण्र्णवम् ।

दक्षिणोन्नतदंष्ट्राग्रविश्रांतभुवनं वपुः ॥ १ ॥

श्रियमुपहरताद्वः श्रीपतिः क्रोडरूपो

विकटविशददंष्ट्राप्रान्तविश्रांतिभाजम् ।

अवहददयदंष्ट्राकृष्टविस्पष्टकांड

प्रतनुविसजटाग्रग्रंथिवद्यो धरित्रीम्॥ २॥

करिमकरमकरिकांकितजलनिधिरशनां वशिकरोत्ववनिवधूम्।

त्रिभुवनमल्लमहीपतिरकलंकयशोंवुराशिवलयितभुवनः॥ ३॥

गद्यम्-

स्वस्ति समस्तभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतिपुत्राणां कौशि-कीवरप्रसादलब्धश्वेतातपत्रादिराज्यचिह्नानां सप्तमातृकापरिरक्षितानां कार्त्तिकेयवरप्रसादलब्धमयूरपिच्छकुंतध्वजानां भगवन्नारायणप्रसादासा-दितवरवराहलांछनेक्षणक्षणवशीकृतारातिराजमंडलानां समस्तभुवना-श्रयसर्वलोकाश्रयविष्णुवर्द्धनविजयादित्यादिविशेषनाम्नां राजरत्नाना-मुद्भवभूमिः।

वृत्तम्-

कवलितनललक्ष्मीर्दुर्जयौर्जित्यहारी

विहतपृथुकडंवाडंवरो मौर्यनिर्जित्।

निजभुजवलभून्नोत्पाटयन्त्राष्ट्रकूटा

न्खिलितकलचुरिश्रीरस्ति चालुक्यवंशः॥ ४॥

तज्जेषु राज्यमनुपाल्य गतेषु राज

स्वेकान्नषष्टिगणनेषु पुराध्ययोध्यम्।

तद्वंशजास्तदनुषोडश भूमिपालाः

क्ष्माम् दक्षिणापथ जुषं विभरां वभूवुः॥ ५॥

दुष्टावष्टब्धायां कतिपयपुरुषांतरांतरितायां चालुक्यकुलसंपदिभूयश्चा-

लुक्यवंश्य एव।

कंदः कीर्त्तिलतांकुरस्य कमलं लक्ष्मीविलासास्पदं

वज्रं वैरिमहीभृतां प्रतिनिधिर्दैवस्य दैत्यद्रुहः।

राजासीज्जयसिंहवल्लभ इति ख्यातश्चरित्रैन्निजै

र्यो रेजे चिरमादिराजचरितोत्कंठाः प्रजानां हरन्॥ ६॥

यो राष्ट्रकूटकुलमिंद्र इति प्रसिद्धं

कृष्णाह्वयस्य सुतमष्टशतेभसैन्यम्।

निर्जित्य दग्धनृपपंचशतो वभार

भूयश्चलुक्यकुलवल्लभराजलक्ष्मीम्॥ ७॥

चटुलरिपुतुरगपटुभटकरटिघटाकोटिघटितरणरागः।

सुकृतहरचरणरागस्तनयोभूत्तस्य रणरागः॥ ८॥

तत्तनयः पुलकेशी केशिनिषूदनसमोभवद्राजा।

वातापिपुरीवरपतिरकलितखलकलिकलंककलः॥ ९॥

वयमपि पुलकेशिक्ष्मापतिं वर्ण्णयंतः

पुलककलितदेहाः पश्यताद्यापि संतः।

स हि तुरगगजेन्द्रग्रामसारं सहस्र

द्वयपरिमितमृत्विक्साच्चकाराश्वमेधे॥ १०॥

तत्तनयः।

नलनिलयविलोपी मौर्यनिर्याण हेतुः

प्रथितपृथुकडंवस्तंवभेदी कुठारः।

भुवनभवनभागापूरणारंभभार

व्यवसितसितकीर्त्तिः कीर्त्तिवर्मा नृपोभूत्॥ ११॥

तदनु तस्यानुजः।

सर्व्वद्वीपाक्रमणमहसो यस्य नौसेतुवंधै

रुल्लंघ्याब्धिं व्यधित पृतना रेवतीद्वीपलोपम्।

राज्यश्रीणाम् हठपतिरभूद्यश्च कालच्चुरिणां

वभ्रे भूमिं सह स सकलैर्मंगलैर्मंगलीशः॥ १२॥

ज्येष्ठभ्रातुः सति सुतवरेप्यर्भकत्वादशक्ते

र्यस्मिन्नात्मन्यकृत हि धुरं मंगलीशः पृथिव्याः।

तस्मिन्प्रत्यार्पिपद् अथ महीं यूनि सत्याश्रयेऽसौ

चालुक्यानां क इव हि पथो धर्म्यतः प्रच्यवेत॥ १३॥

जेतुर्दिशां विजितहर्षमहानृपस्य

दातुर्मनोरथशताधिकमर्थयद्भ्यः।

सत्यादि सर्वगुणरत्नगणाकरस्य

सत्याश्रयत्वमुपलक्षणमेव यस्य॥ १४॥

अडमरीकृतदिग्वलयोर्द्दितद्विडमरीपरिगीतमहायशाः।

मृडमरिष्टभिदं मनसोद्वहन्निडमरिः क्षितिपोजनि तत्सुतः॥ १५॥

सुतस्तदीयो गुणरत्नमाली भूवल्लभोभूद्भुजवीर्यशाली।

आदित्यवर्मार्जितपुण्यकर्मा तेजोभिरादित्यसमानधर्मा॥ १६॥

तत्सुतो विक्रमादित्यो विक्रमाक्रांतभूतलः।

ततोऽपि युद्धमल्लख्यो युद्धे यमसमो नृपः॥ १७॥

तज्जन्मा विजयादित्यो वीरानेकांगसंगरे ।

चतुर्ण्णां मंडलानामप्यजयद्विजयोपमः ॥ १८ ॥

तद्भवो विक्रमादित्यः कीर्त्तिवर्मा तदात्मजः ।

येन चालुक्यराज्यश्रीरंतरायिण्यभूद्भुवि ॥ १९ ॥

विक्रमादित्यभूपालभ्राता भीमपराक्रमः ।

तत्सूनुः कीर्त्तिवर्माभून्मृत्प्रासार्द्दितदुर्जनः ॥ २० ॥

तैलभूपसततो जातो विक्रमादित्यभूपतिः ।

तत्सूनुरभवत्तस्माद्भीमराजोरिभीकरः ॥ २१ ॥

अय्यणार्यस्ततो जज्ञे यद्वंशस्य श्रियं स्वकां ।

प्रापयन्निव वंशं स्वं स वव्रे कृष्णनंदनाम् ॥ २२ ॥

अभवत्तयोस्तनूजो विभवविभासी विरोधिविध्वंसी ।

तेजोविजितादित्यः सत्यधनो विक्रमादित्यः ॥ २३ ॥

चेदीशवंशतिलकां लक्ष्मणराजस्य नंदनां नुततशीलाम् ।

वोंथादेवीं विधिवत्परिणिन्ये विक्रमादित्यः ॥ २४ ॥

सुतमिव वसुदेवाद्देवकी वासुदेवम्

गुहमिव गिरिजामिर्द्देवमर्द्धेन्दुमौलेः ।

अजनयदथ वोंथादेव्यतस्तैलभूपम्

विभवविजितशक्रं विक्रमादित्यनाम्नः ॥ २५ ॥

अरिकुम्भिकुम्भभेदनरिपुदुर्ग्गकवाटभंजनप्रभृतिः ।

सहजवलस्य हरेरिव वालक्रीडाभवद्यस्य ॥ २६ ॥

किं च राष्ट्रकूटकुलसंवद्धावुभौ ।

और्जित्याच्चरणाविव प्रचलितौ साक्षात्कलेः क्रामतः ।

क्रूरौ वद्धशरीरकौ गुरुजनद्रोहप्रदोहाविव ।

कालात्खंडितराष्ट्रकूटककुलश्रीवल्लिजातांकुरौ ।

लूनौ येन सुखेन कर्कररणस्तंभौ रणप्रांगणे ॥ २७ ॥

इत्थं पुरा दितिसुतैरिव भूतधात्रीं

यो राष्ट्रकूटकुटिलैर्ग्गमितामधस्तात् ।

उद्धृत्य माधव इवादिवराहरूपो

वभ्रे चलुक्यकुलवल्लभराजलक्ष्मीम् ॥ २८ ॥

भम्महरट्टादभवद्भूपालाद्राष्ट्रकूटकुलतिलकात् ।

लक्ष्मीरिव सलिलनिधेः श्रीजाकव्वाह्वया कन्या ॥ २९ ॥

चालुक्यवंशांवरभानुमाली श्रीतैलभूपाल उपायतैनाम् ।

तयोश्च लोकाभ्युदयाय योगः स चन्द्रिकाचन्द्रमसोरिवासीत् ॥ ३० ॥

श्रीतैलभूमिपालात् श्रीजाकव्वा समजीजनत् ।

श्रीमत्सत्याश्रयं स्कंदमंबिका त्रंयबकादिव ॥ ३१ ॥

तस्यानुजः श्रीदशवर्मनामा तद्वल्लभा भाग्यवती च देवी ।

तयोरभूद्विक्रमशीलाशाली श्रीविक्रमादित्यनृपस्तनूजः ॥ ३२ ॥

असौ निजज्येष्ठपितुः परोक्षं वभार वाराशिवृतां धरित्रीम् ।

भुजेन केयूरलतामिवोच्चैर्व्विदारितारातिकदंवकेन ॥ ३३ ॥

तदनु तस्यानुजः ।

यस्याखिलव्यापि यशोवदातमकांडदुग्धांवुधिवृद्धिशंकाम् ।

करोति मुग्धामरसुंदरीणामभूत्स भूपो जगदेकमल्लः ॥ ३४ ॥

सदावनस्थः पटुविक्रमाढ्यो मदांधगंधेभघटाविपाटी ।

धरोर्जितप्रस्फुरितप्रभासो रराज योसौ जयसिंहराजः ॥ ३५ ॥

अगमदखिलधात्री येन राजन्वतीत्वं

निवसति नृपलक्ष्मीर्यस्य शुभ्रातपत्रे ।

स सकलनमितारिक्षोणिभृन्मौलिरत्न

द्युतिशवलितपादो गंडरुल्गंडभूपः ॥ ३६ ॥

विख्यातकृष्णवर्ण्णे तैलस्नेहोपलब्धसरलत्वे ।

कुन्तलविषये नितरां विराजते मल्लिकामोदः ॥ ३७ ॥

ततः प्रतापज्वलनप्रभावनिर्मूलनिर्दग्धविरोधिवंशः ।

तस्यात्मजः पालयिता धरायाः श्रीमानभूदाहवमल्लदेवः ॥ ३८ ॥

आत्मावस्थानहेतोरभिलषति सदा मंडपं मालवेशो

दोलत्तालीवनांतान्यनुसरति सरिन्नाथकूलानि चोलः ।

कन्याकुब्जाधिराजो भजति च तरसा कंदरास्ता हिमाद्रे

रुद्दामा यत्प्रतापप्रसरभरभवोद्भीतिविभ्रांतचित्ताः ॥ ३९ ॥

अम्लानतैलगुणसंग्रहणप्रवृद्ध

तेजोविशेषदलितद्विषदंधकारः ।

अन्वर्थतां समनुसृत्य कविप्रधानै

र्यः प्रोच्यते ननु चलुक्यकुलप्रदीपः ॥ ४० ॥

औद्धत्ययुक्तांधकजप्रभावनिर्मूलनोद्दामवलस्य यस्य ।

विराजते निर्ज्जितमीनकेतोर्देवस्य चालुक्यमहेश्वरत्वम् ॥ ४१ ॥

तस्मादजायत जगज्जनितप्रमोद

शृंगारवीररसिकः कविलोककांतः।

कांताविलोलनयनोत्पलचारुचंद्र

श्चालुक्यवंशतिलको भुवनैकमल्लः ॥ ४२ ॥

यः पत्रं स्फुटपुष्कराक्षरधरं पाणौ कृपाणच्छला

दाजन्मप्रतिपन्नदास्यविजयश्रीदत्तमुच्चैर्दधत्।

साक्ष्यं ग्राहयितुं दिशां परिवृढान्सर्वानिव प्राहिणो

त्प्रत्याशं निजकीर्त्तिमभ्रतटिनीस्पर्द्धानुवंधोद्यताम्॥ ४३ ॥

तदनु तस्यानुजः।

आसीत्तेजःकलितकमलोल्लासनप्रौढपाद

स्पर्शादुच्चैः श्रियमवनिभृच्छेखराणां दधानः।

ध्वांतभ्रांतिं दधदिव दृशोरंजनं वैरिवीर

स्मेराक्षीणां मुहुरपहरन्विक्रमादित्यदेवः ॥ ४४ ॥

भूभारंनमितफणीश्वरं भुजाभ्यां

बिभ्राणः पटहपलायितक्षितीशः।

यश्चोच्चैरपहृतनाकिशाखिलीलः

प्रख्यातस्त्रिभुवनमल्ल इत्युदारः ॥ ४५ ॥

यातोन्वेष्टुं जनकजनितां वल्लभोदारलक्ष्मीं

भ्रात्रा सार्द्धं हरिवलयुतः स्वां सुमित्रात्मजेन।

तीरे सिन्धोर्वहुसुखभयादेत्य वैभीषणश्री

धाम्ना नेमे द्रविडपतिना यश्च चालुक्यरामः ॥ ४६ ॥

सर्वाशाविजयप्रयाणसमयज्ञाताखिलोर्व्विपथ

प्रस्थानेव महीमतीत्य विमला यत्कीर्त्तिरब्धिं गता।

प्रेक्ष्यस्ते विजयश्रियापरवशो दूरीकरोत्येष मा

मित्याख्यातुमिवार्ण्णवस्थितिजुषः शौरेस्त्रिलोकिगुरोः ॥ ४७ ॥

स तु श्रीपृथ्वीवल्लभमहाराजाधिराजपरमेश्वरपरमभट्टारकसत्याश्रय-कुलतिलकचालुक्याभरणश्रीमत्रिभुवनमल्लवल्लभनरेंद्रदेवः कुशली कुशलिनः सर्वानेव यथा संवर्द्धमानकान्राष्ट्रपतिविषयपतिग्रामकूट-कायुक्तकनियुक्तकाधिकारिकमहत्तरादीन्समादिशत्यस्तु वः संविदितम्। यथास्माभिश्चालुक्यविक्रमवर्षे द्वादशे अंकतोऽपि ॥ १२ ॥ प्रवर्त्तमानकाले प्रभवसंवत्सरे पुष्यबहुलत्रयोदशीवड्डवारोत्तरायणसंक्रांतौ वह्वनि महादानानि दत्त्वा तद्दक्षिणाकाले कल्याणपुरसमावासितनिज-विजयस्कंधावारे पलतपांड्यविज्ञाप्त्या द्रविडदेशागतेभ्यो नानागोत्रेभ्यो नानावेदशाखाशास्त्रपारगेभ्यस्त्रिशतसंख्याकेभ्यो ब्राह्मणेभ्यः श्रीमत्त्रिभुवनमल्लदेवेन कोकलिपंचशतदेशमद्ध्यस्थितविक्किगसप्त-त्यन्तर्व्वर्त्ति नीरुगुंदनामा ग्रामः धारापूर्वकमग्रहारीकृत्य दत्तः। पंच-शतेभ्य एव ब्राह्मणेभ्यः चालुक्यविक्रमवर्षे अष्टाचत्वारिंशे अंकतोऽपि ॥ ४८ ॥ प्रवर्त्तमानकाले शोभकृत्संवत्सरे भाद्रपदशुद्ध श्रवणद्वादश्यां सोमवारे वह्वनि महादानानि दत्त्वा तद्दक्षिणाकाले वैजयन्ती-पुरसमावासितनिजविजयस्कंधावारे श्रीकरणाधिकारिसर्व्वाध्यक्ष-द्रविडादित्यप्रेरितपलतपांड्यपौत्ररायपांड्यविज्ञाप्त्या श्रीमत्त्रिभुवनमल्ल-देवेन स एव ग्रामः कृष्णपल्लिका समेतः तेभ्य एव ब्राह्मणेभ्यो

धारापूर्वकं शासनीकृत्य दत्तः। तैरेव ब्राह्मणैः तद्देशस्वामिने पिंडादानस्वरूपेण सुवर्ण्णशतचतुष्टयं देयम्। सशुल्ककरवाधापरिहारः समस्तादायसहितो राजकीयानामनंगुलिप्रेक्षणीयो निधिनिधानसमेतः सर्व्वनमस्यः त्रिभोगाभ्यंतरसिद्ध्या शासनीकृत्य दत्तः। तस्य ग्रामस्य सीमन्तानि कथ्यंते॥। प्राच्यां दिशि गजपाषाणः। ततो दक्षिणतः खल्वाटपर्व्वतश्च। आग्नेय्यां दिशि तलेवाग्यग्रामात्पश्चिमासन्नप्रदेशे स्रोतः। कमंडलुकार्पासग्रामात्पश्चिमासन्नप्रदेशे स्रोतोंतरं च। दक्षिणस्यां दिशि तिलकनामग्रामादुत्तरासन्नप्रदेशे स्रोतः। नैर्ऋत्यां दिशि शैलः। तस्यचोत्तरतो लाक्षागेहनामग्रामात्पूर्व्वतो महिषपाषाणः। पश्चिमस्यां दिशि मधूकवृक्षसरः। ततः पश्चिमोत्तरतः आयससारतिंत्रिणीकवृक्षश्च। वायव्यां दिशि दीर्घतुंगपर्व्वतः। उत्तरस्यां दिशि स्वर्ण्णखदिरवल्मीकः। ऐशान्यां दिश्यक्षरपाषाणः। इति सीमांतप्रमाणानि। तत्रत्यभीमेश्वर-देवाय गंधपुष्पधूपदीपनैवेद्यार्च्चनार्थं खंडस्फुटितजीर्ण्णोद्धारनवसुधा-कर्मार्थं नृत्यगीतवाद्यभोगपादमूलपरिवारार्थं ब्राह्मणतपस्विभोजनार्थं च आदित्यनामपल्लिका सशुल्ककरवाधापरिहारः समस्तादेयसहितो राजकीयानामनंगुलिप्रेक्षणीयो निधिनिधानसमेतः सर्व्वनमस्य-स्त्रिभोगाभ्यंतरसिद्ध्या धारापूर्व्वकं देवभोगार्थं शासनीकृत्य दत्तः। तस्याः पल्लिकायाः सीमांतानि कथ्यंते। प्राच्यामाग्नेय्यां दक्षिणस्यां नैर्ऋत्यां च निरुगुंदग्रामोक्तसीमेव सीमा। पश्चिमस्यां दिशि नागरसरः सेतुः। वायव्यामुत्तरस्यामैशान्यां च चूतह्रदः स्रोतः। इति आदित्यपल्लिकायाः सीमांतप्रमाणानि। एवं पूर्व्वप्रसिद्धसीमासमन्वित-

श्चतुराघाटविशुद्धः स युष्माभिरागामिभिरस्मद्वंश्यैरन्यैश्च भूमिपालैः

पालनीयः। तथा चोक्तं भगवता वेदव्यासेन।

बहुभिर्व्वसुधा दत्ता राजभिः सगरादिभिः।

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥

अपहरणेऽपि च दोषस्तेनैवोक्तः।

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।

षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः॥

सुवर्ण्णमेकम् गामेकां भूमेरप्येकमंगुलम्।

हरन्नरकमाप्नोति यावदाभूतसंप्लवम्॥

विंध्याटवीष्वतोयासु शुष्ककोटरशायिनः।

कृष्णसर्पा हि जायंते ब्रह्मदेयापहारिणः॥

रामभद्रेणाप्युक्तम्।

सामान्योयं धर्मसेतुर्नृपाणां

काले काले पालनीयो भवद्भिः।

सर्व्वानेतान्भाविनः पार्थिवेन्द्रान्

भूयो भूयो याचते रामभद्रः॥

मद्वंशजाः परमहीपतिवंशजा वा

पापादपेतमनसो भुवि भाविभूपाः।

ये पालयंति मम धर्म्ममिमं समस्तं

तेभ्यो मया विरचितोंजलिरेष मूर्द्धि॥

मयेदं शासनाधिकारिकाक्षपटलिकमहाप्रचंडदंडनायककालिदाससुत-

विक्रमादित्यानुमत्या वत्सगोत्रसामवेदिभट्टविलासोपनामार्यमस्वामि-सूनुना काश्मीरभट्टमल्लयपंडितेन दानाधिकारिणा लिखितमिदमिति शुभम् ॥ श्रीशारदायै नमः ॥

Summary

This inscription, engraved on a set of 3 copper-plates consists 87 lines of carefully executed and well-preserved writing. Its quadrangular seal bears the figure of a boar (the crest of the Chālukyas), below which is engraved the legend *Śrīmach-chāḷukya-Bhūvallabha* in old-Kannaḍa characters. The concluding phrase of the inscription, *Śrī-Śāradāyai namaḥ,* is written in letters of the Śāradā type, a feature which is probably due to the fact that the scribe, Mallaya, was a Kashmiri. The language is throughout Sanskrit, with the exception of the Kannaḍa phrase *gaṁḍarul-gaṇḍa* in l.41, and the number of clerical errors is remarkably small. The composition of the record is in a mixture of verse and prose. This inscription records a grant of the village of Nīlgunda and two adjacent hamlets to a number of Brāhmaṇas by the Western Chālukya king Tribhuvanamalla-Vikramāditya VI made in 1123 A.D. in confirmation of his previous grant made in 1087 A.D.

The record opens with he usual Chālukyan prelude, *Jayatyāvishkṛitam, etc.,* and then, after another verse of benediction, invokes a blessing upon the reigning sovereign. Then begins the pedigree of the Chālukya kings. Fifty-nine kings of the family are said to have reigned in Ayōdhyā and sixteen of them later ruled in the South. After a temporary obscuration, the familys's fortunes were restored by Jayasimha I who overcame

Rāshṭrakūṭa Indra, son of Kṛishṇa, and slew five-hundred other kings. His son was Raṇarāga; his son Pulakēśin I; his son Kīrtivarman I, the conqueror of the Nalas, Kadambas, and Mauryas; his younger brother Maṅgalīśa, who captured the island of Rēvatī and humbled the Kalachuri dynasty, reigning as regent during the childhood of his elder brother's son Satyāśraya (Pulakēśin II). Then came Satyāśraya's son Niḍamari (Neḍamari); his son Ādityavarman; his son Vikramāditya I; his son Yuddhamalla; his son Vijayāditya, the conqueror of four provinces; his son Vikramāditya II; his son Kīrtivarman II under whom the star of the dynasty suffered an eclipse; his brother (Bhīma); his son Kīrtivarman III; his son Taila I; his son Vikramāditya III; his son Bhīma II; his son Ayyaṇa I, who married a daughter of Rāshṭrakūṭa Kṛishṇa III; his son Vikramāditya IV, who married Bonthādēvī, daughter of king Lakshmaṇa of Chēdi; his son Taila II, who conquered Karkara (Karkka II) and Raṇastambha, restored the fortunes of his dynasty, and married Jākabbā, daughter of the Raṭṭa Bhammaha; their son Satyāśraya II; his younger brother Daśavarman (Yaśōvarman), who married Bhāgyavatī; their son Vikramāditya V, who reigned after his father's elder brother; his younger brother Jayasiṁha II, styled Jagadēkamalla and Mallikāmōda; his son Āhavamalla (Sōmēśvara I), who fought with the Mālava, Chōla and Kanauj kings; his son Bhuvanaikamalla (Sōmēśvara II); his younger brother Vikramādity VI, styled Tribhuvanamalla, the donor of the present grant.

After the preamble the inscription states that the king Vikramāditya VI styled *Pṛithvīvallabha, Mahārājādhirāja, Paramēśvara, Paramabhaṭṭāraka,*

Satyāśrayakulatilaka, Chālukyābharaṇa, Tribhuvanamalla, Vallabhanarēndradēva, issued an order regarding the grant of the village contained in the present record, which was addressed to the *Rāshṭrapati, Vishayapati, Grāmakūṭaka, Āyuktaka, Niyuktaka, Ādhikārika, Mahattara* and others who may be associated with the gift land from time to time. The royal order registers the grant of Nīruguṁda-grama[1] (Nīlgunda) in Vikkiga-70 within Kōkali-500[2] in favour of 300 learned Brāhmaṇas of Drāviḍa-dēśa. The grant was made from Kalyāṇapura[3] at the request of Palata-pāṇḍya in the Chālukya-Vikrama year 12, Prabhava of Jupiter's cycle, Pushya *ba.di.*13, Saturday, Uttarāyaṇa saṅkrānti. In the Chālukya-Vikrama year 48, Śōbhakṛit, Bhādrapada *śu.di.* 12 (Śravaṇa-dvādaśī), Monday, the king again granted the village together with Kṛishṇapallikā to the same Brāhmaṇas, whose number rose by now to 500, at the request of Palata-pāṇḍya's grandson Rāya-pāṇḍya, introduced by *Śrīkaraṇādhikārin Sarvādhyaksha* Draviḍāditya when the king was camping at Vaijayantī[4] (Banavāsi). The grant was made with the exemption of *śulka, kara* and *vādhā* (*vishṭi*), with all dues and *nidhi* and *nikshēpa* and *tribhōgābhyantarasiddhi* and making it a *sarva-namsya-śāsana.* The hamlet called Ādityapallikā was granted to the god Bhīmēśvara worshipped in the locality.

It may be noted that on both the occasions the grant of the village was made after having bestowed many great gifts, at the time of dispensation (*mahādānāni dattvā taddakshiṇākāle*). Also the 500 Brāhmaṇa donees were to pay to the owner of the land granted 400 pieces of gold towards quit rent (*piṁḍadāna*).

Talevāgya, Kamaṇḍalukārpāsa, Tilaka and Lākshāgēha are the villages named pertaining to the boundary marks of the grant village. Gajapāshāṇa, Khalvāṭaparvata, Mahishapāshāṇa, Dīrghatuṁgaparvata and Aksharapāshāṇa[5] are the intersting names of the physical features met with in the same context. Likewise, Nāgarasara and Chūtahrada are the two water sources mentioned among the boundaries of the village Ādityapallikā granted for the worship of the god Bhīmēśvara.

This grant to the god Bhīmēśvara was for the purposes of providing perfume (*gandha*), flowers (*pushpa*), incense (*dhūpa*), lights (*dīpa*), offerings (*naivēdya*), worship (*archanā*), restoration of the worn-out parts (*khaṇḍasphuṭitajīrṇōddhāra*), supply of fresh plaster (*navasudhākarma*), for the provision of dancing, singing and instrumental music (*nṛityagītavādyabhōga*), maintenance of temple servants (*pādamūlaparivāra*) and for the purpose of feeding Brāhmaṇas and ascetics (*brāhmaṇatapasvibhōjanārtha*). Further the privileges and exemptions attached to this grant were the same as those pertaining to the grant of the village Nīrgugunda together with Kṛishṇapallikā.

The grant portion is followed by the donor's exhortation to the future rulers for the protection of his gift, and six of the usual imprecatory and benedictory stanzas.

The record concludes with the statement that it was written by *Dānādhikārin* Bhaṭṭa Mallaya-Paṇḍita of Kāśmīra, son of Bhaṭṭa Vilāsa *alias* Aryamasvāmin, with the premission of Vikramāditya, son of Kālidāsa, the

Śāsanādhikārika, *Akshapaṭalika* and *Prachaṇḍa-Daṇḍanāyaka*.

Some of the statements regarding the early history of the family, as given in this record, are imaginary and wrong; *e.g.*, Pulakesin II was actually the father of Vikramaditya I and obtained the throne after killing Maṅgalīśa.

Notes

1. Nīruguṁda-grāma is the modern Nīlgunda itself (*EI.*, XII, p.147).

2. Kōkali-500 is evidently the Kōgali-nād with its chief town Kōgali 15 miles towards the north-east from Harapanahaḷḷi and 22 miles in the same direction from Nīlgunda (*ibid.*, p.148).

3. Kalyāṇapura is modern Kalyāṇi in the Bidar District of Karnataka (*ibid.*).

4. Vaijayantī is the modern Banawāsī in the North Kannada District of Karnataka (*ibid.*).

5. Aksharapāshāṇa may be a rock with letters (writing) on it (*ibid.*, p.146, *n.*1).

******

No.9

GANESHVADI INSCRIPTION OF THE TIME OF CHALUKYA TRIBHUVANAMALLA: Year 24

Location	: Gaṇēshvāḍi, Osmanabad District, Maharashtra
Date	: Regnal year 24 = 1099 A.D.
Script	: Nāgarī
Language	: Sanskrit
King	: Vikramāditya VI
Dynasty	: Chālukyas of Kalyāṇa
Reference	: V.B. Kolte, *EI.*, XXXVIII, pp.289-304

Text

Metre: Vv. 1, 10, 12, 23, 24, 31, 49, 50, 58 *Anushṭubh;* 2-4, 17, 37-39 *Vasantatilakā;* 5 *Mālinī;* 6, 21 *Mandākrāntā;* 7, 8, 19, 20, 22, 25-27, 42, 51, 54, 55, 59 *Śārdūlavikrīḍita;* 9, 11, 13, 18, 44 *Indravajrā;* 36 *Upēndravajrā;* 14-16, 28, 29, 32-35, 41, 45-46, 52, 56 *Upajāti;* 40, 43, 47 *Vaṁśastha;* 30, 57 *Drutavilaṁbita;* 48 *Sragdharā;* 53 *Pushpitāgrā*

स्वस्ति।

समस्तभुवनाश्रयः श्री पृथ्वीवल्लभमहाराजाधिराजः परमेश्वरः परम-भट्टारकः सत्याश्रयकुलतिलकः चालुक्याभरणः श्री मत्त्रिभुवनमल्लदेवः अभिनवविक्रमार्कः तस्मिन्ननेकसुखसंकथाविनोरमनवरतं कल्याणपुरे साम्राज्यश्रियमधिशासति। तन्महाप्रधानः। स्वस्ति समधिगतपंच-महाशब्दः महासामन्ताधिपतिर्महाप्रचंडदंडनायकः शिष्टेष्टजनाभीष्ट-

फलप्रदायकः सत्यनिधानः सौजन्यवनजमार्त्तंडः काश्मीरविषय-मुखमण्डनः स्वामिवंचकशिरःखंडनः श्रीमत्त्रिभुवनमल्लदेवपदाब्जभृंगः साहसोत्तुंग एतन्नामादिसमस्तप्रशस्तिसहितः सौविदल्लानामधिष्ठायकः सर्वाधिकारसंपन्नः श्रीमद्भीमनाथो राज्ञः सकाशात्पिप्पलग्रामं संप्राप्य तत्र ग्रामाभ्यन्तरे भीमसमुद्रतीरे च ब्रह्मविष्णुमहेश्वरादिसमस्त-देवतालयांश्च कारयित्वा तद्देवतानां नित्यनैमित्तिकविशेषपूजाविधानार्थं धूपदीपनैवेद्यादिप्रदानार्थं च चंदनकुंकुमाद्यंगभोगप्रवर्त्तनार्थमपि च तत्रैव सरस्वतीमंडपे तपस्विनां विद्यार्थिनां चान्नदानसंवर्द्धनार्थं स्वस्ति श्रीमच्चालुक्यविक्रमनृपकाले चतुर्विंशतितमे प्रमाथिसंवत्सरे तदन्तर्गत-मार्गशीर्षे मासि पौर्णमास्यां सोमवारे सोमग्रहणपर्वणि मंडल-विधानादिना धारापूर्वकं कृत्वा सर्वनमस्यत्वेन श्रीमत्तत्पुरुषपंडितेभ्यः उज्वलंवायां मानदंडप्रमाणेन पिप्पलग्रामभूम्यां निवर्त्तनानां पंचशत-संख्यया अंकतोपि तत्संख्यया ५०० जलपाषाणसहितां संमितां सुभूमिं प्रादात्। तस्याः पुनराघाटः। दक्षिणतः शिलाकरग्रामसीमा। पश्चिमतः शुष्कग्रामसीमैव। उत्तरतः शुष्कग्रामात्पिप्पलग्रामं गतो मार्ग्गः। ततो ग्रामाद्वायव्यदिग्भागे व्यवस्थितायाः पुष्करिण्याः सकाशाद् ग्रामादाग्नेय-दिग्भागाभिमुखं वक्रं गता भूः। तत्र शिलाशासनं स्थापितं। ततो दक्षिणाभिमुखं गत्वा भीमसमुद्रसन्निहितमहावनादुत्तरतः शिलाशासनं तिष्ठति। ततः पश्चिमाभिमुखं स्रोतो विलंघ्य तत्रापि शासनशिला स्थिता। ततो दक्षिणाभिमुखं शिलाकरग्रामसीमावधिः स्थिता भूमिः। एवं समन्तादाघाटविशुध्यर्थं सर्वासु दिक्षु तत्र तत्र शिलाशासनं

स्थापितमिति। अपि च श्रीभीमनाथो भीमेश्वरदेवानां पुरविधानार्थं ग्राममध्ये निवेशनभूमिं ददौ। तस्याः प्रमाणं। मैलारदेवगृहादुत्तर-दिग्व्यवस्थितपरिसूत्रभित्तिः। पश्चिमाभिमुखं पुरस्य नैर्ऋत्यां दिशि शिलाशासनं स्थितं। तदुत्तराभिमुखं पुरप्राकारसन्निधाने वायव्यतः शिलाशासनं। ततः पूर्वाभिमुखं पुरप्राकाराद्बहिरैशान्यां दिशि पुरप्राकारसंश्लिष्टशासनं। ततो दक्षिणाभिमुखं पुरद्वाराद्दक्षिणदिग्भागे प्राकारसन्निधौ आग्नेय्यां दिशि शिलाशासनमेवं पुरस्य सर्वासु दिक्षु शासनं स्थापितम्। पुनरपि

स्वस्ति श्री ॥

ये संसारसमुद्रस्य पारं संतो यियासवः।
ते शिवलिंगिसंतानशासनं पालयंत्विदम्॥ १ ॥

ओं नमः।

उत्क्षिप्तभूमिरवताद्भवतो विपत्तेः
श्रीमानचर्यचरितः स महावराहः।
यत्कोपवह्निरसुरेन्द्रवनान्यधाक्षी
द्वृंदारकानिलवैः परिवर्द्धमानः॥ २ ॥

अव्याद्गणाधिपतिरर्च्चितपादपीठो
विघ्नोपशांतिकरणेप्सुभिरार्यवर्यैः।
सिंदूरपंजरसमुन्नतकुंभभित्ति
रुत्तंसितेंदुशकलस्य सुतश्चिरं वः॥ ३ ॥

श्रीमच्चलुक्यनृपवंशसमुद्भवोभू

दुद्गीयमानचरितः कविबंदिवृंदैः ।
श्रीविक्रमार्क इति विश्रुतचारुनामा
रामाविकाशिनयनोत्सववत्सलश्रीः ॥ ४ ॥
विविधफलविधाता सज्जनानां य आशी
र्वचनसलिलसेकोद्भूतशाखासहस्रः ।
विमलतरविसर्पत्कीर्त्तिवल्लीवितानः
सुरतरुरिति लोकैः शंकितस्त्यक्तनाकः ॥ ५ ॥
यः साम्राज्यं जलधिपरिखामेखलालंकृतोर्व्यां
चक्रे क्रांताखिलरिपुगणो विप्रवर्याभिषिक्तः ।
एकच्छत्रं सुरपतिरिव स्वर्गलोके फणींद्रः
पाताले वा परिसरवधू लोचनाघातपात्रम् ॥ ६ ॥
प्रत्यर्थीक्षितिपालचक्रमसकृन्निर्मथ्य यस्याहवे
विश्राम्यद्भुजयोः कृपाणलतिकाकांतिच्छटासंक्रमः ।
कृत्तानेकशिरःसरोरुहलुलन्मालारजःपिंजरो
रेजे स्वःसरितो यम स्वसुरिवात्यंताद्भुतः संगमः ॥ ७ ॥
अर्थादानविवारकः परिजनान् प्रीतिं परां प्रापय
न्नौदार्याहवयोर्य एव निलयो रक्षन्प्रजाः सर्वतः ।
धर्म्मैकप्रतिभूरगम्यमहिमा दुष्पारगंभीरिमा
तस्यासीदपरच्छलेन हृदयं श्रीभीमसेनापतिः ॥ ८ ॥
तस्य प्रधानं विजितप्रधानः सेनाप्रधानं विदुषां प्रधानम् ।
धर्मप्रधानं जगतां प्रधानं श्रीभीमनाथः समभूद्यशस्वी ॥ ९ ॥

ब्रह्मणो मानसः पुत्रः ऋषीणां सप्तमो मतः ।

अत्रिर्धर्मस्य संपत्तिर्यद्गोत्रादिरभून्मुनिः ॥ १० ॥

सेव्यं मुनींद्रैर्विदितात्मतत्त्वैर्यद्गोत्रमात्रेयमतीव रम्यम् ।

विद्वत्प्रकांडैर्बहुपुण्यभाग्भिरारब्धमत्यर्थफलस्य सिद्ध्यै ॥ ११ ॥

हिमाचलसमुत्पन्ना यस्य वंशावलिर्बभौ ।

द्विजध्वनितघोषेण पूरिताशेषदिङ्मुखा ॥ १२ ॥

आदित्यभट्टो विदितात्मशास्त्रो वेदार्थविज्ञानपरः शुचिश्च ।

लोकस्तुतो यत्प्रपितामहोभूत्कश्मीरदेशेष्वतिधर्मनिष्ठः ॥ १३ ॥

महाध्वरध्वस्तसमस्तपापो गार्हस्थ्यधर्मप्रथितप्रभावः ।

तुष्यद्वितस्तात्पवितस्तिनाकः पिनाकितोषाप्तकुलर्द्धिवृद्धिः ॥ १४

पितामहो यस्य बभूव भूमौ श्रीशीयुभट्टः शुचिधर्मकर्मा ।

हुताग्निहोत्रस्त्रिजगत्पवित्रः संत्रासिताघस्त्रिदिवाप्तकीर्त्तिः ॥ १५ ॥

श्रीवल्लभट्टो गुणरत्नभूमिः पिता बभूवोच्चयशःपताकः ।

संसारपाथोनिधिपारयानप्लवोस्य सद्गोत्रपरंपरायाः ॥ १६ ॥

धीभंगिसंगलहरीहतपापकूलो

गांभीर्यवान् सुकृतिभिः परिसेवितात्मा ।

सन्मार्गमार्गनिरतोतिपवित्रचर्यो

गंगाप्रवाह इव पूरितधर्मपाथाः ॥ १७ ॥

शौर्याकरश्चंद्रकलाकलावि

लब्धोदयो भानुपदार्चनेन ।

लक्ष्मीप्रियो नाशितशत्रुचक्र

आक्रांतलोकत्रितयप्रतापः ॥ १८ ॥

मेरौ किंनरनायिकाः सुरपतेरास्थानसंस्थाः पुरः
पातालेप्यहिकन्यका अहरहः क्षित्यां क्षितीशांगनाः ।
कीर्त्तिर्यस्य जनप्रियस्य विततां श्रीभीमसेनापते
र्नीहारेंदुसितारविंदधवलां गायंति गीतैर्मुहुः ॥ १९ ॥

गांभीर्येण महोदधिः सुदयया साक्षाच्च धर्मात्मजः
शौर्येणार्जुन विक्रमो रविनिभः शाश्वत्प्रतापोदयैः ।
शैत्येनेंदुसमानशीलनिलयः क्षांत्या पृथिव्या समः
श्रीमान्भीमचमूपतिः समभवत्सर्वस्य हर्षोदयः ॥ २० ॥

वाग्भिः कीर्त्तेस्त्रिभुवनपदारोहनिःश्रैणिकाभि
स्तत्त्वार्थत्वात्सकलविदुषो भीतिदत्वाध्वषश्च ।
प्रीतिप्राप्तेः क्षितिपतिममुं घूर्णयन्नर्णवाभं
आस्थाने यो वदति महति क्ष्माभृतां सभ्यशोभ्ये ॥ २१ ॥

आरात्संगतमानसं च सुमहत्पद्माकरोल्लासितं
गौरीवीरवतां सभा सुमनसां गर्जन्वृषो वर्त्तते ।
भीमे बिभ्रति भूभृदिंद्रभवने सान्निध्यमत्यद्भुत
न्नासीच्छक्तिधरा विनायक इतो भूतानि सम्यङ् न च ॥ २२ ॥

यस्मिन्घोरभयागारे प्रेतसंघाः परस्परम् ।
युद्धे युध्यति युध्यन्ति रक्तमांसाभिलाषिणः ॥ २३ ॥

शास्त्रे धर्मे सुरार्च्चायां सदाचारे सदक्षिणे ।
राजकार्ये सतां कार्ये समोत्कर्षान्मुनिः स्फुटम् ॥ २४ ॥

सर्वाशाः परिपूरयन्बहुविधस्वर्णांबुधारोत्करै

र्धाराधारमजीजयत्त्रिभुवने सत्वात्तपोन्तं ततः ।

कुर्वन्क्ष्माधरमंकुरैरतिमुदः प्रोज्जृंभितं सत्फलैः

सार्द्धंविद्रुतदुष्टजंतुनिकरं रात्रिन्दिवं सर्वदा ॥ २५ ॥

पृथ्वीं व्याप्य विभावरीमिव शशी यत्कीर्त्तिपुंजः स्फुर

न्देवाधीशनिकेतनं प्रति ययौ तत्राप्यमी नागतः ।

नागेन्द्रालयमप्यपूरयदनावाप्तावकाशस्तत

स्तत्स्थवुच्यलितः पयोंबुधिलुलद्वेलानुकारं दधन् ॥ २६ ॥

औदार्यं कृपणेषु शौर्यमरिषु प्रत्यग्रता कर्मणि

प्रौढिर्वाच्यभिरामता च वपुषि श्वैत्यं यशस्युन्नतै ।

रूढिः सर्वजगत्त्रये चतुरता बुद्धिक्रमे विक्रमे

शुच्यत्वं नितराममी गुणगणा एतेषु यस्यासत ॥ २७ ॥

विधर्ण्णयन्संसदि सभ्ययोधान्

व्यूढेप्यरंध्रं नृपनायकेन ।

अन्तःस्पृशो योसृजदुक्तिकांडान्

सपक्षबृत्तीन्सफलानशंकः ॥ २८ ॥

सा दिङ्न जाता न जनिष्यते या

तस्यातिदुःसाधतया प्रतीता ।

चरित्रसंचारिगुणो यदीयो

प्यपूरयद्ब्रह्मसदः समस्तम् ॥ २९ ॥

विबुधवर्यवने विहरन्मुहुः

कृतकबाणगणं विससर्ज यः ।

सपदि कृष्णमृगं चपलाकृतिं

प्रतिवचो मृगयुर्विजिघांसया ॥ ३० ॥

लक्ष्मी विष्णोर्यशः शंभोर्गांभीर्यं च पयोदधेः ।

क्षमां क्षोण्या जहारान्यैः सत्यमेषु तु याच्यते ॥ ३१ ॥

कृते दितिर्वीरसुता बभूव त्रेतायुगे रामनृपस्य माता ।

या देवकी द्वापरगोचरा सा जयावती यज्जननी कलौ च ॥ ३२ ॥

श्रीमत्यभूज्जोगलदेविकाख्या ख्यातावदातार्जितदानकीर्त्तिः ।

विभूषयंती वपुषोर्द्धमस्य बभावुमेवेंदुकलाधरस्य ॥ ३३ ॥

पतिव्रता धर्मपरातिरम्या धर्मार्जिता धर्मरतात्तधर्मा ।

विचित्रचारित्रविशुद्धकीर्त्तिः श्रीजोगवा यस्य बभूव पत्नी ॥ ३४ ॥

पद्मेव विष्णोर्भुवनाधिपस्य शंभोरुमेवामितविक्रमस्य ।

रतिश्च कामस्य हरेः शचीव हिमांशुबिंबस्य च रोहिणीव ॥ ३५ ॥

कृतोपकारा बहुभिः प्रकारैरुदारतारापतिकांतवाग्भिः ।

अनुग्रहेणात्मपरिग्रहस्य महीतलव्यापिमहागुणौघा ॥ ३६ ॥

मेधंकरे विबुधवर्यगणोपसेव्ये

यो भीमविक्रमसमाख्यविशालशालाम् ।

निर्माय केशवपितामहरुद्रमूर्त्तीः

संस्थाप्य पिप्परिकखेटमदादमूभ्यः ॥ ३७ ॥

गौदावरीसलिलधौतमहौघसंधे

नांदीतटे त्रिपुरुषैः कृतसुप्रतिष्ठाम् ।

चक्रै प्रतापनवभीमसमाख्यशालां

ग्रामं ददौ विपुलवैभववग्धिकाख्यम् ॥ ३८ ॥

योसौ महन्निजभुजोद्बलभीमनाम

विष्णोश्चकार सदनं भुवनाचले च ।

भीमांकनाम विकसद्यशसां निधानं

चक्रे तथा शिवपुरे शिवकीर्त्तनं यः ॥ ३९ ॥

चकार भीमेश्वरदेवतालयं

कल्याणपुर्युन्नतिचित्रसुज्ज्वलम् ।

मुरुंबिकाग्राममदात्सविस्तरं

चकार कल्लुंब्बरकेपि यः सरः ॥ ४० ॥

स पिप्पलग्राममवाप्य राज्ञो ज्ञानामृतक्षालितकल्मषेभ्यः

भुवं ददौ धर्मपरो द्विजेभ्यः पदं स्वकीर्त्तेरिव विस्फुरंत्याः ॥ ४१ ॥

चक्रे यस्त्रिविलोचनत्रिवदनैः स्फूर्जन्मणिज्योतिषा

विभ्राजन्मुकुटत्रयैः सद्यशतां बिभ्रज्जनैरर्च्चितम् ।

देवानां निलयत्रयं स्वयशसो निश्रेणिकासन्निभं

प्रत्यग्राहवभीमसंज्ञमपि च प्रादात्सहस्रं भुवः ॥ ४२ ॥

भीमार्कनामापि च देवतालयं

चकार रोचिःपरिपूरिताचले ।

भानोः समानं कनकोज्ज्वलश्रिया

प्राचीगिरेः शृंगरुचा विचित्रया ॥ ४३ ॥

स निर्ममे भीमसमुद्रनाम तडागमादर्शमिव स्वकीर्त्तेः ।

कदाप्यसंक्षोभ्यसमुद्रमुद्रां बिभ्रत्स्वपुण्येंदुसमृद्धिवृद्धिम् ॥ ४४ ॥

विघ्नस्रवंतीपतिपारतारं सेतूपमं भीमबलाभिधानम् ।

हेरंबधामापि विनिर्ममे सः समार्पयच्चापि शतं पृथिव्याः ॥ ४५ ॥

स क्षेत्रपालस्य चकार धाम

भीमायुधाख्यं स्वतडागतीरे ।

वाप्यामपि द्वादशदेवतानां

चकार धामान्यपरां च वापिम् ॥ ४६ ॥

चंड्याः करोत्संगकृपाणपाटव

प्रपिष्टमाद्यन्महिषासुरद्विषः ।

चंडारिभीमाभिधमोक उच्चकै

श्चकार भूमेः स ददौ शतं ततः ॥ ४७ ॥

यत्र क्वाप्यस्ति तीर्थं महदपि नगरं यत्र चास्ते स्वदेशे

योसौ सत्राणि चक्रे प्रतिपदमनिवार्याणि सर्वासु दिक्षु ।

यद्दत्ताचावपूर्ण्णा द्विजवरनिकरा बुद्धवेदार्थशास्त्रा

जायन्तेभीष्टरूपाः परिचितपरमब्रह्ममार्गा विपापाः ॥ ४८ ॥

होमधूमलता यस्य विप्रमंत्रावनीरुहा ।

यशः पुंजप्रसूनाढ्या सदा नवफलाकुला ॥ ४९ ॥

यदन्नभोजनैः पूताः विप्रा भुवि सहस्रशः ।

ध्रियंतेमररामाभिव्याकुलाभिरभीप्सुभिः ॥ ५० ॥

अंतो नास्ति परोपकारकरणे श्रीभीमसेनापते

र्येनापूरि सुवर्ण्णलक्षनिकरैः श्रीविक्रमार्को नृपः ।

तस्यैवं प्रगुणं गुणेषु गणनां कर्त्तुं समीहे परं

भूयस्त्वादतितुच्छतः स्ववचसो वक्तुं न शक्नोम्यहम् ॥ ५१ ॥

यावन्नभो यावदयं विरिंचि

र्यावन्मृडो यावदसौ च कृष्णः ।

तावज्जनश्रोत्रसुखावहास्तां

दिगर्पिता स्वस्तिमतः प्रशस्तिः ॥ ५२ ॥

मदमुदितकवींद्रवृंददन्तिदलनहरिः सकलार्थशास्त्रदृष्टः ।

सुललितकवितानखस्तदीयसूनुकृत कृतिं नवकालिदास एनाम् ॥ ५३ ॥

इति प्रचंडदंडनायक श्रीभीमनाथसूनुः । सूरिजनवृंदानंदसंदोहदः गुरुचरणसपर्यापरायणः कवींद्रकुमुदिनीचंद्रः ऋग्वेदचूडामणिः अभिनवकालिदासः कालिदासदंडनायकश्चकार प्रशस्तिमिति शुभम् ॥

ओं नमः ॥ स्वस्ति ॥ यमनियमस्वाध्यायध्यानधारणमौनानुष्ठानजप-समाधिषडंगोपहारादिसंपन्नाः अनेकतर्कादिशास्त्रपारावारपारगाः अवदा-तकीर्त्तिध्वजाः अमलिनचरित्राः दुष्टदर्पिष्ठपंडितगलकालपाशा वादि-दिगंबरमहाबौद्धकुलधूमकेतवः पर्वतावल्यां कालमुखतपोधनाग्रगण्याः किव्वग्रामकृताधिवास श्रीमन्महाशिवलिंगिसंतानकुमुदिनीलसन्निशाकराः प्रत्यक्षरुद्रमहिताः श्रीमद्वादिरुद्रपंडिताः ॥

तेषामेव कीर्त्तिः ।

काणादे कणभुग्बृहस्पतिमते वाचस्पतिः कापिले

मार्ग्गे यः कपिलः स्वयं सुगदिते योसौगते सद्गुरुः ।

मीमांसाधिगमे स जैमिनिमुनिन्यायिक्षपादः कृती

शब्देजो लकुलीश्वरो विजयते शैवे शिवः सांप्रतम् ॥ ५४ ॥

तच्छिष्याः श्रीमल्लकुलीश्वरागममानससरोवरराजहंसाः सरस्वतीश्रवण-भूषणावतंसाः कलिकालभयपलायितधर्मशरणाः गुरुकुलसमुद्धरणाः यमनियममहीरुहालवालस्फालवालसमुचितकलाः धारणाजपसमाधि-विधिनिपुणाः संसारभयहरणाः गुरुजनकृतविनयाः भूषितनिजसमयाः बुधजनकृतपक्षाः तर्कादिशास्त्रदक्षाः सततवीतरागाः परहितभवभोगाः भारतीकर्ण्णपूराः नरकभयदूराः त्रिभुवनविदितकीर्त्तयः महेश्वरमूर्त्तयः महापुरुषकृतभक्तयः श्रीमत्क्रियाशक्तिपंडितदेवाः ॥

तदनुजाः ॥ स्वस्ति । समस्तलोकसंस्तूयमानगुणमणिगणमरीचि-मालालंकृताः समस्तलोकसंस्तुताः पार्वतीमातारमणचरणयुगलारविंद-मधुकराः दशधर्मनिर्मलरत्नाकराः दिंडीरपिंडपांडुरयशःसुधाधवलिता-जांडमंडलाः भारतीकर्ण्णकुंडलाः विबुधजनवनजमार्त्तंडाः समुदितमदन-मदविदलनप्रचंडाः लाकुलागमसरोजिनीराजहंसाः निजसमयावतंसाः कलिमलकलंकपंकांकविरहिताः विद्यान्नदानविनोदाः समस्तमुनिजन-परिरक्षणकृतिसंपादिताह्लादाः शिवलिंगसंतानकुमुदिनीलसन्निशाकराः श्रीमत्त्रिलोचनाचार्यपंडिताः ॥

स्वस्ति । यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधिविधि-संपन्नाः अनेकतर्कसिद्धांतादिशास्त्रपारावारपारगाः कविगमकवादिवाग्मि-तासंपदाधाराः समस्तदिगन्तराप्तकीर्त्तिध्वजाः अनवरतविद्यान्नदान-केलीविनोदाः विद्वज्जनकुमुदिनीलसच्चन्द्राः अगण्यपुण्यान्विताः प्रवर मुनिगणाग्रगण्याः गुरुजनपदांभोजयुगलषट्चरणाः लाकुलागमसमय-

समुद्धरणाः सकलमुनिजनसमाजाश्रयाः आश्रितजनकल्पवृक्षाः पवित्रित-निजसमयसत्त्वाः सम्यग्विदितात्मतत्त्वाः परिचितस्वर्ग्गापवर्ग्गमार्ग्गाः विगतदोषसंसर्ग्गाः करुणामृतरसार्द्रचित्ताः अत्यंतपरहितप्रवृत्ताः समस्तगुणगणावासाः महेश्वरदासाः श्रीमद्भारतीकर्ण्णपूरनाम्नां क्रियाशक्तिमहामुनीश्वराणां शिष्याः श्रीमत्तत्पुरुषपंडिताः ॥

आरामैर्व्विविधैस्तडागनिवहानत्यंतसंशोभिता
न्देवानां निलयाननंतविभवान्विद्यान्नदानान्वितान् ।
आवासान्व्रतिनां विमानसद्दशांश्चक्रे समंतात्कृती
श्रीमांस्तत्पुरुषो मुनिर्द्दशदिशाव्याकीर्ण्णकीर्त्तिध्वजः ॥ ५५ ॥

समस्तशास्त्रागमपरादृश्वा शिष्टार्थिविद्वज्जनकल्पवृक्षः ।
विचक्षणांभोजवनैकभास्वान्विराजते तत्पुरुषो मुनीशः ॥ ५६ ॥

जयति सज्जनसूरिसुसंगमैर्द्विजवरैर्मुनिभिः परिसेवितः ।
विविधपुण्यनिधिः शुभतीर्थतां दधदसाविह तत्पुरुषो मुनिः ॥ ५७ ॥

यमादिधर्मसंपन्नो मुनीनां प्रवरो महान् ।
सर्व्वविद्यागुणाधारः श्रीकंठो मुनिरुद्ययौ ॥ ५८ ॥

कारुण्यामृतशीकरैर्भवमरैः संतापितप्राणिना
माह्लादं जनयन्नभीप्सितफलं संप्रापयन्नर्थिनाम् ।
यो विद्वद्गुरुमोक्षरक्षणपरो विद्यान्नदानान्वितः
सोयं भाति यमादिधर्म्मनिरतः श्रीकंठनाथो मुनिः ॥ ५९ ॥

ओं नमः ॥

Summary

This inscription, engraved on two stone slabs, consists 154 lines of writing in all. The writing is well-executed and well-preserved. The text of the inscription is in prose and verse. The record belongs to the time of Chālukya king Vikramāditya VI, and records several pious deeds, such as gift of land, erection of temples, *etc.*, performed by the emperor's Chief Minister Bhīmanātha.

The record opens with the introduction of Tribhuvanamalladēva which was another name of the Chālukya emperor Vikramāditya VI. He is endowed with the usual titles beginning with *samastabhuvanśraya, etc.* Thereafter, the inscription introduces the emperor's Chief-Minister Bhīmanātha by name. Lines 7-11 furnish his titles. It is stated that he got the honour of the *Paṁcha-mahāśabda* and bore distinctive titles like *Mahāsāmantādhipatī* and *Mahāprachaṇḍa-daṇḍanāyaka.* He was an ornament on the face of Kāśmīra, that is to say that he originally belonged to Kashmir. He has also been referred to as *Sauvidallānām=adhishṭhāyakaḥ* (*i.e.* an Officer of the service in the harem). He is mentioned as one who beheaded those who betrayed his master (*vaṁchakaśiraḥkhaṇḍana*).

The first section of the record states that Bhīmanātha obtained from the king the village Pippalagrāma,[1] where he costructed temples of all the gods including Brahma, Vishṇu and Mahēśa. For the maintenance of and daily worship of these temples, and also for feeding the students residing in the Sarasvatī-maṇḍapa, he made a gift of land measuring 500 *nivarttanas* from the village Pippalagrāma on Monday, the

full-moon day, when there was a lunar eclipse in the month of Mārgaśirsha of the cyclic year Pramāthin in the 24th regnal year of king (ll.14-29). The boundaries of the land are mentioned in ll. 30-42. He also gifted out some land for residential purpose in the village itself, the boundaries of which have been mentioned in ll.44-52. The name of the donee is Tatpurusha-paṇḍita whose spiritual lineage is given in section three dealt with below.

The second section of the inscription in ll.53-116 is in verse, except the text in ll.113-116. It commences with a verse in praise of the Śivaliṁgisaṁtāna-śāsana (v.1) and the incarnation of Mahāvarāha (v.2) and of Śrī-Gaṇēśa (v.3). Verses 4-7 contain conventional praise of the Chālukya king Vikramārka, *i.e.,* Vikramāditya VI. Thereafter Bhīmasēnāpati is introduced as the Chief Minister of the king and as having attained highest position among ministers, learned men, religious personalities, *etc.,* (vv.8-9). Then follows the genealogy of Bhīmanātha. He belonged to the Ātrēya-*gōtra* (vv.10-11). His forefathers hailed from Himāchala, *i.e.,* Himālaya mountain (v.12). Āditya-bhaṭṭa, a scholar, renowned for his Vedic and philosophical studies, was the great-grandfather of Bhīmanātha (v.13), and he was devoted to the god Pināki (*i.e.,* Śiva) on the banks of the Vitastā[2] (v.14). Śiyu-bhaṭṭa, the son of Āditya-bhaṭṭa was the grandfather of Bhīmanātha and was an *agnihōtrin* (v.15). Valla-bhaṭṭa, the son of Śiyu-bhaṭṭa was the father of Bhīmanātha (vv.16-18). Next comes his eulogy of a conventional type. His fame was spread over all the three worlds (v.19). His qualities of head and heart have been described (v.20). His erudition and elocution are described (vv.21-22). His valour on battle-field is praised

(v.23). He has been described as a veritable ascetic (v.24). The next three verses are also of conventional type. The next 3 verses describe his qualities of debate and quick-wittedness. His mother's name was Jayāvatī (v.32). Jōgaladēvī also called Jōgavā was the wife of Bhīmanātha (vv.34-36).

Verses 37-51 refer to the pious deeds of Bhīmanātha which may be enumerated as fallows; He built a big hall called Bhīmavikrama at Mēghaṁkara[3] and installed the images of Kēśava, Pitāmaha and Rudra, for the maintenance and worship of which he granted the village Pipparikhēṭa[4] (v.37). He built a temple called Pratāpanavabhīma at Nānditaṭa[5] on the bank of the river Gōdāvarī and installed therein the shrines of Tripurusha, *i.e.,* Brahmā, Vishṇu and Mahēśa, for the maintenance and worship of which he donated the village Vagghikā[6] (v.38). He constructed the temple of Vishṇu named Bhīma at Bhuvanāchala.[7] At Śivapura[8] he constructed a temple of Śiva called Bhīmēśvara (v.39). He built a temple for Bhīmēśvara at Kalyāṇa[9] and granted the village Muruṁbikā,[10] evidently for its maintenance. He constructed a lake at Kalluṁbaraka[11] (v.40). He obtained Pippalagrāma from the king from which he granted some land to the religious Brāhmaṇas (v.41). At Pippalagrāma he constructed a three-celled temple (*nilaya-trayaṁ*) of Trilōchana (Śiva) and donated 1000 *nivarttanas* of land (v.42). There he built another temple of the Sun god called Bhīmārka, a lake named Bhīmasamudra, a temple of Gaṇēśa named Bhīmabala and donated 100 *nivarttanas* of land for its maintenance (vv.43-45). He also constructed the temple of Kshētrapāla named Bhīmāyudha on the bank of Bhīmasamudra and two wells with niches

for twelve deities in one of them. He also built the temple of Chaṇḍī and donated 100 *nivarttanas* of land for its maintenance (vv.46-47). He performed sacrifices in all important cities of his country, where religious Brāhmaṇas were fed in abundance (vv.48-50). In fact, there was no limit to the pious deads and donations of Bhīmanātha, who had filled the treasuries of the king Vikramārka by lakhs of gold coins and, therefore, it was impossible to enumerate his high qualities and describe them in words (v.51). Thus ends the main portion of the *praśasti.*

Verse 53 and the prose portion following it inform that this *praśasti* was composed by Kālidāsa-daṇḍanāyaka, who was the son of Bhīmanātha, the hero of the *praśasti.* He had several virtues, was well-versed in the Ṛigvēda and he was known as Abhinava-Kālidāsa.

The third section of the record in lines 117-54, in prose and verse, describes the spiritual lineage of the *āchārya* Tatpurusha-paṇḍita, who was the chief of the Sarasvatī-*maṇḍapa* and the priest in the temples built by Bhīmanātha at Pippalagrāma. The section opens with the word *'ōṁ namaḥ'* and then gives details of the spiritual qualities of Vādirudra-paṇḍitaa, who was the foremost among the Kālamukha sect of the Parvatāvalī school, who was learned in various religious sciences including the science of logic, expert in debates and destroyer of the Jainas and Buddhists. A resident of Kiṁvagrāma, he was a promotor of Śivaliṁgi-santāna and was esteemed by Rudra Himself. Verse 54 states that he was well-versed in all the disciplines of philosophy and was Lakūlīśvara himself in the Śaiva system of philosophy. He was an

adept in all the *Yogic* practices, *viz.*, Yama, Niyama, *etc.*, enjoined by the Lākul-āgama.

Vādirudra-paṇḍita had a disciple named Kriyāśakti-paṇḍita, whose various qualities are described in ll.124-30. His other name seems to have been Bhāratī-Karṇṇapūra. His eruditon in the doctrine of Lakulīśvara, *yōgic* practices, humble nature, tranquility of mind, *etc.*, are mentioned. Kriyāśakti had a younger brother called Trilōchanāchārya. His virtues are mentioned in ll.130-37. He was also well-versed in the Lākulāgama and an ardent devotee of Śiva. Then the pontiff Tatpurusha-paṇḍita, a disciple of Kriyāśakti-paṇḍita is introduced. He was also well-versed in different philosophies and was a great poet and a debator. Verses 56-57 describe his various qualities of head and heart. He is credited with the construction of lakes, temples and hermitages for ascetics. He was highly meritorious and like a great *tīrtha* (ll.146-48). Thereafter follows the description of Śrīkaṇṭhamuni, who was, probably, a disciple of Tatpurusha-paṇḍita and attained chief priesthood after him. This description is only a praise of highly conventional type without reference to specific qualities or achievements of the individual concerned (vv.58-59).

This inscription is important as it refers to the chief place or *maṭha* at Pippalagrāma which belonged to the Śivaliṁgi-santāna of th Parvatāvalī sect of the Kālamukha school of the Lakulīśvara system and to the line of pontiffs of the same.

Notes

1. Pippalagrāma is the modern Hippalagāon of the Osmanabad District in Maharashtra (*EI.*, XXXVIII, p.294).

2. Vitastā is the same as the modern Jhelum (*ibid.*).

3. Mēghaṁkara is the modern Mehakar in the Buldana District of Maharashtra (*ibid.*).

4. Pipparikhēṭa may be identified with the present Pimparakhēḍ at a distance of 25 kms. south-east of Mēhakar (*ibid.*).

5. Nāndītaṭa is the present Nanded, a District place in Maharashtra (*ibid.*).

6. Vagghikā can certainly be identified with the village Wāghi on the bank of the Gōdāvarī about 6 kms. west of Nāndēḍ (*ibid.*).

7. Bhuvanāchala may be identified with a village Bhuvana in the Parbhani District of Maharashtra (*ibid.*).

8. Śivapura could be the present Shivapūr in the Aurangabad District of Maharashtra (*ibid.*).

9. Kalyāṇapurī is the same as the present day village in the Bidar District of Karnataka (*ibid.*).

10. Muraṁbikā may be the present Murum in the Osmanabad District of Maharashtra (*ibid.*).

11. Kalluṁbaraka may be the village Kalaṁbar in the Nanded District of Maharashtra (*ibid.*).



No.10

BHOR STATE MUSEUM PLATES OF KHAMBHA II SAKA 1001

Location	: Bhor, Poona District, Maharashtra
Date	: Śaka year 1001 (1079 A.D.)
Script	: Nāgarī
Language	: Sanskrit
King	: Khambha II
Dynasty	: Chālukya
Reference	: Alteker, A.S., *EI.*, XXII, pp.186-91

Text

Metre: Vv. 1-3, 11 *Upajāti;* 4 *Śārdūlavikrīḍita;* 5, 6 *Indravajrā;* 7, 8 *Rathōddhatā;* 9, 10 *Anushṭubh;* 12 *Śālinī;*

ओं स्वस्ति ।

श्रीशक एकोत्तरसहस्र अंकतोपि १००१ नृपकालातीतसिद्धार्थसंवत्स-
रांतर्गतज्येष्ठपौर्ण्णमास्यां शनिदिने अद्यैतस्मिन्काले समधिगत-
पंचमहाशब्दमहामण्डलेश्वरं सिरिवलयपुरवराधीश्वरं चालुक्यकुलकमल-
मार्त्तण्डं वैरिदलगण्डं धर्मावतारं हरिश्चंद्रगणावतारं समस्तराजावली-
विराजमानमहामण्डलेश्वरश्रीखंभदेवराजविजयराज्यमुत्तरोत्तराभिवृद्धिप्रव
र्द्धमाने विङ्गमहास्थानं हस्तोदकपूर्वकं समस्तदण्डदोषसहितं अर्थार्थसं-
बद्धं सर्व्वाहवाइसुर्युतपेवरिलपुइलतेलादिमाङ्गलिककारुकदेणें एवमादि-
समस्त आचंद्रार्कप्रतिपालनीयम्। अकुंठितपुण्यं राजदर्शनं। एतस्मिन्
काले कुमाजेसिंघ अमात्यकेसरिसाहणीजेखंभसाहणीचाचुसामंतकोत-

लिठाकुरमामलुपरबलुआमैयअमात्यसिद्धमुप्रधानुमुंजेयमहाराज्ञीश्रीसिरि-

यादेव्या अमात्य सोमनाथैया राणीमहलादेव्या लैयादरा दंडनायकसिंह

एते पंचप्रधानाः ॥

चालुक्यवंशे वितते पृथिव्यां सबाहुवीर्योर्जितराजशब्दः ।

देशे पुरा श्रीवलयाभिधाने खंभाभिधानो नृपतिः किलासीत् ॥ १ ॥

अरिंदमः पालयिता प्रजानां धर्मेण साक्षादिव धर्मराजः ।

गुणैः प्रजारंजनतत्परोभूत्तैलप्पराजः किल तस्य पुत्रः ॥ २ ॥

तैलप्पसूनुः पुनरेव खंभः प्रतापसंतापितशत्रुवर्ग्गः ।

अनेकशो येन रणे रिपूणामानर्तितानीह कबन्धकानि ॥ ३ ॥

मूर्त्यापास्तमनस्विनीजनमनः कंदर्पदर्पस्फुर

तेजःपुंजनियोजिताखिलजगद्दीपप्रभामण्डलः ।

खड्गाखण्डितवैरिवारणघटाकुंभस्थमुक्ताफलः

कीर्त्याक्रांतजगत्त्रयो विजयते खंभस्त्रिलोकीप्रियः ॥ ४ ॥

रामादिदत्तं किल पूर्वमासीद्विङ्गं महास्थानमिदं द्विजानाम् ।

खंभेन राज्ञा तु पुनर्नमस्यं दत्तं कृतं शासनमेवमुक्त्वा ॥ ५ ॥

अस्मत्कुले यो भविता नरेन्द्रः पुष्पैरसूत्रग्रथितैः स दृष्टः ।

मच्छासनादित्थमिदं भवद्भि र्वाच्यं स्वधर्मं प्रतिपालयेति ॥ ६ ॥

अन्यदत्तमथवा स्वयं कृतं ब्रह्मदायमिह यस्तु पालयेत् ।

आत्मवंशमखिलं समुद्धरेत् कीर्त्तिमानिह परत्र पार्थिवः ॥ ७ ॥

धर्म एष नृपतेः सनातनी यत्प्रसाध्यः खलु वैरिमण्डलम् ।

पालयत्यखिलमात्ममण्डलं ब्रह्मदायसहितं नरेश्वरः ॥ ८ ॥

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम्।

षष्टिं वर्षसहस्त्राणि विष्ठायां जायते कृमिः ॥ ९॥

बहुभिर्वसुधा भुक्ता राजन्यैः सगरादिभिः।

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥ १०॥

निशम्य दोषं हरणे महान्तं गुणं च भूमेरनुपालने तु।

दत्तं नरेन्द्रैः प्रतिपालनीयं श्रेयो हि दानादनुपालनं तु॥ ११॥

सामान्योयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः।

सर्वानेतान्भाविनो भूमिपालान् भूयो भूयो याचते रामभद्रः॥ १२॥

श्रीकुंभदेवभट्टगंगलदेवप्रमुखेभ्यः विङ्कमहास्थानसर्वनमस्यशासनं खंभ-

राजेन दत्तम्॥ मङ्गलं महाश्रीः॥

Summary

This inscription, engraved on a set of 3 copper-plates, consists 43 lines of well-executed and fairly preserved writing. The bell-shaped seal attached to the ring that held together the plates bears the figure of a lion in the round crudely executed. The language of the record is Sanskrit. Besides liberal use of Prakrit terms the text also contains several syntactical anomalies. In the metrical portion the language is fairly correct, but not a single line of the prose portion is without syntactical mistakes. Certain glaring grammatical mistakes add to the difficulty in properly understanding the text. Most of these mistakes are assignable to the draftsman and not to the engraver.

This inscription records the grant of a village to its Brāhmaṇa community.

The format of this charter is unique in the sense that it does not conform to the set pattern in which almost all land grants are drafted. In this charter after the mention of the date, we have the description of the donor followed by the description of the grant. Then come the names of the five ministers of the donor followed by his own genealogy. Then come imprecatory verses, and at the fag-end of the charter we have donees' names added like an after-thought.

The charter opens with the date when it was issued, *viz.,* Śaka year 1001 (elapsed), named Siddhārtha, on the full-moon day of the month of Jyēshṭha which fell on a Saturday, corresponding to the 18th of May 1079 A.D.

The donor of the present charter belonged to a feudatory Chālukya family, ruling at Śrīvalaya or modern Shirvaḷ, a large village about 32 miles from Poona. The name of this ruler was Khambha, that of his father Tailappa, and of his grandfather Khambha again. The family was ruling at Shirvaḷ for three generations only. The genealogical description of the family consists of merely conventional praise with no reference to specific achievements of any of its members. These rulers do not appear to have played any role in the politics of the age. They were probably relatives of the Imperial Chālukya family ruling at Kalyāṇī and were allowed to hold territory round Shirvaḷ in the feudatory capacity. The name of the donor's father Tailappa and his surname Chālukya would support this conjecture.

Lines 11-15 give the names of the five ministers who were holding office when the grant was given in

1079 A.D. They were probably *Kumāra* Jēsiṅgha, the prime minister, Chāchu, the *Sāmanta* or the revenue minister, Kantali *Ṭhākura,* the *Amātya* or the counsellor, Sōmānathaiyā, the minister to Queen Siriyādēvī (*i.e.* Śrīdēvī), daughter of king Muñja, and Laiādaranāyaka, the minister to Queen Mahalādēvī. It would appear that these two Queens were taking active part in the administration of the little kingdom of Shirvaḷ just like some other queens of the Chāḷukya family to which the donor of the present charter belonged.

The village granted in this charter is Viṅga which is described as a *mahā-sthāna* or holy place. This is the same villag which was given 300 years before by Dhruva Dhārāvarsha to Vāsudēvabhaṭṭa, a learned Brāhmaṇa of Karāḍ, as we know from former's Bhor State Museum plates of Śaka 702.[1] Line 27 shows that king Khambha only renewed the grant (*punarnamasyaṁ dattaṁ*). We may presume from this that since the time of Dhruva the village was not resumed by any of the succeeding rulers and figures as a *brahmadēya* village on the revenue records of successive governments.

Though the village continued to be a *brahmadēya* village, its ownership did not remain in the family of Vāsudēvabhaṭṭa, the original donee. The names of the donees do not occur at all in that portion of the grant which describes the donation. The mistake is rectified by adding a postscript to the inscription which comes at the end of the imprecatory verses. This important sentence is not written correctly. After some emendation it gives the meaning that Kumbhadēva and Gaṅgaladēva received the charter as the leading personages among the donees.

In other words, they did not receive the grant for themselves, but as representatives obviously of the Brāhmaṇa community of Viṅga. Viṅga is described as a *mahā-sthāna* or holy place and seems to have been the seat of a learned Brāhmaṇa settlement. King Khambha therefore might have granted the charter to the whole Brāhmaṇa settlement of the place. It is suggested that the descendants of Vāsudēvabhaṭṭa being unable to manage their Viṅga property from their residence at Karāḍ situated about 70 miles from Viṅga might have sold it to the Brāhmaṇa community of Viṅga.

At this stage it is worth noting as to what K.N.Dikshit has remarked about the present charter in his note published in *EI.*, XXIII, pp.99-100. Basing on the irregular arrangement of the contents in the text he holds that the grant in question is not a regular and officially issued charter, and cannot be considered as indicating the existence of a feudatory Chālukya king in the Śaka year 1001. He adduces convincing reasons for his opinion. He is inclined to think that the grant belongs to the middle of the 12th Century A.D. and was probably forged in the interest of the persons mentioned in the postscript of the grant.

Note

1. *USVAE.*, V, No.86.

****

No.11

THANA PLATES OF ARIKESARIN: SAKA YEAR 939

Location	: Thāṇā, Thana District Maharashtra
Date	: Śaka year 939 (1017 A.D.)
Script	: Nāgarī
Language	: Sanskrit
King	: Arikēsarin
Dynasty	: Śilāhāras of North Kōṅkaṇ
Reference	: Mirashi, V.V., *CII.*, VI, pp.44-54; No.8

Text

Metre: Vv. 1, 2, 9, 10, 18, 20, 21, 23-27, 30-34 *Anushṭubh;* 3, 8, 13, 14, 16 *Śārdūlavikrīḍita;* 4, 5, 7, 15, 17 *Vasantatilakā;* 6 *Svāgatā;* 11, 12 *Āryā;* 19 *Vaṁśastha;* 22, 29 *Indravajrā;* 28 *Śālinī*

सिद्धम्। जयश्चाभ्युदयश्च ॥

लभते सर्व्वकार्येषु पूजया गणनाय कः।

विघ्नं निघ्नन्स वः पायादपायाद्गणनायकः ॥ १ ॥

स वः पातु शिवो नित्यं यन्मौलौ भाति जाह्नवी।

सुमेरुशिखरोद्गच्छदच्छचन्द्रकलोपमा ॥ २ ॥

यो देवः स्वयमेव मूर्ध्नि विहितां धत्ते हिमांशोः कला

मत्यन्तोज्ज्वलबालकेतकशिखारेखास्थितिं बिभ्रतीम्।

व्यालाधीशपिनद्धपिंगलजटाजूटाटवीमण्डितो

भूयाद्वः स सदा प्रकाशितवरः क्षेमंकरः शंकरः ॥ ३ ॥

जीमूतकेतुतनयो नियतं दयालु

र्जीमूतवाहन इति त्रिजगत्प्रसिद्धः।

देहं निजं तृणमिवाकलयन्परार्थे

यो रक्षति स्म गरुडात्खलु शंखचूडम् ॥४॥

तस्यान्वये नरपतिः समभूत्कपर्द्दी

सीलारवंशतिलको रिपुदर्प्पमर्द्दी।

तस्मादभूच्च तनयः पुलशक्तिनामा

मार्त्तण्डमण्डलसमानसमृद्धधामा ॥५॥

जातवानथ लघुः स कपर्द्दी सूनुरस्य सकलैररिवर्ग्गैः।

यद्भयेन सलिलांजलिरुच्चैर्द्दीयते स्म निजराज्यसुखाय ॥६॥

तस्मादभूच्च तनयो भुवनैकवीरः

श्रीवप्पुवन्न इति संगररंगधीरः।

श्रीझंझ इत्यभवदस्य सुतः सुकीर्त्ति

र्भ्रातार्थ गोग्गिनृपतिः समभूत्सुमूर्त्तिः ॥७॥

तस्माद्विस्मयकारिहारिचरितः प्रख्यातकीर्तिः सुतः

श्रीमान्वज्जडदेवभूपतिरभूद्भूचक्रचूडामणिः।

दोर्द्दण्डैकबलस्य यस्य सहसा संग्रामरंगांगणे

राज्यश्रीः स्वयमेत्य वक्षसि रतिं चक्रे मुरारेरिव ॥८॥

जयन्त इव वृत्रारेः पुरारेरिवषण्मुखः।

ततः श्रीमानभूत्पुत्रः सच्चरित्रोपराजितः ॥९॥

कर्ण्णस्त्यागेन यः साक्षात्सत्येन च युधिष्ठिरः।

प्रतापादीप्तमार्त्तण्डः कालदण्डश्च यो द्विषाम् ॥१० ॥

शरणागतसामन्ता अपरेऽपि हि जगति रक्षिता येन ।

स जयति यथार्थनामा शरणागतवज्रपंजरो देवः ॥११ ॥

अनवरतकनकदानैर्जगदिदमाच्छादितं सदा येन ।

तेन त्रिभुवनमध्ये त्यागजगज्झम्पिनामाभूत् ॥ १२ ॥

ये वा केचिदुदण्डचक्रचरितैस्तैस्तैरुपेता नृपाः

सत्यत्यागपराक्रमातिशयतां शंसन्ति शश्वद्धिया ।

स्थानभ्रष्टसमाश्रितक्षितिभुजां राज्य स्थितिं ससृजे

सोयं राजपितामहो विजयतां सामन्तदीक्षागुरुः ॥ १३ ॥

अपि च ।

येन स्वागतमागताय विहितं गोम्माय नानाविधं

येनैवैयपदेवनाम्नि चलितं राज्यं स्थिरं कारितम् ।

भिल्लम्मामणमम्बुवक्षितिभुजां दत्तं च येनाभयं

तस्य श्रीबिरुदंकरामनृपतेरन्यत्किमावर्ण्यते ॥ १४ ॥

श्रीमानभूत्तदनु वज्जडदेवनामा

भूपालमस्तकमणिस्तनयो नयज्ञः ।

अद्यापि यस्य चरितानि जनाः समस्ता

रोमाञ्चकञ्चुकितगात्रलताः स्तुवन्ति ॥ १५ ॥

तद्भ्राताथ ततोरिकेसरिनृपो जातः सतां सम्मतो

दृप्तारातिकुलाचलैकदलने दम्भोलिलीलां दधत् ।

गत्वा शैशव एव सैन्यसहितो दृष्ट्वा च सोमेश्वरं

तस्याग्रे पितुराज्ञया जगदलं यः कीलयित्वागतः ॥ १६ ॥

लम्बालकानि कुचकुम्भतटोपकण्ठ

प्रभ्रष्टहारलतिकानि निरञ्जनानि ।

उत्खाततीक्ष्णकरवालविदारितस्य

योन्तःपुराणि परिपन्थिजनस्य चक्रे ॥ १७ ॥

हतारिनारीनेत्राम्भस्सेकसंवर्धनादिव ।

ब्रह्माण्डमण्डपं यस्य कीर्तिवल्ल्यतिरोहति ॥ १८ ॥

अथ स्वकीयपुण्योपचयात्समधिगतपञ्चमहाशब्दमहासामन्ताधिपतितगरपुरपरमेश्वरशीलारनरेन्द्रजीमूतवाहनान्वयप्रसूतसुवर्णगरुडध्वजसहजविद्याधरत्यागजगज्झम्पपश्चिमसमुद्राधिपतिकलिगलांकुश बिल्लविडेङ्ग शरणागतवज्रपंजरप्रभृतिसमस्तराजावलीसमलङ्कृतमहामण्डलेश्वरश्रीमदरिकेसरिदेवराजो निजभुजोपार्जितानेकमण्डलसमेतां पुरीप्रमुखचतुर्दशग्रामशतीसमन्वितसमग्रकोंकणभुवं समनुशासति । तस्यैतद्राज्यचिन्ताभारं समुद्वहति महामात्यश्रीवासपैये तथा महासान्धिविग्रहिके श्रीवार्धियपैये सत्येतस्मिन् काले प्रवर्तमाने स महामण्डलेश्वरः श्री अरिकेसरिदेवराजः सर्वानेव श्रीस्थानकपुरवासिनो यथासम्बध्यमानकानन्यानपिसमागामिराजपुत्रमन्त्रिपुरोहितामात्यप्रधानाप्रधाननैयोगिकान् नियुक्तानियुक्तराजपुरुषजनपदान् तथा हंयमननगरपौरत्रिवर्गप्रभृतींश्च प्रणतिपूजासमादेशैः सन्दिशत्यस्तु वः संविदितं यथा

चला विभूतिः क्षणभङ्गि यौवनं कृतान्तदन्तान्तरवर्ति जीवितम् ।

तथाप्यवज्ञा परलोकसाधने नृणामहो विस्मयकारि चेष्टितम् ॥ १९ ॥

तथा चान्तर्लीनजराराक्षसीप्रारब्धग्रासं यौवनं स्वर्गवासान्नरकपात-
सममिष्टसमागमवियोगदुःखं पवनचलितकमलिनीदलगतजललवतरलतरे
धनायुषी कदलीगर्भवदसारः संसार इति मत्वा दृढतरविरक्तिबुध्या
संगृह्णीयाद्दान फलम्।

कृतत्रेताद्वापरेषु तपोत्यर्थं प्रशस्यते।
मुनयोत्रानुशंसन्ति दानमेकं कलौ युगे॥ २०॥

न तथा सफला विद्या न तथा सफलं तपः।
यथात्र मुनयः प्राहुर्दानमेकं कलौ युगे॥ २१॥

तथा चोक्तं भगवता व्यासेन-

अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः।
लोकत्रयं तेन भवेद्धि दत्तं यः काञ्चनं गाञ्च महीञ्च दद्यात्॥ २२॥

आस्फोटयन्ति पितरः प्रवल्गन्ति पितामहाः।
भूमिदोस्मत्कुले जातः स नः संतारयिष्यति॥ २३॥

भूमिदानं सुपात्रेषु सुतीर्थेषु सुपर्वसु।
अगाधापारसंसारसागरोत्तारणं भवेत्॥ २४॥

धवलान्यातपत्राणि दन्तिनश्च मदोद्धताः।
भूमिदानस्य पुण्यानि फलं स्वर्गः पुरन्दर॥ २५॥

इति धर्माधर्मविचारचारुचिरन्तनमुनिवचनान्यवधार्य मातापित्रोरात्मनश्च
श्रेयोर्थिना मया शकनृपकालातीतसंवत्सरशतेषु नवस्वेकोनचत्वारिंश-
दधिकेषु पिङ्गलसंवत्सरान्तर्गतकार्त्तिकशुद्धपञ्चदश्यां यत्राङ्कतोऽपि संवत्

९३९ कार्त्तिकशुद्ध १५ संजातसोमग्रहणपर्वणि उदधौ स्नात्वा गगनैक-चक्रचूडामणये त्रैलोक्यचक्षुषे कमलिनीकामुकाय भगवते सवित्रे नानाविधकुसुमश्लाघ्यमर्घ्यं दत्वा सकलसुरासुरगुरुं त्रैलोक्यस्वामिनं भगवन्तमम्बिकापतिमभ्यर्च्य यजनयाजनाध्ययनाध्यापनादिषट्कर्म-निरताय क्रतुक्रियाकाण्डशौण्डाय श्रीस्थानकपुराधिवास्तव्याय जामदग्न्यगोत्राय क्रियानदीष्णे बह्वृचशाखिने श्रीछिंतपैयसुताय पुरोहिताचार्यश्रीतिक्कपैयाय यजनयाजनाध्ययनाध्यापनादिषट्कर्मकरणाय बलिचरुवैश्वदेवाग्निहोत्रादिनित्यनैमित्तिकक्रियातिथिपूजाद्युपसर्पणार्थं स्वपरिग्रहपोषणार्थं च वत्सराजविषयान्तःपातिचाविनारग्रामः यस्य चाघाटनानि पूर्वतः पूअगम्बाग्रामः पर्वतपानीयप्रपातः दक्षिणतः नागाम्बामूलाडोगरिकाग्रामौ पश्चिमतः साम्बरपल्लिका नदी उत्तरतः साम्बिवेकाटियालकग्रामौ तथा च समग्रा तोकबलापल्लिका यस्याश्चाघाटनानि पूर्वतः सीदाबली दक्षिणतः मोथलनदी पश्चिमतः काकादेवहल्लपल्लिका बादविरकश्च उत्तरतः तलावलीपल्लिका च। तथा च औलकीयाग्रामः यस्य चाघाटनानि पूर्वतः तडागः दक्षिणतः गोविनी पश्चिमतः चरिका उत्तरतः कलिबलायचोली एवं चतुराघाटनोपलक्षिताः स्वसीमापर्यन्ताः सतृणकाष्ठोदकोपेताः पूर्वदत्तदेवदायब्रह्मदाय वर्जमाचन्द्रार्कपर्वतकालमर्यादया नमस्यवृत्त्या उदकातिसर्गेण परमया - भक्त्या प्रतिपादिताः। तदस्य सान्वयबन्धोर्भुञ्जतो भोजयतो वा न केनापि परिपन्थना करणीया। यत उक्तमेव महामुनिभिः–

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः।

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ २६ ॥

सद्योदानं निरायासं सायासं दीर्घपालनम् ।

अत एवर्षयः प्राहुर्दानाच्छ्रेयोनुपालनम् ॥ २७ ॥

दत्त्वा भूमिं भाविनः पार्थिवेन्द्रान्

भूयो भूयो याचते रामभद्रः ।

सामान्योयं धर्मसेतुर्नृपाणां

काले काले पालनीयो भवद्भिः ॥ २८ ॥

यानीह दत्तानि पुरा नरेन्द्रै

र्दानानि धर्मार्थयशस्कराणि ।

निर्माल्यवान्तप्रतिमानि तानि

को नाम साधुः पुनराददीत ॥ २९ ॥

इति चिरन्तनमुनिवचनान्यवधार्य सर्वैरपि आगामिभूपतिभिः पालनधर्मफललोभ एव करणीयः। न पुनस्तल्लोपपापकलंकाग्रेसरेण केनापि भवितव्यम्। यस्त्वेवमभ्यर्थितोपि लोभादज्ञानतिमिरपटलावृत-मतिराच्छिन्द्यादाच्छिद्यमानं वानुमोदेत स पञ्चभिरपि महापातकै-रुपपातकैश्च लिप्तो रौरवमहारौरवान्धतामिस्रादिनरकां-श्चिरमनुभविष्यति । तथा चोक्तं भगवता व्यासेन-

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।

स विष्ठायां कृमिर्भूत्वा कृमिभिः सह पच्यते ॥ ३० ॥

विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।

महाहयो हि जायन्ते भूमिदानं हरन्ति ये ॥ ३१ ॥

गामेकां वस्त्रमेकं भूमेरप्येकमङ्गुलम् ।

हरन्नरकमाप्नोति यावदाभूतसंप्लवम् ॥ ३२ ॥

आरामाणां सहस्रेण तडागानां शतेन च ।

गवां कोटिप्रदानेन भूमिहर्ता न शुध्यति ॥ ३३ ॥

षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।

आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥ ३४ ॥

यथा चैतदेवं तथा शासनदाता लेखकहस्तेन स्वमतमारोपयति । यथा मतं मम महामण्डलेश्वरश्रीअपराजितदेवसूनोर्महामण्डलेश्वरश्री अरिके-सरिदेवराजस्य यदत्र शासने लिखितम् । लिखितं चैतन्मया श्रीमद्रा-जाज्ञया श्रीजोउपैयेन भाण्डागारसेनमहाकविश्रीनागलैयभ्रातृसुतेन । उत्कीर्णं च मानधरपैयेन वेदपैयसुतेनेति । यदत्रोनाक्षरमधिकाक्षरं वा तत्सर्वं प्रमाणमिति ॥

Summary

The set of three copper-plates on which the present inscription was engraved has become untraceable.[1] The text of the inscription has been restored from the available materials, *viz.*, the facsimile of the first plate which is available, literal translation of the plates published earlier and the published texts of several grants of the Śilāhāras of North Kōṇkaṇ. Text of this epigraph is composed partly in verse and partly in prose. The eulogistic portion contains eighteen verses. The formal part of this grant occurs *mutatis mutandis* in several later grants of the Śilāhāras. This inscription records the grant, by the Śilāhāra king Arikēsarin, of three villages to a Brāhmaṇa.

The grant opens with the usual prayer *Jayaś-chābhyudayaś-cha.* This is followed by one verse in praise Gaṇēśa and two in that of Śiva. The genealogy of the reigning king Arikēsarin is next traced from Kapardin I, the founder of the Śilāhāra family of North Kōṅkaṇ. He was succeeded by the following kings- his son Pulaśakti; his son Laghu Kapardin (or Kapardin II); his son Vappuvanna; his son Jhañjha; his brother Vajjaḍa I; his son Aparājita, who is glorified in six verses. By his charity he is said to have become known as Jagajjhampi (the world-excelling donor). As he re-established several princes on their thrones, he was known as Rāya-pitāmaha (Brahmā among Kings). He is stated to have given refuge to Gōmma, established Aiyapadēva on the throne and gave security from fear to Bhillam, Ammaṇa and Mambuva. Of these Bhillama was the second king of that name ruling over Sēuṇadēśa. Aparājita is said to have assumed the title of *Birudaṅka-Rāma* (Rāma among title holders). He was succeeded by his son Vajjaḍa II, and the latter by his brother Arikēsarin who granted the present plates. Three verses are devoted to his description. The first verse says that he marched with his army to see the god Sōmēśvara, to whom he offered his conquest of the whole world as directed by his father. The following two verses contain mere conventional praise.

The formal portion of the inscription records the grant, by the Śilāhāra king Arikēsarin, of three villages in the Vatsarāja (? Varēṭikā) *vishaya, viz.*, Chāvināragrāma,[2] Tōkabalāpallikā and Aulakīyagrāma to the family priest and teacher (*purōhitāchārya*) Tikkapaiya, the son of Chhintapaiya of the Jāmadagnya *gōtra* and Bahvṛicha-

śākhā, who knew astronomy and was residing in the prosperous city of Sthānaka,[3] on the occasion of a lunar eclipse which occurred on the 15th tithi of the bright fortnight of Kārttika in the Śaka year 939, the cyclic year being Piṅgala, which corresponds to the 6th November 1017 A.D. The purpose of the grant was to provide for the performance, by the donee, of the six religious duties (*shaṭkarma*) such as sacrificing for oneself and for others and the studying and teaching of the sacred texts, for the performance of *bali, charu,* and other obligatory and occasional religious rites and for the maintenance of the donee's family (*parigraha*). The officers in charge of administration at the time were *Mahāmātya* Vāsapaiya and the *Mahāsāndhivigrahika* (?) Vardhiyapaiya. The scribe of the present grant was Jōupaiya, the nephew of the *Mahākavi* Nāgalaiya, and the engraver was Mānadharapaiya, the son of Vēdapaiya.

As many as 15 villages, a water-fall and a tank are mentioned among the boundaries of the three donated villages, but very few of them can be identified now.

Notes

1. This is the only known grant of the Śilāhāra prince Arikēsarin and is, therefore, of exceptional importance (*CII.,* VI, p.44).

2. Chāvināragrāma is probably identical with Chāvindrē, about 3.20 km. north of Bhiwaṇḍī in the Thana District of Maharashtra (*ibid.,* pp. 46-47).

3. Sthānaka is Ṭhāṇā, the chief town of the Thana District (*ibid.,* p.46).



No.12

BHOIGHAR PLATES OF CHHITTARAJA: SAKA YEAR 946

Location	: Bhoighar, Kolaba District, Maharashtra
Date	: Śaka year 946=1024 A.D.
Script	: Nāgarī
Language	: Sanskrit
King	: Chhittarāja
Dynasty	: Śilāhāras of North Kōṅkaṇ
Reference	: Mirashi, V.V., *CII.*, VI, pp.274-79; No.61

Text

Metre: Vv. 1, 2 *Anushṭubh;* 3, 7, 8, 11, 13 *Śārdūlavikrīḍita;* 4, 5, 12 *Vasantatilakā;* 6 *Sragdharā;* 9, 10 *Āryā;* 14 *Indravajrā*

सिद्धम्। जयश्चाभ्युदयश्च ।

लभते सर्वकार्येषु पूजया गणनाय कः ।

विघ्नं निघ्नन् स वः पायादपायाद्गणनायकः ॥ १ ॥

स वः पातु शिवो नित्यं यन्मौलौ भाति जाह्नवी ।

सुमेरुशिखरोद्गच्छदच्छचन्द्रकलोपमा ॥ २ ॥

यो देवः स्वयमेव मूर्द्ध्नि विहितां धत्ते हिमांशोः कला

मत्यन्तोज्ज्वलबालकेतकशिखारेखास्थितिं बिभ्रतीम् ।

व्यालाधीशपिनद्धपिंगलजटाजूटाटवीमण्डितो

भूयाद्वः स सदा प्रकाशितवरः क्षेमङ्करः शङ्करः ॥ ३ ॥

जीमूतकेतुतनयो नियतं दयालु

र्जीमूतवाहन इति त्रिजगत्प्रसिद्धः।

देहं निजं तृणमिवाकलयन्परार्थे

यो रक्षति स्म गरुडात्खलु शङ्खचूडम् ॥ ४ ॥

तस्यान्वये निखिलभूपतिमौलिलग्न

रत्नद्युतिच्छुरितनिर्मलपादपीठः।

श्रीसाहसाङ्क इव साहसिकः कपर्दी

शीलारवंशतिलको नृपतिर्बभूव ॥ ५ ॥

तस्माज्जातस्तनूजो रजनिकर इवानन्दिताशेषलोकः

श्लाघ्यः श्रीझञ्झराजो दिवसकर इव ध्वस्तनिःशेषदोषः।

शम्भोर्यो द्वादशापि व्यरचयदचिरात्कीर्तनानि स्वनाम्ना

सोपानानीव मन्ये प्रणततनुभृतां स्वर्ग्गमार्गोद्यतानाम् ॥ ६ ॥

भ्राता तत्र ततस्ततोज्ज्वलयशोराशिप्रकाशीकृता

शेषक्ष्मावलयो बली बलवतां श्रीगोग्गिराजोभवत्।

चापाकर्षणकर्म्मणि प्रवणतां तस्मिन्गते भूपतौ

भीष्मद्रोणपृथासुतप्रभृतयश्चित्ते चमत्कारिताः ॥ ७ ॥

तस्माद्विस्मयकारिहारिचरितप्रख्यातकीर्त्तिः सुतः

श्रीमान्वज्जडदेवभूपतिरभूद्भूचक्रचूडामणिः।

दोर्द्दण्डैकबलेन यस्य सहसा संग्रामरङ्गाङ्गणे

राज्यश्रीः स्वयमेत्य वक्षसि रतिं चक्रे मुरारेरिव ॥ ८ ॥

शरणागतसामन्ता अपरेऽपि हि जगति रक्षिता येन

स जयति यथार्थनामा शरणागतवज्रपञ्जरो देवः ॥ ९ ॥

अनवरतकनकदानैर्जगदिदमाच्छादितं सदा येन ।

तेन त्रिभुवनमध्ये त्यागजगज्झम्पिनामाभूत् ॥ १० ॥

येन स्वागतमागताय विहितं गोम्माय नानाविधं

येनैवैयपदेवनाम्नि चलितं राज्यं स्थिरं कारितम् ।

भिल्लम्माम्मणमम्बुवक्षितिभुजां दत्तं च येनाभयं

तस्य श्रीविरुदंकरामनृपतेरन्यत्किमावर्ण्यते ॥ ११ ॥

श्रीमानभूत्तदनु वज्जडदेवनामा

भूपालमस्तकमणिस्तनयो नयज्ञः ।

अद्यापि यस्य चरितानि जनाः समस्ता

रोमाञ्चकञ्चुकितगात्रलताः स्तुवन्ति ॥ १२ ॥

तद्भ्राताथ ततोऽरिकेसरिनृपो जातः सतां सम्मतो

दृप्तारातिकुलाचलैकदलने दंभोलिलीलां दधत् ।

गत्वा शैशव एव सैन्यसहितो दृष्ट्वा च सोमेश्वरं

तस्याग्रे पितुराज्ञया जगदलं यः कीलयित्वागतः ॥ १३ ॥

तद्भ्रातृजो वज्जडदेवसूनुः श्रीछित्तराजो नृपतिर्ब्बभूव ।

सीलारवंशः शिशुनापि येन नीतः परामुन्नतिमुन्नतेन ॥ १४ ॥

अथ स्वकीयपुण्योदयात्समधिगतपञ्चमहाशब्दमहासामन्ताधिपति-

तगरपुरपरमेश्वरशीलारनरेंद्रसहजविद्याधरसुवर्णगरुडध्वजत्यागजग-

ज्झम्पिनन्निसमुद्रकलिगजांकुशजीमूतवाहनान्वयप्रसूतप्रभृतिसमस्तराजा

वलीसमलङ्कृतमहामण्डलेश्वरश्रीछित्तपैयदेवराजो निजभुजोपार्जितानेक-मण्डलसमेतपुरीप्रमुखचतुर्दशग्रामशतीसमन्वितसमस्तकोंकणभुवं समनुशासति तथैतत्प्रसादात्समस्तराज्यचिन्ताभारं समुद्वहति महामात्ये श्रीनागणैये सर्वाधिकारिणि प्रभुश्रीदादपैये श्रीसंगलैयश्रीतिक्कपैय-प्रभृतिपञ्चप्रधानजनप्रत्यक्षं पाणाडविषयान्तःपातिकरदाण्डकोलपल्लिका-ग्रामद्वयनिवासिनां चिपलूणस्थकरहाटकोटणक्रमविद् इत्यादीनां यजन-याजनाध्ययनाध्यापनादिषट्कर्मनिरतानां क्रतुक्रियाकाण्डशौण्डानां महाब्राह्मणानामारामगुम्मे। शासनस्थित्या व्यवस्थापनमभिप्रयच्छति यथा। आकलितसकलसंसारासारत्वेन धर्माधर्मविचारचारमतिना मया समस्ताभ्युदयभागिनी महाराज्ञी श्रीपद्मलदेवी तस्या आदेशेन पंचप्रधानानुमत्या महाजनप्रमुखसमक्षं प्राग्लिखितकरदाण्ड-कोलपल्लिकाग्रामद्वयानुवर्त्तिनां समस्तारामाणां फलप्रविष्टानां पूगीफलशतं प्रति द्रम्मचतुष्टयं विधाय गुम्मे व्यवस्था विहिता। सा च पूर्वप्रसिद्ध्या व्यावहारिकैः चतुःपरिष्कृता भूमौ देया। अध्यरण्यं च आरामाभ्यन्तरवर्तिनो नारिकेलपनसचम्पकसहकारादिवृक्षा अभ्यन्तरी-कृताः। सुरामण्डवृक्षश्चाभ्यन्तरवर्ती बाह्यो वा राजकीय एव। तस्योन्मूलनच्छेदादिकं केनापि न करणीयम्। तथा ग्रामीणतृण-काष्ठादिकमानयतां विप्राणां प्रतिषेधः न करणीयः। इति धर्माधर्मविचारचतुरसुनिवचनान्यवधार्य क्रोधलोभाभिभूतेन लिखित-मर्यादा नोल्लंघनीया। अत्र विषये अन्यथा न करणीयम्। अन्यच्च व्यवस्थाचारः फलितपंचाशत्पूगप्रमाणं पूगफलगणनायां गणनीयम्।

क्रयमागतस्यारामस्य क्रयार्थं द्रव्यस्य त्रिकशतेन विक्रयभाव्यं ग्राह्यम्। यथा चैतदेवं तथा शासनपत्रदाता लेखकहस्तेन स्वमतमारोपयति। यथा मतं मम महामण्डलेश्वरश्रीछित्तपैयदेवराजस्य महामण्डलेश्वरश्रीमद्व-जडदेवराजसूनोर्यदत्र लिखितम्। लिखितं चैतत् संवत् ९४६ भाद्रपद वदि १३ मया श्रीमद्राजानुज्ञया श्रीपद्मलदेवीनियमाद् भाण्डागारसेन-महाकविश्रीनागलैयभ्रातृसुतेन जोउपैयेन। यदत्रोनाक्षरमधिकाक्षरं वा तत्सर्वं प्रमाणम्। उत्कीर्णं ताम्रपटे वेदपैयसुतमानधरपैयेनेति॥

Summary

These copper-plates containing the text of the present charter have been lost. The person who found them while digging his orchard had read the record on the plates, but instead of reducing it to writing, he committed it to memory. Later on the record was committed to writing and published just as recited by the finder. This recited text is defective. Still, it is surprising that though the finder of the plates was wholly unacquainted with the records of the Śilāhāras of North Kōṅkaṇ, he could correctly recite a considerable portion of it. It is specially noteworthy that his transcript comprises two new verses and the name Padmalā of a Śilāhāra queen, which were not known till then and have since been corroborated by newly discovered Śilāhāra inscriptions. As the plates are not procurable now, the available transcript has been rearranged and supplemented with the help of other records of Śilāhāras of North Kōṅkaṇ, because some information in it is historically important.

Like most other copper-plates of the Śilāhāras of North Kōṅkaṇ, these also must have been three in number and written in the Nāgarī characters. The language is Sanskrit. The record must have contained the genealogy of the ruling prince Chhittarāja from the beginning as in other cognate records, but the verses describing Pullaśakti, Kapardin II, Vappuvanna, Aparājita and Chhadvaidēva have been omitted. The later portion is fairly complete.

The inscription is dated in the Śaka year 946, and is the earliest known record of the reign of Chhittarāja. Its date Śaka saṁvat 946, Bhādrapada va.di.13 corresponds to the 3rd September 1024 A.D.

The reigning king Chhittarāja is formally introduced as *samadhigatapañchamahāśabda, Mahāsāmantādhipati, Tagarapuraparamēśvara, Śīlāranarēndra, Sahajavidyādhara, Suvarṇagaruḍadhvaja, Tyāgajagajjhampi Nannisamudra, Kaligajāṅkuśa, Jīmūtavāhanānvayaprasūta, Mahāmaṇḍalēśvara* Śrī Chhittapaiyadēvarāja. He is described as reigning over the whole Kōṅkaṇa country consisting of 1400 villages headed by Purī together with several *maṇḍalas* (countries) conquered by his own arm. His officers mentioned here include his *Mahāmātya* Nāgaṇaiya, his *Sarvādhikārin* Dādapaiya and ministers Saṅgalaiya and Tikkapaiya. The record mentions at the end *Bhāṇḍāgārasēna Mahākavi* Nāgalaiya and his nephew Jōupaiya. The latter wrote the present record at the instance of *Mahārājñi* Padmalādēvī and with the consent of the reigning king. The engraver was Dhārapaiya, the son of Vēdapaiya. Padmalādēvī also finds mention in the Divē Āgar plates of Mummuṇirāja

(No.22 below). She seems to be the mother of the three brothers Chhittarāja, Nāgārjuna and Mummuṇi, and the queen of Vajjaḍa II. She is evidently different from Padmairājñī mentioned in the Ṭhāṇā plates of Mummuṇi (No.20 below).

The object of the present inscription was to lay down the *vyavasthā* (settlement) in respect of the orchards at the villages Karadāṇḍa[1] and Kōlapallikā[2] in the *vishaya* of Pāṇāḍa[3] belonging to the Karahāṭaka[4] Brāhmaṇas such as *Kramavid* Kōṭaṇa residing at Chipalūṇa, who were always engaged in the performance of their six religious duties (*shaṭkarma*). Such documents were called *vyavasthā-patras.* The present record lays down a tax of four *drammas* on a hundred areca-nut trees[5] in the orchards of the aforementioned places. The cocoanut, bread-fruit (*panasa*), *champaka* and mango trees, whether in orchards or in the forests outside the villages, should be regarded as untaxable. On the other hand, the *surāmaṇḍa* (*mahuā*) trees, whether inside the orchards or outside, should be regarded as belonging to the Government. They should not be uprooted, cut or damaged by anybody.[6] Again, none should prevent the Brāhmaṇas (*of the villages*) from fetching grass, fuel and so forth from (*the outskirts of*) the villages. It seems that the areca-nut trees were generally subject to higher taxation, but at the instance of Queen Padmalā, the Government levied lighter taxes on these trees in the two villages out of reverence for the learned and pious Brāhmaṇas residing there.

It is further stated that the settled custom was to regard fifty ripe areca-nuts as a unit while counting the

areca-nuts. At the time of selling the areca-nut trees the tax to be paid was three percent of the amount of the sale.

As the present grant does not mention any land-grant, the usual benedictory and imprecatory verses do not occur therein.

Notes

1. Karadāṇḍa may be identical with Dāṇḍē also known as Nāndgaon in the Kolaba District (*CII.,* VI, p.275).

2. Kōlapallikā is probably the same as Kōlamāṇḍale, just a mile north of Bhoighar (*ibid.*).

3. Pāṇāḍā has been identified with Poināḍ in the Kolaba District (*ibid.*).

4. Karahāṭa is well-known as Karhāḍ in the Satara District of Maharashtra (*ibid.*).

5. The text has पूगीफलशतं प्रति द्रम्मचतुष्टयम्, which would mean a tax of four *drammas,* on a hundred areca-nuts. This is not likely. Perhaps, the correct reading is पूगीवृक्षशतं प्रति द्रम्मचतुष्टयम् (*ibid., n.*4).

6. This indicates that production of spirituous liquor was either owned or strictly supervised by the Government.



S.No. 4 - Inscription No. 13

Bhandup Plates of Chhitaraja; Saka Year 948

No.13
BHANDUP PLATES OF CHHITTARAJA
SAKA YEAR 948

Location : Bhāṇḍūp, Thana District, Maharashtra

Date : Śaka Year 948 = 1026A.D.

Script : Nāgarī

Language : Sanskrit

King : Chittarāja

Dynasty : Śilāhāras of North Kōṅkaṇ

Reference : Mirashi, V.V., *CII.*, VI, pp.54-60; No.9

Text

Metres: Vv. 1, 2, 8, 9, 13, 15 *Anushṭubh;* 3, 4, 6 *Vasantatilakā;* 5 *Svāgatā;* 7 *Śārdūlavikrīḍita;* 10 *Upajāti;* 11 *Vaṁśastha;* 12 *Indravajrā;* 14 *Śālinī*

सिद्धम्। जयश्चाभ्युदयश्च ॥

लभते सर्व्वकार्य्येषु पूजया गणनाय कः।

विघ्नं निघ्नन्स वः पायादपायाद्गणनायकः ॥ १ ॥

स वः पातु शिवो नित्यं यन्मौलौ भाति जाह्नवी।

सुमेरुशिखरोद्गच्छदच्छचंद्रकलोपमा ॥ २ ॥

जीमूतकेतुतनयो नियतं दयालु

र्जीमूतवाहन इति त्रिजगत्प्रसिद्धः।

देहं निजं तृणमिवाकलयन्परार्थे

यो रक्षति स्म गरुडात्खलु शंखचूडम् ॥ ३ ॥

तस्यान्वये नरपतिः समभूत्कपर्द्दी

सीलारवंशतिलको रिपुदर्प्पमर्द्दी ।

तस्मादभूच्च तनयः पुलशक्तिनामा

मार्त्तण्डमण्डलसमानसमिद्धधामा ॥ ४ ॥

जातवानथ लघुः स कपर्द्दी सूनुरस्य सकलैररिवर्ग्गैः ।

यद्वयेन सलिललांजलिरुच्चैर्द्दीयते स्म निजराज्यसुखाय ॥ ५ ॥

तस्मादभूच्च तनयो भुवनैकवीरः

श्रीवप्पुवन्न इति संगररङ्गवीरः ।

श्रीझंझ इत्यभवदस्य सुतः सुकीर्त्ति

भ्रातार्थ गोग्गिनृपतिः समभूत्सुमूर्त्तिः ॥ ६ ॥

तस्माद्विस्मयकारिहारिचरितप्रख्यातकीर्त्तिः सुतः

श्रीमान्वज्जडदेवभूपतिरभूद्भूचक्रचूडामणिः ।

दोर्द्दण्डैकबलस्य यस्य सहसा संग्रामरंगांगणे

राज्यश्रीः स्वयमेव वक्षसि रतिं चक्रे मुरारेरिव ॥ ७ ॥

जयन्त इव वृत्रारेः पुरारेव षण्मुखः ।

ततः श्रीमान्भूत्पुत्रः सच्चरित्रोपराजितः ॥ ८ ॥

कर्ण्णस्त्यागेन यः साक्षात्सत्येन च युधिष्ठिरः ।

प्रतापाद्दीप्तिमार्त्तण्डः कालदण्डश्च यो द्विषाम् ॥ ९ ॥

तस्मादभूद्वज्जडदेवनामा श्रीकेशिदेवो नृपतिस्ततोभूत् ।

तद्भ्रातृजो वज्जडदेवसूनुः श्रीछित्तराजो नृपतिर्बभूव ॥ १० ॥

अथ स्वकीयपुण्योदयात्समधिगताशेषपंचमहाशब्दमहासामन्ताधिपति-

तगरपुरपरमेश्वरशिलाहारनरेंद्रजीमूतवाहनान्वयप्रसूतसुवर्ण्णगरुडध्वज-

सहजविद्याधरत्यागजगज्झम्पिमण्डलिकशिखामणिशरणागतवज्रपंजर-प्रभृतिसमस्तराजावलीसमलंकृतमहामण्डलेश्वरश्रीमच्छित्तराजदेवे-निजभुजोपार्ज्जितानेकमण्डलसमेतां पुरीप्रमुखचतुर्द्दशग्रामशतीसमन्वितां समस्तकोंकणभुवं समनुशासति तथैतद्राज्यचिन्ताभारमुद्वहत्सु सर्व्वाधिकारिश्रीनागणैयसांधिविग्रहिकश्रीसीहपैयकर्ण्णाटसांधिविग्रहिक-श्रीकपर्द्दीश्रीकरणादिपंचप्रधानेषु सत्सु अस्मिन् काले प्रवर्त्तमाने स च महामण्डलेश्वरश्रीमच्छित्तराजदेवः सर्व्वानेव स्वसंबध्यमानकानन्यानपि समागामिराजपुत्रमंत्रिपुरोहितामात्यप्रधानाप्रधाननैयोगिकांश्च राष्ट्रपतिवि-षयपतिनगरपतिग्रामपतिनियुक्तानियुक्तराजपुरुषजनपदांस्तथा हंयमन-नगरपौरत्रिवर्ग्गप्रभृतींश्च प्रणतिपूजासत्कारसमादेशैः संदिशत्यस्तु वः संविदितं यथा ॥

चला विभूतिः क्षणभंगि यौवनं ।

कृतान्तदन्तान्तरवर्त्ति जीवितम् ॥ ११ ॥

असारः संसारः सहजजरामरणसाधारणं शरीरकं पवनचलितकमलिनी-दलगतजललवतरलतरे धनायुषी इति मत्वा द्रढयन्ति दानफलम् । तथा चोक्तं भगवता व्यासेन ॥

अग्नेरपत्यं प्रथमं सुवर्ण्णं भूर्व्वैष्णवी सूर्यसुताश्च गावः ।

लोकत्रयन्तेन भवेद्धि दत्तं यः कांचनं गां च महीं च दद्यात् ॥ १२ ॥

इति धर्म्माधर्म्मविचारचारुचिरन्तनमुनिवचनान्यवधार्य्य मातापित्रो-रात्मनश्च श्रेयोर्त्थिना मया शकनृपकालातीतसंवत्सरशतेषु नवसु अष्टचत्वारिंशदधिकेषु क्षयसंवत्सरान्तर्ग्गतकार्त्तिकशुद्धपंचदश्यां यत्रांक-

तोपि संवत् ८४८ कार्त्तिक शुद्ध १५ रवौ संजात आदित्यग्रहणपर्व्वणि सुतीर्थे स्नात्वा गगनैकचक्रचूडामणये कमलिनीकामुकाय भगवते सवित्रे नानाविधकुसुमश्लाघ्यमर्घ्यं दत्त्वा सकलसुरासुरगुरुं त्रैलोक्यस्वामिनं भगवन्तसुमापतिमभ्यर्च्य यजनयाजनाध्यनाध्यापनादिषट्कर्म्मनिरताय क्रतुक्रियाकाण्डशौण्डाय पराशरगोत्राय च्छंदोगशाखिने महाब्राह्मणाय आम्रदेवैयाय विप्रनोडमैयसुताय यजनयाजनाध्ययनाध्यापनादि-षट्कर्म्मकरणाय आगताभ्यागतनित्यनैमित्तिकसंव्यवहारार्त्थं बलिचरु-वैश्वदेवाग्निहोत्रक्रतुक्रियाद्युपसर्प्पणार्त्थं स्वपरिग्रहपोषणार्त्थं च श्रीस्था-नकाभ्यन्तरषट्षष्टिविषयान्तःपातिनोउरग्रामान्तर्व्वर्ति वोडणिभट्टक्षेत्रं यस्य चाघाटनानि पूर्व्वतः गोंवणिमर्यादा दक्षिणतः गोरपवलीमर्यादा पश्चिमतो राजपथः पूर्व्वोत्तरतो गोंवणिमर्यादा एवं चतुराघाटनोपलक्षितं स्वसीमापर्यन्तं समस्तोत्पत्तिसंयुक्तं अचाटभटप्रवेशं अनादेश्यं अनासेध्यं उदकातिसर्ग्गेण नमस्यवृत्त्या परमया भक्त्या प्रतिपादितम्। तदत्र सान्वयबंधोरपि भुंजतो भोजयतो वा कृषतः कर्षयतो वा न केनापि परिपन्थना करणीया॥ यत उक्तमेव महामुनिभिः॥

बहुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥ १३॥
दत्त्वा भूमिं भाविनः पात्थिवेन्द्रान् भूयो भूयो याचते रामभद्रः।
सामान्योयं धर्म्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः॥ १४॥

इति महर्षिवचनान्यवधार्य सर्व्वैरपि समागामिभिर्भूमिपालैः पालनधर्म्म-फललोभ एव करणीयः। न पुनस्तल्लोपनपापकलंकाग्रेसरेण केनापि

भवितव्यम् ॥ यस्त्वेवमभ्यर्त्थितोपि लोभादज्ञानतिमिरपटलावृत-मतिराच्छिंद्यादाच्छिद्यमानमनुमोदेत वा स पञ्चभिरपि पातकैरुपपातकैश्च लिप्तो रौरवमहारौरवांधतामिस्त्रादिनरकांश्चिरमनुभविष्यति। तथा चोक्तं व्यासेन ॥

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
स विष्ठायां कृमिर्भूत्वा कृमिभिः सह पच्यते ॥ १५ ॥

यथा चैतदेवं तथा शासनदातालेखकहस्तेन स्वमतमारोपयति। यथा मतं मम महामण्डलेश्वरश्रीच्छित्तराजदेवस्य महामण्डलेश्वरश्रीमद्वज्जड-देवराजसूनोर्यदत्र शासने लिखितम्॥ लिखितं चैतन्मया श्रीमद्राजानु-ज्ञया भाण्डागारसेनजोगपैयेन भाण्डागारसेनमहाकविश्रीनागलैयभ्रातृ-सुतेन। यदत्रोनाक्षरमधिकाक्षरं वा तत्सर्व्वं प्रमाणमिति ॥ श्रीर्भवतु ॥

Summary

This inscription, engraved on a set of three copper-plates, consists 59 lines of well-formed and well-preserved writing. The plates are held together by a very stout ring with a seal bearing Garuḍa, the cognizance of the Śilāhāras. The record is composed partly in verse and partly in prose, and registers the grant, by Chittarāja, of a field to a Brāhmaṇa.

The record opens with two verses, the first one seeking protection of Gaṇēśa and the second that of Śiva. The genealogy of the Śilāhāras is given here beginning from the mythical Jīmūtavāhana as in other grants. The following princes are mentioned in this order: Kapardin (I); his son Pulaśakti; his son Kapardin (II) (called Laghu-Kapardin); his son Vappuvanna; his son Jhañjha; his

brother Gōggi; his son Vajjaḍa (I); his son Aparājita. Verse 10 which mentions the successor of Aparājita, is incomplete and its wording is ambiguous. It seems to state that Aparājita was succeeded by his younger son Vajjaḍa (II), and the latter by his elder brother Kēśidēva. It dose not, however, appear from either the Ṭhāṇā plates of Arikēsarin or from those of the other grants of Chhittarāja and his successors that Vajjaḍa (II) was a younger son of Aparājita and that he superseded his elder brother Kēśidēva (*alias* Arikēsarin) and usurped the throne. It is now clear from the Divē Āgar plates of Chhittarāja (No.14 below) that the scribe committed a blunder in writing this verse on the present plates. Its correct version, as given in the Divē Āgar plates, shows that Aparājita (called *Dīpti-Mārtaṇḍa-dēva* there) was succeeded by Vajjaḍa (II) and the latter by Kēśidēva (*alias* Arikēsarin) who is not described there as an elder brother of Vajjaḍa (II). This Kēśidēva was the first king of that name in the Śilāhāra family. Kēśidēva was succeeded by his nephew Chhittarāja, the son of Vajjaḍa (II).

Mahāmaṇḍalēśvara Chhittarāja, donor of the present grant, bears many titles usually borne by the Śilāhāras. Thus he is called the one, who, by his religious merit, has obtained the right to the five *mahāśabdas* (*svakīyapuṇyōdayātsamadhigatāśēsha-paṁchamahāśabda*) and who is adorned with all royal titles such as *Mahā-sāmantādhipati*, 'the lord of the city of Tagara' (*Tagara-puraparamēśvasra*), 'a king of the Śilāhāra family' (*Śilā-hāranarēndra*), 'a scion of the fmaily of Jīmūtavāhana' (*Jīmūtavāhanānvayaprasūta*), '(he) who has the ensign of the golden Garuḍa' (*suvarṇagaruḍadhvaja*), '(he) who is a born Vidyādhara' (*sahajavidyādhara*), '(he) who

surpassed the world in liberality' (*tyāgajagajjhampi*), '(he) who is the crest-jewel of the *Māṇḍalikas*' (*māṇḍalika-sikhāmaṇi*), '(he) who is an adamantine cage to suppliants' (*śaraṇāgata-vajrapaṁjara*), and so forth. He was ruling over the entire Kōṅkaṇa country consisting of fourteen hundred villages headed by Purī, together with several *maṇḍalas* conquered by his own arm. It is further stated that Chhittarāja had five ministers (*pradhānas*), of whom three are mentioned by name, *viz.,* the *Sarvādhikārin* Nāganaiya, *Sāndhivigrahika* Sīhapaiya and the *Karṇāṭa-sāndhivigrahika* Kapardin. It is noteworthy that Chhittarāja felt the need for having a special minister for peace and war for the Karṇāṭaka country.

After this formal introduction the inscription records the grant, by Chhittarāja, of a field belonging to Vōdaṇibhaṭṭa (which the king had evidently purchased from the owner) in the village of Noura[1] to the Brāhmaṇa Āmadēvaiya, the son of Nōḍamaiya, who belonged to the Parāśara *gōtra* and the Chhandōga *śākhā* (*i.e.,* Sāmavēda). The village was comprised in the Shaṭshashṭi[2] *vishaya,* including Sthānaka.[3] The field was bounded on the east by the boundary of the village Gōṁavaṇi,[4] on the south by that of Gōrapavalī,[5] on the west by a royal road and on the north-east by the boundary of the same village Gōṁvaṇi. The object of the grant was to provide for the performance of the usual six duties of the Brāhmaṇas, of the obligatory and occasional rites (*nityanaimittika-saṁvyavahāra*) and of *bali, charu, vaiśvadēva* and *agnihōtra.*

The royal order in respect of the said grant of a field was addressed to all the assembled princes (*Rājaputra*), counsellors (*Mantri*), the family priest (*Purōhita*), the minister (*Amātya*), the principal and-

subordinate officers (*pradhānāpradhāna*), whether connected with him or not (*samabadhyamānakā-nanyānapi*), as well as the heads of the *rashtras* (*Rāshṭrapati*), *vishayas* (*Vishayapati*), towns (*Nagarapati*), villages (*Grāmapati*), officials and non-officials, (*niyuktāniyukta*), government servants (*rājapurusha*) and village people (*janapada*) as also artisans and guilds (*haṁyamāna-nagara*) and three classes of townsmen (*pauratrivarga*) and others.

The grant is dated on Sunday, the 15th tithi of the bright fortnight of Kārttika in the Śaka year 948, the cylcic year being Kshaya, on the occasion of a solar eclipse. The date is evidently irregular; for there cannot be a solar eclipse on the 15th tithi of the bright fortnight of any month. After some discussion it has been suggested that more likely the grant was made on the occasion of the lunar eclipse on Friday, 28th October 1026 A.D. and was actually recorded two days later, on Sunday, 30th October 1026 A.D.

This charter was written by the Treasury Officer (*Bhāṇḍāgārasēna*) Jōgapaiya, the nephew of *Bhāṇḍāgārasēna*, the great poet (*mahākavi*) Nāgalaiya.

Notes

1. Nōura is the modern village of Nōvāhara (*CII.*, VI, p.56).

2. Shaṭshashṭhi is the modern Salsette, and lies north of Bhāṇḍūp (*ibid.*).

3. Sthānaka is the modern Ṭhāṇa in Maharashtra (*ibid.*).

4. The village Gōṁvaṇi is now called Gōwhan, and lies north of Bhāṇḍūp (*ibid*).

5. Gōrapavalī may be the old name of Bhāṇḍūp (*ibid.*).

******

No.14

DIVE AGAR PLATES OF CHHITTARAJA: SAKA YEAR 949

Location	: Divē Āgar, Kolaba District, Maharashtra
Date	: Śaka Year 949 = 1027A.D.
Script	: Nāgarī
Language	: Sanskrit
King	: Chhittarāja
Dynasty	: Śilāhāras of North Kōṅkaṇ
Reference	: Mirashi, V.V., *CII.,* VI, pp.60-64, No.10
	Gai, G.S., *EI.,* XXXIX, pp.128-32

Text

Metre: Vv. 1, 2, 6 *Anushṭubh;* 3 *Vasantatilakā;* 4 *Sragdharā;* 5, 7 *Indravajrā*

सिद्धम्। जयश्चाभ्युदयश्च ॥

लभते सर्व्वकार्य्येषु पूजया गणना यकः।

विघ्नं निघ्नन्स वः पायादपायाद्गणनायकः ॥ १ ॥

स वः पातु शिवो नित्यं यन्मौलौ भाति जाह्नवी।

सुमेरुशिखरोद्गच्छदच्छचंद्रकलोपमा ॥ २ ॥

जीमूतकेतुतनयो नियतं दयालु

र्जीमूतवाहन इति त्रिजगत्प्रसिद्धः।

देहं निजं तृणमिवाकलयन्परार्थे

यो रक्षति स्म गरुडात्खलु शंखचूडम्॥ ३ ॥

तस्यान्वये ॥

आद्यः श्रीमान्कपर्द्दी तदनु पुलसतिस्तत्सुतोन्यः कपर्द्दी

तत्सूनुर्वप्पुवन्नः क्षितिपतिरभवज्झंझराजस्ततोभूत्।

तद्भ्राता गोग्गिराजस्तदनु च नृपतिर्व्वज्जडाचार्यदेव

स्तस्माज्जातस्तनूजस्त्रिभुवनतिलको दीप्तिमार्त्तण्डदेवः ॥ ४ ॥

श्रीमानभूद्वज्जडदेवनामा

श्रीकेशिदेवो नृपतिस्ततोभूत्।

तद्भ्रातृजो वज्जडदेवसूनुः

श्रीच्छिन्तपैयो नृपतिर्ब्बभूव ॥ ५ ॥

अथ स्वकीयपुण्योदयात्समधिगतपञ्चमहाशब्दमहासामन्ताधिपतित-गरपुरपरमेश्वरत्यागजगज्झम्पशरणागतवज्रपंजरप्रभृतिसमस्तराजावली -विराजितश्रीच्छित्तपैयदेवराजः सर्व्वानेव स्वसम्बध्यमानकानन्यानपि समागामिप्रधानाप्रधानानुयायिनो लोकान्प्रणतिपूजासत्कारसमादेशैः संदिशत्यस्तु वः संविदितं यथा। असारोयं संसारः पवनचलितकमलि-नीदलगतजललवतरलतरे धनायुषी इति मत्वा दृढतरविरक्तिबुद्ध्या संगृह्णीयात् दानफलम्॥ तथा च॥

कृतत्रेताद्वापरेषु तपोत्यर्त्थं प्रशस्यते।

मुनयोत्रानुशंसंति दानमेकं कलौ युगे ॥ ६ ॥

इति मुनिवचनानि मत्वा मया शकनृपकालातीतसंवत्सरशतेषु नवसु एकोनपञ्चाशदधिकेषु प्रभवसंवत्सरान्तर्ग्गत पुष्य वदि एकादश्यां यत्रां-कतोपि संवत् ९४९ पुष्य वदि ११ सोमे संजातोदगयनपर्व्वणि सुतीर्त्थे स्नात्वा भगवन्तमुमापतिमभ्यर्च्चर्य दीपकागरनिवासिने काश्यपगोत्राय

बह्वृचशाखिने षट्कर्म्मनिरताय महाब्राह्मणगोविंदाय तीपकीयसौदपैय-सुताय मन्दरजविषये वेलासिवागरान्तर्व्वर्त्तिनो दण्डनायकश्रीनागवर्म्म-प्रदत्तारामगुम्माय विंशतिद्रम्मा उदकातिसर्गेण नमस्यवृत्त्या प्रतिपा-दिताः। तदस्य सान्वयबंधोरपि भुंजतो भोजयतो वा स्वकीयाराम-कुगुम्मविषये न केनापि परिपंथना करणीया॥ यत उक्तमेव महामुनिभिः।

यानीह दत्तानि पुरा नरेंद्रैर्दानानि धर्म्मार्थयशस्कराणि।
निर्म्माल्यवान्तिप्रतिमानि तानि को नाम साधुः पुनराददीत॥ ७॥

इति मत्वा सर्व्वैरपि समागामिभिः भूपालैः पालनधर्म्मलोभ एव करणीयः। न पुनस्तल्लोपनपापकलंकाग्रेसरेण केनापि भवितव्यम्। यस्त्वेवमभ्यर्त्थितोपि लोभादज्ञानतिमिरपटलावृतमतिराच्छिंद्यादाच्छिद्य-मानमनुमोदेत वा स पञ्चभिरपि पातकैरुपपातकैश्च रौरवमहारौरवा-न्धतामिस्रादिनरकांश्चिरमनुभविष्यति यथा चैतदेवं तथा शासनदाता लेखकहस्तेन स्वमतमारोपयति यथा॥ मतं मम महामण्डलेश्वरश्रीम-च्छिन्तपैयदेवराजस्य महामण्डलेश्वरश्रीमद्बज्जडदेवराजसूनोर्यदत्र शासने लिखितम्। लिखितं चैतन्मया श्रीमद्राजानुज्ञया सामन्तश्रीच्छिन्त-पैयनियोगाच्च भाण्डागारसेनमहाकविश्रीनागलैयभ्रातृसुतजोउपैयेन। यदत्रोनाक्षरमधिकाक्षरं वा तत्सर्व्वं प्रमाणमिति॥ श्रीरस्तु॥ मंगलमिति॥

Summary

This inscription, engraved on a set of three copper-plates consists 49 lines of boldly engraved and well-

preserved writing. The plates are held together by a ring the ends of which are sordered to a seal. On this seal there appears Garuḍa, seated full front, with folded hands and outstretched wings. The record is partly in verse and partly in prose. It registers a grant, made by the Śilāhāra king Chhittarāja, of a certain amount to a Brāhmaṇa.

The initial *maṅgala ślōkas* in praise of Gaṇanāyaka and Śiva and also the verse describing Jīmūtavāhana, the legendary ancestor of the Śilāhāras, are repeated from earlier records of the dynasty. Unlike those records, however, the present plates summarise the description of first eight ancestors of the reigning king in a single verse (4). In it Aparājita is mentioned by his epithet *Dīptimārtaṇḍadēva.* The next verse (5) mentions Vajjaḍa (II) and his successor Kēśidēva (*alias* Arikēsarin).

The inscription refers itself to the reign of the Śilāhāra king Chhittarāja (called Chhittapaiya and Chhintapaiya here), the son of Vajjaḍa II. He is described as in his other grants, though his titles here are fewer than elswhere.

The object of the present inscription is to record the remission, by the king, of the tax of twenty *drammas* on the cluster of trees in the orchard (*ārāmagumma*) donated by the *Daṇḍanāyaka* Nāgavarman in (the village) Vēlāsivāgara[1] comprised in the Vishaya of Mandaraja.[2] The donee was the learned Brāhmaṇa Gōvinda of the Ṛigvēda *śākhā* and the Kāśyapa *gōtra,* who was residing at Dīpakāgara.[3] He was a son of Saudapaiya of Tīpaka.[4] The grant was made on the occasion of the Uttarāyaṇa or Makara saṅkrānti which occurred on Monday, the eleventh tithi of the dark fortnight of Pushya in the expired Śaka year 949, the cyclic year being Prabhava. This corresponds to 25th December, 1027 A.D., though Uttarāyaṇa-saṅkrānti occurred on the previous day.

Unlike other grants of the Śilāhāras, the present one does not mention the contemporary five ministers, except the Tressury Officer (*Bhāṇḍāgārasēna*) Nāgalaiya, who is named incidentally in connection with the scribe Jōupaiya, who was his nephew. As in some other grants, Nāgalaiya is described here as a Mahākavi.

Notes

1. Vēlāsivāgara comprised in the Mandaraja *vishaya*, where the orchard was situated, is probably identical with Vēḷās, about two and a half miles north of Divē Āgar (*CII.*, VI, p.61).

2. The *vishaya* of Mandaraja finds mention also in the Prince of Wales Museum plates of Mummuṇirāja (No.21 below) (*ibid.*).

3. Dīpakāgara is evidently identical with Divē Āgar, where the plates were found (*ibid.*).

4. Tipaka may be Tivare in the Karjat Taluka of the Kolaba District (*ibid.*).

❋❋❋❋❋❋

No.15

BERLIN MUSEUM PLATES OF CHHITTARAJA SAKA YEAR 956

Location	: Berlin Museum
Date	: Śaka Year 956 = 1034 A.D.
Script	: Nāgarī
Language	: Sanskrit
King	: Chhittarāja
Dynasty	: Śilāhāras of North Kōṅkaṇ
Reference	: Mirashi; V.V., *CII.,* VI, pp.64-71; No.11

Text

Metre: Vv. 1, 2, 11, 15, 16, 18-20, 22 *Anushṭubh;* 3-5, 12 *Vasantatilakā;* 6 *Pṛithvī;* 7, 9, 10, 13 *Śārdūlavikrīḍita;* 8 *Sragdharā;* 14, 17 *Indravajrā;* 21 *Śālinī*

सिद्धम्। जयश्चाभ्युदयश्च।

लभते सर्व्वकार्य्येषु पूजया गणनाय कः।

विघ्नं निघ्नन्स वः पायादपायाद्गणनायकः॥ १॥

स वः पातु शिवो नित्यं यन्मौलौ भाति जाह्नवी।

सुमेरुशिखरोद्गच्छदच्छचन्द्रकलोपमा॥ २॥

जीमूतकेतुतनयो नियतं दयालु

र्ज्जीमूतवाहन इति त्रिजगत्प्रसिद्धः।

देहं निजं तृणमिवाकलयन्परार्थे

यो रक्षति स्म गरुडात्खलुशंखचूडम्॥ ३॥

तस्यान्वये निखिलभूपतिमौलिनूत्न

रत्नद्युतिच्छुरितनिर्म्मलपादपीठः ।

श्रीसाहसांक इव साहसिकः कपर्द्दी

सीलारवंशतिलको नृपतिर्ब्बभूव ॥ ४ ॥

तस्मादभूच्च तनयः पुलशक्तिनामा

सीमासमः सुरगुरूदितराजनीतेः ।

निर्जित्य संगरसुखेखिलवैरिवर्ग्गं

निष्कण्टकं जगति राज्यमकारि येन ॥ ५ ॥

ततोपि समभूत्सुतो नृपशिरोविभूषामणिः

शितः सृणिरिवापरोरिकरिणां कपर्द्दी लघुः ।

यदीययशसा जगत्यतिशयेन शुक्लीकृते

न भाति सुरवारणो न च शशी न दुग्धाम्बुधिः ॥ ६ ॥

तस्मादप्यभवद्विभूतिपदवीपात्रं पवित्रीकृता

शेषक्ष्मावलयो महीपतिलकः श्रीवप्पुवन्नः सुतः ।

संग्रामांगणरंगिणासिलतया लूनैकदन्ता हठा

त्सर्व्वे येन विनायका विरचिता विद्वेषिणां दन्तिनः ॥ ७ ॥

तस्माज्जातस्तनूजो रजनिकर इवानंदिताशेषलोकः

श्लाघ्यः श्रीझंझराजो दिवसकर इव ध्वस्तनिःशेषदोषः ।

शंभोर्यो द्वादशापि व्यरचयदचिरात्कीर्त्तनानि स्वनाम्ना

सोपानानीव मन्ये प्रणततनुभृतां स्वर्ग्गमार्ग्गोच्चतानाम् ॥ ८ ॥

भ्राता तत्र ततस्ततोज्ज्वलयशोराशिप्रकाशीकृता

शेषक्ष्मावलयो बली बलवतां श्रीगोग्गिराजोभवत् ।

चापाकर्षणकर्म्मणि प्रगुणतां तस्मिन्गते भूपतौ

भीष्मद्रोणपृथासुतप्रभृतयश्चित्ते चमत्कारिताः ॥ ९ ॥

तस्माद्विस्मयकारिहारिचरितप्रख्यातकीर्त्तिः सुतः

श्रीमान्वज्जडदेवभूपतिरभूद्भूचक्रचूडामणिः ।

दोर्द्दण्डैकबलस्य यस्य सहसा संग्रामरंगांगणे

राज्यश्रीः स्वयमेत्य वक्षसि रतिं चक्रे मुरारेरिव ॥ १० ॥

जयन्त इव वृत्रारेः पुरारेरिव षण्मुखः ।

ततः श्रीमानभूत्पुत्रः सच्चरित्रोपराजितः ॥ ११ ॥

श्रीमानभूत्तदनु वज्जडदेवनामा

भूपालमस्तकमणिस्तनयो नयज्ञः ।

अद्यापि यस्य चरितानि जनाः समस्ताः

रोमांचकंचुकितगात्रलता स्तुवन्ति ॥ १२ ॥

तद्भ्राताथ ततोरिकेसरिनृपो जातः सतां सम्मतो

दृप्तारातिकुलाचलैकदलने दंभोलिलीलां दधत् ।

गत्वा शैशव एव सैन्यसहितो दृष्ट्वा च सोमेश्वरं

तस्याग्रे पितुराज्ञया जगदलं यः कीलयित्वागतः ॥ १३ ॥

तद्भ्रातृजो वज्जडदेवसूनुः श्रीच्छिन्तराजो नृपतिर्ब्बभूव ।

शीलारवंशः शिशुनापि येन नीतः परामुन्नतिमुन्नतेन ॥ १४ ॥

अथ स्वकीयपुण्योदयात् समधिगतपंचमहाशब्दमहासामन्ताधिपतित-
गरपुरपरमेश्वरशिलाहारनरेंद्रजीमूतवाहनान्वयप्रसूतसुवर्ण्णगरुडध्वजा-
भिमानमहोदधित्यागजगज्झम्पिशरणागतवज्रपंजरप्रभृतिसमस्तराजा-

वलीसमलंकृतमहामण्डलेश्वरश्रीच्छिन्तराजदेवे निजभुजोपार्ज्जितानेक-मण्डलसमेतां पुरीप्रमुखचतुर्द्दशग्रामशतीसमन्वितां समस्तकोंकणभुवं समनुशासति तस्यैतद्राज्यचिन्ताभारं समुद्वहति महामात्यश्रीनागणैये तथा महासान्धिविग्रहिकश्रीनाउपैये सत्येतस्मिन्काले प्रवर्त्तमाने स च महामण्डलेश्वरश्रीच्छिन्तराजदेवः सर्व्वानेव स्वसम्बध्यमानकानन्यानपि समागामिराजपुत्रमंत्रिपुरोहितामात्यप्रधानाप्रधाननैयोगिकान् तथा राष्ट्रपतिविषयपतिनगरपतिग्रामपतिनियुक्तानियुक्तराजपुरुषजनपदान् तथा हंयमननगरपौरत्रिवर्ग्गप्रभृतींश्च प्रणतिपूजासत्कारसमादेशैः संदिशत्यस्तु वः संविदितं यथा ॥ चला विभूतिः क्षणभंगि यौवनम्। कृतान्तदन्तान्तर्वर्त्ति जीवितम्॥ तथा चान्तर्लीनजराराक्षसीप्रारब्धग्रासं यौवनं स्वर्ग्ग-वासान्नरकपातसममिष्टसमागमवियोगदुःखं असारः संसारः सहजजरा-मरणसाधारणं शरीरं पवनचलितकमलिनीदलगतजललवतरलतरे धनायुषी इति मत्वा दृढतरविरक्तिबुद्धया संगृह्णीयाच्च दानफलम्॥

कृतत्रेताद्वापरेषु तपोत्यर्त्थं प्रशस्यते।
मुनयोत्रानुशंसन्ति दानमेकं कलौयुगे ॥ १५ ॥
न तथा सफला विद्या न तथा सफलं तपः।
यथात्र मुनयः प्राहुर्द्दानमेकं कलौ युगे ॥ १६ ॥
तथा चोक्तं भगवता व्यासेन ॥
अग्नेरपत्यं प्रथमं सुवर्ण्णं भूर्वैष्णवी सूर्यसुताश्च गावः।
लोकत्रयं तेन भवेद्धि दत्त यः कांचनं गाश्च महीं च दद्यात्॥ १७ ॥
भूमिदानं सुपात्रेषु सुतीर्थेषु सुपर्व्वसु।

अगाधापारसंसारसागरोत्तारणं भवेत्॥ १८॥

इति धर्म्माधर्म्मविचारचारुचिरन्तनमुनिवचनान्यवधार्य मातापित्रोरात्मनश्च श्रेयोर्थिना मया शकनृपकालातीतसंवत्सरशतेषु नवसु षट्पंचाशदधिकेषु भावसंवत्सरान्तर्ग्गतद्वितीयचैत्रशुद्धचतुर्द्दश्यां यत्रांकतोपि संवत् ९५६ चैत्रशुद्ध १४ संजातचैत्रिकापर्व्वणि सुतीर्थे स्नात्वा गगनैकचक्रचूडामणये त्रैलोक्यचक्षुषे कमलिनीकामुकाय भगवते सवित्रे नानाविधकुसुमश्लाघ्यमर्घ्यन्दत्त्वा सकलसुरासुरगुरुत्रैलोक्यस्वामिनं भगवन्तमुमापतिमभ्यर्च्च्य अस्मदनुमत्या विषयीभाइयपेन माहिरहारविषयान्तःपातिकुन्देग्रामीयोत्तरदिग्भागे विरचितश्रीभाइयपेश्वरदेवायतने निवासिनां तपोधनानां ग्रासाच्छादनार्त्थं गन्धपुष्पधूपदीपनैवेद्यताम्बूलगीतवाद्यनृत्यादिदेवभागकरणाय खण्डस्फुटितसमुद्धरणार्त्थञ्च माहिरहारषट्षष्टि विषयान्तःपातिकुन्देग्रामान्तर्व्वर्त्तिअभिनवदेवच्छेभाक्षेत्रं यस्य चाघाटनानि। पूर्व्वतः कुन्भिवटीक्षेत्रं कोलिहिरकश्च। पश्चिमतः गोवणिमर्यादया। दक्षिणतः खनालासक्षमभूतटाकमर्यादया॥ उत्तरतः विझानीचोलिमर्यादया। एवं चतुराघाटनोपलक्षितः स्वसीमापर्यन्तः सतृणकाष्ठोदकोपेतः समस्तोत्पत्तिसंयुक्तः पूर्व्वदत्तदेवदायब्रह्मदायवर्ज्जः अनादेश्यः अनासेध्यः अचाटभटप्रवेश्यः कृतहस्तोदकातिसर्ग्गेणपश्चिमाम्नायनिर्ग्गतश्रीवाडाचार्यशिष्यज्ञानशिवभट्टारकाणां नमस्यवृत्त्या परमया भक्त्या प्रतिपादितः। तदेतेषामन्येषामपि गोत्रीयाधिकारिकाणां तपोधनानां भुंजतां भोजयतां वा कृषतां कर्षयतां वा न केनापि परिपंथना करणीया॥

यत उक्तं महामुनिभिः ।

वहुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः ।

यस्य यस्य यदा भूमिः तस्य तस्य तदा फलम् ॥ १९ ॥

सद्योदानं निरायासं सायासं दीर्घपालनम् ।

अत एवर्षयः प्राहुर्द्दानाच्छ्रेयोनुपालनम् ॥ २० ॥

दत्त्वा भूमिं भाविनः पार्त्थिवेन्द्रान् भूयो भूयो याचते रामभद्रः ।

सामान्योयं धर्म्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ॥ २१ ॥

इति चिरन्तनमुनिवचनान्यवधार्य सर्व्वैरपि समागामिभिर्भूपालैरस्मद्वंशजैः पालनधर्म्मफललोभ एव करणीयः । न पुनस्तल्लोपपापकलंकाग्रेसरेण केनापि भवितव्यम् ॥ यस्त्वेवमभ्यर्त्थितोपि लोभादज्ञानतिमिरपटलावृतमतिराच्छिन्द्यादाच्छिद्यमानमनुमोदेत वा स पञ्चभिरपि पातकैरुपपातकैश्च लिप्तो रौरवमहारौरवान्धतामिस्त्रादिनरकांश्चिरमनुभविष्यति । यथा चोक्तं भगवता व्यासेन ।

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।

स विष्ठायां कृमिर्भूत्वा कृमिभिः सह पच्यते ॥ २२ ॥

यथा चैतदेवं तथा शासनदाता लेखकहस्तेन स्वमतमारोपयति यथा मतं मम महामण्डलेश्वरश्रीच्छिन्तराजदेवस्य महामण्डलेश्वरश्रीमद्वज्जडदेवराजसूनोर्यदत्र शासने लिखितम् । लिखितं चैतन्मया श्रीमद्राजानुज्ञया भाण्डागारसेनजोउपैयेन भाण्डागारसेनमहाकविश्रीनागलैयभ्रातृसूनुना । यथा चोनाक्षरमधिकाक्षरं वा तत्सर्व्वं प्रमाणमिति ॥ श्रीरस्तु ॥ श्रीर्भवतु ॥ मंगलञ्चास्तु ॥ मंगलं महाश्रीः ॥

Summary

This inscription, engraved on a set of three copper-plates, consists 74 lines of well-exceuted and well-preserved writing. They are held togerther by a ring, which has a round seal with the figure of Garuḍa in the *vajraparyaṅkāsana,* with the hands joined in the *añjali-mudrā.* The record is written partly in verse and partly in prose.

The inscription refers itself to the reign of the Śilāra (called Śilāhāra in line 28) *Mahāmaṇḍalēśvara* Chhittarāja (whose name in written here in all places as Chhintarāja). Its object is to record the grant, by Chhittarāja, of a field called *Abhinava-dēva-chchhēbhā* in the village of Kundē[1] situated in the *vishaya* (district) of Māhirahāra[2] containing sixty-six (villages) to the Śaiva ascetic Jñānaśiva, a disciple of holy Vāḍāchāya, who belonged to the Western Āmnāya. The purpose of the grant was to provide for the food and clothing of the ascetics dwelling in the temple of the holy Bhāiyapēśvara and also for the expenses of the repairs of the temple. The donated field was bounded on the east by the field called Kumbhivāṭi and Kōlihiraka, on the west by the boundary of the village Gōvaṇi, on the south by the boundary of a tank and on the north by the boundary of (the village) Vijñānīchōli.[3]

The royal order of the grant of land mentioned above was addressed to all assembled princes (*Rājaputra*), counsellors (*Mantri*), the family priest (*Purōhita*), the ministers (*Amātya*), the principal and subordinate Officers (*Pradhānāpradhāna*), whether connected with him (the king) or not, as well as the heads of the *rāshṭras* (*Rāshṭrapati*), *Vishayas* (*Vishayapati*), towns (*Nagara pati*), villages (*Grāmapati*), officials and non-officials (*Niyuktāniyukta*), government servants and village-people (*Rājapurusha-janapada*), and also artisans (*haṁyamana*),

guild (*nagara*) and the three classes of townsmen (*pauratrivargga*).

The genealogy of the donor Chhittarāja is given here as in his Bhāṇḍup plates (No. 13 above), many of the laudatory verses being common to both the grants. So the present plates do not add to our historical knowledge. Chittarāja bears in this grant the same titles as in the Bhāṇḍup plates. The present plates mention only two of his ministers, *viz.,* the *Mahāmātya* Nāgaṇaiya and the *Mahāsāndhivigrahika* Nāüpaiya. The former is mentioned as *Sarvādhikarin* of Chhittarāja in the Bhāṇḍup plates. The *Mahāsāndhivigrahika* seems to have been changed in the interval between the dates of the two grants. The scribe was the same as in the Bhāṇḍup plates, but his name appears here as Jōüpaiya (not Jōgapaiya as in the Bhāṇḍup plates).

The grant is dated as the fourteenth tithi (*Śivarātri*) of the bright fortnight of the second Chaitra in the Śaka year 956, the cyclic year being Bhāva, corresponding to Friday, the 5th April 1034 A.D.


This record consists as many as eight usual imprecatory and benedictory stanzas and concludes with auspicious phrases seeking prosperity and happiness.

Notes

1. The village Kundē which comprised the field still retains its name and is situated almost near the northern boundary of the Bhiwandi Taluk in the Thana District (*CII.,* VI, p.65).

2. Māhirahara in which the donated field was situated has been identified roughly with the modern Taluk of Bhiwandi of the Thana District (*ibid.*).

3. Vijñānichōli is probably identical with Chiñchōli, about four miles north of Kundē (*ibid.*).



No.16

GRANT OF CHAMUNDARAJA: SAKA YEAR 956

Location : Chinchaṇī, Thana District, Maharashtra

Date : Śaka Year 956 = 1034 A.D.

Script : Nāgarī

Language : Sanskrit

King : Chāmuṇḍarāja

Dynasty : [Mōḍha]

Reference : Mirashi; V.V., *CII.,* VI, pp.71-75; No.12
Sircar, D.C., *EI.,* XXXII, pp.63-68

Text

Metre: Vv. 1, 3, 4, 6 *Anushtubh;* 2 *Vaṁśastha;* 5 *Śālinī*

सिद्धिः। जयश्चाभ्युदयश्च।

लभते सर्व्वकार्य्येषु पूजया गणनाय कः।

विघ्नं निघ्नन्स वः पायादपायाद्गणनायकः॥ १॥

समधिगतपंचमहाशब्दमहासामन्ताधिपतितगरपुरपरमेश्वरश्रीसीलारनरे-
न्द्रजीमूतवाहनान्वयप्रसूतसुवर्ण्णगरुडध्वजाभिमानमहोदधिशरणागत-
वज्रपंजरेत्यादिसमस्तराजावलीसमलंकृतमहामण्डलेश्वरश्रीमच्छिन्तुराज
देवकल्याणविजयराज्ये एतदीयमहामात्यश्रीनागणैये महासान्धिवि-
ग्रहिकश्रीवाउपैये च वर्त्तमाने महामण्डलेश्वरश्रीच्छिन्तुराजेन प्रदत्तं
महामण्डलेश्वरश्रीचामुण्डराजे श्रीसंयानपत्तनं प्रभोक्तरि सति अथ
स्वकीयपुण्योदयात् समधिगताशेषपंचमहाशब्दमहासामन्ताधिपतिनिज-
भुजविक्रमादित्यसाहसचक्रवर्त्तिअरिमाण्डलीकाधीशभुजंगलाटप्राकाररा-

यध्वंसक विपक्षराज्यभूत्यर्ग्गलउभयकुलधवलवैरिराजांकुशत्रिभुवननील-प्रभृतिसमस्तराजावलीसमलंकृतमहामण्डलेश्वरचामुण्डराजदेवे समनु-शासति संयानं सर्व्वानेव स्वसम्बध्यमानकानन्यानपि हंयमानीय-मुख्यवल्लभव्यवहारिकरणिकान् संव्यवहरक अल्लियमहरमहुमतादीन् पौरमुख्यश्रेष्ठिकेसरिसुवर्ण्णकक्कलवणिज उवसुवर्ण्णसोमैयादीन् तथा विषयिवेव्वलैयं शालास्थानमुख्ययाज्ञिकरत्तिमैय क्षितलक्षियदेलय-केसवैयादीन् महापार्षदक अगस्तिशवीसीलुबभास्करअर्जुनदिनकर-देवेत्यार्यासिंदूरादित्यवर्ण्णप्रभृतींश्च संदिशत्यस्तु वः संविदितं यथा

चला विभूतिः क्षणभंगि यौवनं कृतान्तदन्तान्तरवर्त्ति जीवितम्।

तथाप्यवज्ञा परलोकसाधने नृणामहो विस्मयकारि चेष्टितम्॥ २॥

इत्यवधार्य शकनृपकालातीतसंवत्सरशतेषु नवसु षट्पंचाशदधिकेषु भावसंवत्सरान्तर्ग्गतभाद्रपदबहुलामावास्यायां यत्रांकतोपि संवत् ९५६ भाद्रपद बहुल १५ संजाते अपरपक्षे सुतीर्थे स्नात्वा देवतापूजा-करणादनन्तरं कौतुकमठिकायां श्रीभगवत्याः अग्रे दीपप्रज्वलनार्थं स्वाध्यायिकआगताभ्यागतब्राह्मणपादाभ्यंजनार्थं स्वध्यायिकवीहडहस्ते कृतोदकातिसर्ग्गेण नमस्यवृत्त्या भक्त्या घाणके समुत्पन्नतैलसमुत्पन्न-घटिकसमं महामण्डलेश्वरश्रीचामुण्डराजेन घाणकः प्रदत्तः। तदस्य घाणकं भुंजतो भोजयतो वा न केनापि परिपंथनाः करणियाः॥ छ॥

अचाटभाटप्रवेश्यं अनादेश्यमनासेध्यम्।

बहुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः।

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥ ३॥

सद्योदानं निरायासं सायासं दीर्घपालनम् ।

अत एवर्षयः प्राहुर्दानाच्छ्रेयोनुपालनम् ॥ ४ ॥

दत्त्वा भूमिं भाविनः पार्थिवेंद्रान् भूयो भूयो याचते रामभद्रः ।

सामान्योयं धर्म्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ॥ ५ ॥

इति मुनिवचनान्यवधार्य समस्तागामिनृपतिभिरपि पालनधर्म्मफललोभ एव करणीयः । न पुनस्तल्लोपनपापकलंकाग्रेसरेण केनापि भवितव्यम् ॥ यस्त्वेवमभ्यर्थितोपि लोभादज्ञानतिमिरपटलावृतमतिराच्छिन्द्यादाच्छि-द्यमानमनुमोदेत वा स पंचभिरपि पातकैरुपपातकैश्च संलिप्तो रौरवांधतामिस्त्रादिनरकांश्चिरमनुभविष्यति ॥

आरामाणां सहस्रेण तडागानां शतेन च ।

गवां कोटिप्रदानेन घाणकहर्ता न शुध्यति ॥ ६ ॥

यथा चैतदेवं तथा शासनदाता स्वमतमारोपयति । मतं मम लब्धचतुः-षष्टिश्यामतुरंगमाध्यासितवाद्यप्रोद्दामत्रिकिसतूर्यआहवनीलमहामण्ड-लेश्वरश्रीविज्जराणकसुतत्रिभुवननीलमहामण्डलेश्वरश्रीचामुण्डराजस्य । लिखितं शासनं ध्रुवमम्मलैयेन स्वहस्तेन । यदत्रोनाक्षरमधिकाक्षरं वा तत्सर्व्वं प्रमाणमिति ॥

Summary

This inscription, engraved on both sides of a single copper-plate, consists 32 lines of rather carelessly written but well-preserved writing. This record is composed partly in prose and partly in verse. It has a considerable portion common with the Śilāhāra records of the age and was evidently drafted by some one who had good knowledge of them.

The inscription refers itself to the reign of Chāmuṇḍarāja, a feudatory of the Śilāhāra king Chhinturāja (*i.e.,* Chhittarāja). It states that he was ruling over Saṁyānapattana, which was made over to him by the Śilāra king Chhintarāja. The latter bears in this record most of the titles mentioned in his other records such as *Mahāsāmantādhipati, Tagarapuraparamēśvara, Suvarṇa-garuḍadhvaja* and so on. Chāmuṇḍarāja, though a feudatory prince, bears such high-sounding titles as *Mahāsāmantādhipati, Nijabhuja-Vikramāditya, Arimaṇḍalīkādhīśa* and so on. He evidently occupied a high rank among the feudatories of the Śilāhāra king Chhittarāja. One of his titles mentioned here, *viz., Lāṭa-prākāra-rāya-dhvaṁsaka* refers to his victory over the ruler of Lāṭa (Central and Southern Gujarat). This was evidently a memorable victory which enhanced his influence at the Śilāhāra court.

The object of the inscription is to record the grant, by Chāmuṇḍarāja, of a *ghāṇaka* (oil-mill) in favour of the temple Kautuka-maṭhikā[1] of the goddess Bhagavatī at Saṁyāna.[2] The oil of the mill was to be used for burning a lamp in the temple and also for the besmearing (*abhyaṁjana*) of the feet of the Brāhmaṇa scholars that may visit the temple. The gift was made by pouring water on the hand of the *Svādhyāyika* (scholar) Vīhaḍa, on the fifteenth tithi of the dark fortnight (*i.e. amāvāsyā*) of Bhādrapada in the Śaka year 956. The date corresponds to Sunday, the fifteenth September, 1034 A.D. The grant was evidently made by Chāmuṇḍarāja in connection with the worship of the manes on the *tithi* which is known as *Sarva-pitṛ-amāvāsyā,* though this is not stated explicitly.

Among the persons addressed by Chāmuṇḍarāja in connection with this gift are mentioned the chief artisans (*hamyamana-mukhyas*), prominent citizens, the governor (*Vishayī*) of the place, traders, members of the *Mahāparishad,*[3] and the merchants Alliya, Mahara and

Madhumata. These last-mentioned persons were evidently of the Muslim community settled in the place. From two other charters discovered at Chinchaṇī[4] we know that the Saṁyāna-maṇḍala was governed by Arab feudatory princes during the reigns of the Rāshṭrakūṭa Indra III and Kṛishṇa III. Since then there was evidently an influx of Muslims in North Kōṅkaṇ. Soon after the downfall of Rāshṭrakūṭas the Saṁyāna-maṇḍala was conquered by the Śilāhāra king Aparājita.[5] Later on, Chhittarāja appointed Chāmuṇḍarāja, who had distinguished himself in the war with Lāṭa, as the ruler of the Saṁyāna-maṇḍala.

Some of the epithets applied to Chāmuṇḍarāja and his father Vijjarāṇaka in lines 29-31 are curious. Vijjarāṇaka bears the title *Mahāmaṇḍalēśvara* and *Āhava-nīla.* The latter title probably refers to his skill or bravery in fighting. He is further described as having sixty-four black horses, which were probably regarded as auspicious. Chāmuṇḍarāja himself bears, besides the title *Mahāmaṇḍalēśvara,* that of *Tribhuvana-nīla* meaning perhaps 'an ornament of the three worlds.'

Among the officers of Chhittarāja, two are mentioned by name in this record, *viz.,* the *Mahāmātya* Nāgaṇaiya and the *Mahāsāndhivigrahika* Vāupaiya. The scribe who wrote the present charter was the *Dhruva*[6] (revenue-collector) Mammalaiya.

The importance of the present inscription lies in the fact that it introduces Chāmuṇḍarāja, ruler of Saṁyāna under Śilāhāra Chhittarāja, as also Vijja-rāṇaka, father of Chāmuṇḍarāja and probably an earlier ruler of Saṁyāna under the same Śilāhāra king. The family to which Vijja and Chāmuṇḍa belonged is not mentioned. Since, however, the name Vijja-rāṇaka or Vijjala was also borne by the Mōḍha chief of Saṁyāna who issued the two other charters (Nos.17 and 18 below), it is not impossible that

the two Vijja-rāṇakas belonged to the same family. Thus Chāmuṇḍa may have belonged to the Mōḍha family.

Notes

1. This is the same temple or monastery built at Saṁyāna by Kautuka and others and known from the two Chinchani records of the time of the Rāshṭrakūṭa monarchs (See *EI.*, XXXII, pp.45ff., 55ff.).

2. Saṁyāna is the present town of Sanjan in the Thana District of Maharashtra (*EI.*, XXXII, p.65).

3. The *Mahāparshad* is said to be the same as the Pañcha-Gauḍiya or Ārya-dēśiya *Mahāparshad* of Saṁyāna mentioned in both the Chinchani epigraphs mentioned in *n.* 1 above (*EI.*, XXXII, p.64).

4. See *n.* 1 above.

5. See Nos. 66 and 67 of *UVAE.*, VII. Aparājita may have placed the Saṁyāna-maṇḍala in charge of Vijjarāṇaka, the father of Chāmuṇḍarāja (*CII.*, VI, p.72, *n.* 2).

6. The official designation *Dhruva* is a contraction of *Dhruv-ādhikaraṇika* which indicates an officer in charge of the collection of the royal share of the produce from the farmers (*EI.*, XXXII, p.65).



No.17
GRANT OF VIJJALA: Saka 969

Location : Chinchaṇī, Thana District, Maharastra

Date : Śaka 969 = 1048A.D.

Script : Northern Class of alphabets

Language : Sanskrit

King : Vijjala

Dynasty : Mōḍha

Reference : Sircar, D.C., *EI.*, XXXII, pp 68-71

Text

Metre: Vv. 1, 3-8 *Anushṭubh;* 2 *Vaṁśastha;* 9 *Śālinī;* 10 *Śārdūlavikrīḍita*

सिद्धम् स्वस्ति। जयश्चाभ्युदयश्च। श्रीविजयपुरे समधिगताशेषपंच-
महाशब्दः श्रीमोढकुलकमलकलिकाविकाशभास्करः। शरणागत-
वज्रपंजरः अरिमण्डलीकरणविजयलक्ष्मीस्वयंवररङ्गजलनिधिजलशयन-
पदाक्रान्तलक्ष्मीविलासनारायाणः विद्याधरीउरस्थलमुक्ताफलाहारराय:
साधारसेल्लसहस्त्रबाह्वादिवीरविजयाङ्कमालाविराजितः
महामण्डलेश्वरश्रीविज्जलदेवः।

युवराज्यस्थितेनेह येनैव रिपवः क्षयम्।
नीता हरिकिशोरेण द्विपा इव मदोत्कटाः ॥ १ ॥

तत्पादपद्मोपजीवीसर्व्वाधिकारनियुक्तवरिष्ठकश्रीमुम्मुरकः तथा ठक्कुरश्री-
डोम्बलैयादयः एतैर्मंत्रिभिर्मंत्रयित्वा।

चला विभूतिः क्षणभंगियौवनं

कृतांन्तदंतान्तरवर्त्तिजीवितम् ।

तथाप्यवज्ञा परलोकसाधने

नृणामहो विस्मयकारि चेष्टितम् ॥ २ ॥

एतत्संसारासारतां ज्ञात्वा भगवन्मयूखमालिने

चार्घं दत्त्वा माघसंक्रान्तौ ।

शतमिंदुक्षये दानं सहस्रं तु दिनक्षये

विषुवे शतसाहस्रंव्यतीपातेष्वनंतकम् ॥ ३ ॥

श्रीमत्कवतिकमठिकाप्रभुज्यमानकणाड्डग्रामसिरिड्डिका

श्रीमत्कवतिकमठिकागृहस्थबहुधरः तथा काङ्कुः। तथा स्वाध्यायिकः महादेवः तथा लक्ष्मीधरः। एतेभ्यो हस्तोदकेन प्रदत्ता आचंद्रर्ककालं यावत्। न केनापि बाधा करणीयः। यस्तु पुनः कामक्रोधलोभान्तरितमतिः पापतिमिरावृतचक्षुः अस्य प्रतिघातं विधास्यति विधीयमानं चानुमोदयिष्यति स पंचमहापातकैरुपपातकैश्च संयुक्तो भविष्यति। तथा च व्यासः।

प्रासादा यत्र सौवर्ण्णा वसुधाराश्च कामदाः।

गंधर्व्वाप्सरसो यत्र तत्र तिष्ठति दानदः॥ ४ ॥

कल्पकोटिसहस्राणि कल्पकोटिशतानि च।

निवसेद्ब्रह्मणो लोके धर्मदायं करोति यः॥ ५ ॥

धवलान्यातपत्राणि दन्तिनश्च मदोत्कटाः।

सुधौतानि हर्म्याणि युवत्यो रत्नभूषणाः॥ ६ ॥

धर्मदायस्य पुष्पाणि फलमन्यद्भविष्यति ॥ ७ ॥

षष्टिर्व्वर्षसहस्राणि स्वर्गे तिष्ठति दानदः ।

आच्छेत्ता चानुमन्ता च तान्येव नरकं व्रजेत् ॥ ८ ॥

सव्वनितान् भाविनः पार्थिवेंद्रान् भूयो भूयो याचते रामभद्रः ।

सामान्योयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ॥ ९ ॥

यावत्तोयमपांपतेर्व्वसुमती संतिष्ठते चाचला

बिम्बं चांद्रमसं रवेश्च विमलं यावत्तपेद् भास्वरम् ।

यावत्त्विन्दुशिखामणेर्युवतनौ धत्ते धृतिं पार्व्वती

भोगांस्तावदिहानिशं वितनुतां श्रीविज्जलदेवः सदा ॥ १० ॥

शक वत्सर ९६९ लिखितमिदं लिम्बादित्येन ॥

Summary

This inscription,engraved on a set of two copper-plates consists 32 lines of elegantly executed and well-preserved writing. The plates are strung on a ring, the ends of which are affixed beneath a seal. The counter-sunk surface of the seal bears the figure of a standing deity looking like Vishṇu or the Sun-god. The record is composed partly in prose and partly in verse.

The date of the charter in quoted in the last line (line 30) as the Śaka year 969 without any other details. But the occasion of the grant is referred to as the Māgha-saṅkrānti in lines 11-12. The grant therefore seems to have been issued on the 22nd January 1048 A.D.

The record begins with the symbol for *Siddham* followed by the word *svasti* and the *maṅgala:* 'May there be victory and prosperity' *(jayaśchābhyudayaścha).*

Then in lines 1-6 *Mahāmaṇḍalēśvara* Vijjala, also styled *Samadhigat-āśēsha-pañcha-mahāśabda,* is represented as flourishing at Vijayapura[1]. Vijjala is endowed with several other epithets, of which *Śaraṇāgata-vajra-pañjara* was imitated from the Śilāhāras, although it is found in the records of some other royal families as well. He is also described as 'the sun that opened the lotus bud which is the illustrious Mōḍha family' *(mōḍha-kula-kalikā-vikāsa-bhāskara).* Another of his epithet seems to refer to his success against certain adversaries called Sādhāra, Sēlla and Sahasrabāhu. They appear to have been small local chiefs; but their identification is uncertain. A stanza in lines 6-7 states that Vijjala was successful against his enemies even when he was the *Yuvaraja.* This stanza must have been adopted from a stanza describing Krishna III (939-67 A.D.) and found in the Rāshṭrakūṭa records. But whom Vijjala served as *Yuvarāja* cannot be determined.

Lines 7-9 record the grant of the *sireḍirkā* (apparently a sort of tax or cess) relating to the village of Kaṇāḍḍa-grāma in the possession of the Kavatika-maṭhikā in favour of the householders Bahudhara and Kāṅkua as well as the scholars Mahādēva and Lakshmīdhara, all of them apparently attached to the *maṭhikā* of Kavatika, on the occasion of the Māgha-saṅkrānti. There is no dout that *Kavatika* is a modification of *Kautuka,* the name of one of the builders of the *maṭhikā* at Saṁyāna, which is not only known from the record of Chāmuṇḍarāja (No.16 above) but also from the Chiñchaṇi plates of Rāshṭrakūṭa Indra III and Kṛishṇa III. Lines 8-9 state that the grant was made in consultation with the ministers *(mantrin)* including *Varishṭhaka* Mummuraka and *Ṭhakkura*

Ḍōmbalaiya, the first of the two being the chief minister *(sarv-ādhikāra-niyukta).* It is also stated that it was made by the chief after having worshipped the lord Mayūkha-mālin, *i.e* the Sun-god. This fact coupled with the possible representation of the Sun-god on the donor's seal seems to suggest that the Mōḍhas of Saṁyāna were devotees of the said deity. The well-known stanza beginning with *chalā vibhūtiḥ* is quoted in this section. The grant was made on a permanent basis (apparently as a permanent endowment) and people were warned not to create any obstacle in the enjoyment of the gift by the donees.

Some of the imprecatory and benedictory verses are quoted in lines 20-27. Another stanza in lines 27-29 prays for the continued rule of Vijjala, the donor of the grant. The date in the Śaka year is quoted in lines 29-30. The charter ends with the statement that it was written by Limbāditya.

Notes

1. Vijaypur seems to have been the name of the capital of the chief Vijja or Vijjala. The name apparently coined after that of the chief, may have been applied to a suburb of Saṁyāna (*EI.,* XXXII, p.69).



No.18

GRANT OF VIJALA: SAKA 975

Location	: Chinchaṇī, Thanan District, Maharashtra
Date	: Śaka 975=1053 A.D.
Script	: Nāgarī
Language	: Sanskrit
King	: Vījala
Dynasty	: Mōḍha
Reference	: Sircar, D.C., *EI.*, XXXII, pp.71-76

Text

Metre: Vv. 1, 3-9, 12-16 *Anushṭubh;* 2 *Vaṁśastha;* 10 *Pushpitāgrā;* 11 *Śālinī*

सिद्धम् ओं विनायकाय नमः। जयश्चाभ्युदश्च।

लभते सर्व्वकार्येषु पूजया गणनाय कः।

विघ्नं निघ्नन् स वः पायादपायाद् गणनायकः॥ १॥

श्रीमोढान्वयप्रसूतश्रीखदिरावतीलब्धप्रसादश्रीदीमराकश्रीऐंगलदेवसुतः- श्रीविजराणको नृपतिर्बभूव। श्रीमोढान्वयप्रसूतेन वंशो नीतः शिशुनापि तेन परामुन्नतिमुन्नतेन। अथ स्वकीयपुण्योदयात्समधिगताशेषपंच- महाशब्दमहासामन्ताधिपतितगरपुरपरमेश्वरश्रीमोढान्वयप्रसूतमहामंडले श्वरश्रीवीजलदेवः प्रतिपालयति संयानमण्डलम्। मण्डलीकश्रीविज- राणके निजभुजोपार्ज्जिताभिनवराज्ये चतुःसहस्रद्रंगमण्डलं संयामनपत्त- नसप्तशतम् आकाशिकापर्यन्तमनुशासति एतदीयराज्यसमस्तचिन्ताभारं समुद्वहति वरिष्ठकश्रीमुम्मुरकः तथा संयानीयचिन्तामुद्वहति महाठक्कुर-

डोम्बलैयः विशेषेण समस्तराज्यधनशरीरहितकारिणो महाप्रधानश्रीबुद्ध-प्पैयादयः सव्वनिव स्वसंबध्यमानकान् समागामिराजपुत्रमंत्रिपुरोहिता-मात्यप्रधाननियोगिकांश्च राष्ट्रपतिनगरपतिध्रुवपतिजनपदान् हंयमनपौ-रश्रीस्थानमोढब्राह्मणप्रभृतीन् सप्रणतिपूजासमादेशैः संदिशत्यस्तु वः

चला विभूतिः क्षणभंगि यौवनं
कृतान्तदन्तान्तरवर्त्ति जीवितम्।
तथाप्यवज्ञा परलोकसाधने
नृणामहो विस्मयकारि चेष्टितम्॥ २॥

तथान्तर्ल्लीनजराराक्षसीप्रारब्धग्रासं यौवनादिकं स्वर्ग्गवासान्नरकपात-सममिष्टसमागमवियोगदुःखम् कदलीगर्भवदसारः संसारः सहजजरा-मरणसाधारणकं शरीरकं पवनप्रचालितकमलिनीदलगतजललव-वदायुरिति मत्वा मुनिवचनानि दृढयन्ति दानफलमित्यवधार्य

कृतत्रेताद्वापरेषु तपोत्यर्थं प्रशस्यते।
दानमेकं कलौ युगे॥ ३॥

तथा चोक्तं भगवता व्यासेन।

अग्नेरपत्यं प्रथमं सुवर्ण्णं
भूर्व्वैष्णवी सूर्यसुताश्च गावः।
लोकत्रयं तेन हि दत्तमक्षयम्॥ ४॥

आस्फोटयंति पितरः प्रवल्गन्ति पितामहाः।
भूमिदोस्मिन्कुले जातः स नः संतारयिष्यति॥ ५॥

भूमिदानं सुपात्रेषु सुतीर्थेषु सुपर्व्वसु।

अगाधापारसंसारसागरोत्तारणं भवेत् ॥ ६ ॥

भूमिदानस्य पुष्पाणि फलं स्वर्ग्गे पुरंदरः ॥ ७ ॥

मातापित्रोरात्मनश्च श्रेयोर्थिना मया शकनृपकालातीतसंवत्सरशतेषु नवसु पंचसप्तत्यधिकेषु विजयसंवत्सरान्तर्ग्गतकार्त्तिकवदिपंचदश्यां संजातसूर्यग्रहणे सुतीर्थे स्नात्वा त्रैलोक्यचक्षुषे नानाविधकुसुमश्लाघ्यमघं दत्त्वा त्रैलोक्यस्वामिनम् अभ्यर्च्य श्रीकौतुकमठिकाप्रभुज्यमान-केणसाग्रामी वर्षे त्रीणि शिरिडिकाद्रम्मप्रतिते स्वाध्यायिकगृहस्थादीन् प्रति भोजनाक्षयनीवीं पंचविंशतिब्राह्मणानां विधाय उपरोपितनीवीबन्धकं कृतोदकातिसर्ग्गेण परमभक्त्या प्रतिपादिता। न केनापि क्षुद्रोपि व्याघातः करणीयः।

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः।

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ ८ ॥

सद्योदानं निरायासं सायासं दीर्घपालनम्।

अत एवर्षयः प्राहुर्दानाच्छ्रेयोनुपालनम् ॥ ९ ॥

इति कमलदलाम्बुबिंदुलोलाम्।

श्रियमनुचिन्त्य मनुष्यजीवितं च ॥ १० ॥

दत्त्वा भूमिं भाविनः पार्थिवेन्द्रान् भूयो भूयो याचते रामभद्रः।

सामान्योयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ॥ ११ ॥

समस्तागामिकनृपतिभिरपिपालनधर्म्मफललोभ एव करणीयः न पुनस्तल्लोपनपापकलंकाग्रेसरेण केनापि भवितव्यं यस्त्वेवमभ्यर्त्थितोपि लोभादज्ञानतिमिरपटलावृतमतिराच्छिन्द्यादाच्छिद्यमानमनुमोदेत वा

स पंचभिर्महापातकैरुपपातकैः संलिप्तो

रौरवान्धतामिस्रादिनरकांश्चिरमनुभविष्यति ।

स्वदत्तां परदत्तां वा यो हरेद्भोजननीविकाम् ।

स विष्ठायां कृमिर्भूत्वा कृमिभिः सह पच्यते ॥ १२ ॥

विंध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।

महाहयो हि जायन्ते भोजनाक्षयनीवी हरंति ये ॥ १३ ॥

गामेकां स्वर्णमेकं वा भूमेरप्येकमंगुलम् ।

हरन्नरकमाप्नोति यावदाहूत संप्लवम् ॥ १४ ॥

आरामाणां सहस्रेण तडागानां शतेन च ।

गवां कोटिप्रदानेन ग्रासहर्त्ता न शुद्ध्यति ॥ १५ ॥

षष्टिर्वर्षसहस्राणि स्वर्ग्गे तिष्ठति भूमिदः ।

आच्छेत्ता चानुमन्ता च तान्येव नरकं व्रजेत् ॥ १६ ॥

यथा चैतदेवं तथा ध्रुवाक्षरेण स्वमतमारोपयति। मतं मम मण्डलेश्वरश्रीविज्जराणकस्य। लिखितमिदमुभयाभ्यर्थितेन मण्डलेश्वर-श्रीविजराणकादेशात् ध्रुवमम्बालैयेन। लिखितशासनं तत्प्रमाणमिति। मङ्गलं महा श्रीः ॥

Summary

This inscription, engraved on a set of two copper-plates, consists 50 lines of boldly executed and well-preserved writing. A ring bearing the seal of the issuer of the charter passes through a hole made in the side of the plates. The ends of this ring are soldered beneath the seal. The figure on the seal is similar to that found on the seal

attached to the Grant of Vijjala, dated Śaka 969 (above No.17). The draft of the document and its engraving exhibit considerable carelessness on the part of the scribe and the engraver. The inscription is composed in verse and prose, and it records the creation of a permanent endowment for the purpose of feeding 25 Brāhmaṇas.

The date of the charter is the expired Śaka year 975, Vijaya, Kārttika-badi 15 the occasion of the grant being a solar eclipse. This date corresponds to the 13th November 1053 A.D.

The inscription begins with the symbol for *Siddham* followed by the *Praṇava.* Next follow the passages: 'Salutation to Vināyaka,' and 'May there be victory and prosperity'. Then follows the stanza in adoration of Gaṇēśa, which is also found in the Chinchaṇī plate of Chāmuṇḍa (No.16 above) and several Śilāhāra grants. Lines 3-4 introduce the chief Vija-rāṇaka who is described as born in the Mōḍha family and as having obtained the grace of the goddess Khadirāvatī, apparently the family deity of the Mōḍhas of Saṁyāna. The name of the ruler also occurs elsewhere in the inscription in various forms, *viz.,* Vijja, Vījala and Vīja. In his introduction Vija-rāṇaka is stated to have been *śrī-Dīmarāka-śrī-Aigala-suta.* It has been rightly suggested that a word like *pautra* has been omitted through oversight after the mention of Dīmarāka, so that the passgae was really intended to indicate that Vīja-rāṇaka was the son of Aigala and grandson of Dīmarāka. In the description of this ruler it has been stated that he was responsible for the prosperity of the Mōḍha family even when he was a child. This sentence is a modification of a stanza in the

description of the Śilāhāra ruler Chhittarāja as found in the records of the Śilāhāra dynasty. Then this Vijaladēva of the Mōḍha family is described as *Mahāmaṇḍalēśvara, Samadhigatāśeshapañchamahāśabda, Mahāsāmantādhipati* and *Tagarapuraparamēśvara.* All these titles applicable to the Śilāhāra ruler to whom the forefathers of the issuer of the present grant owed allegiance have been unnecessarily brought in here. This view is supported by the fact that the typical Śilāhāra title 'supreme lord of Tagarapura' has been applied here to Mōḍha Vijala apparently through oversight. The issuer of the present grant, *viz.,* Vijala is apparently identical with the Mōḍha chief Vijjala of the Chinchaṇī plates of Śaka 969 (1048 A.D.) (No.17 above).

Lines 8-12 of the inscription state that, when Vijja-rāṇaka was ruling over the Saṁyāna-pattana 700[1] which was a *Maṇḍala* or district consisting of 4000 *draṅgas*[2] and extending as far as Ākāśikā, *Varishṭhaka* Mummuraka administered the kingdom and *Mahāṭhakkura* Ḍōmbalaiya administered Saṁyāna (apparently meaning the town which was headquarters of the Mōḍha territory), while there were other Chief officers such as *Mahāpradhāna* Buddhappaiya. Of these, the first two administrators are also mentioned in the Mōḍha chief 's earlier record issued in Śaka 969 (1048 A.D.).

The chief 's order regarding the grant to be made was addressed to the future princes (*Rājaputra*), ministers (*Maṁtri*), priests (*Purōhita*), adminstrative officers (*Amātya*) and chief officials (*pradhāna-niyōgika*) as well as the officers in charge of the *rāshṭras* (*Rāshṭrapati*), the cities and the *Dhruvas* (*Nagarapati* and *Dhruvapati*) as also the people of the countryside (*Janapada*). It was also

addressed with due respect to the *haṁyamana* (artisans), the citizens (*paura*) and the Mōḍha Brāhmaṇas of Śristhāna (*i.e.* modern Ṭhāṇā). The Mōḍha Brāhmaṇas mentioned here probably hailed from Śrīsthāna and were settled at Saṁyāna. Then follows a long section in prose and verse dealing with the transitoriness of life and wealth, the propriety of giving grants, *etc.* It also contains some of the usual imprecatory and benedictory stanzas.

Lines 26ff. of the inscription state, how, on the date and occasion indicated above, the Mōḍha chief made a grant after having worshipped Trailōkyachakshu (*i.e.* the Sun-god) and Trailōkyasvāmin (either Śiva or Vishṇu). The defective passage following in liens 30ff. apparently means to say that the amount of three *drammas* received by the government as *śiriḍikā* (the same as *siriḍirkā* of the previous record, meaning a sort of tax or cess) on account of the village of Kēṇasā-grāma in the possession of the Kutuka-maṭhikā was granted in favour of the householders and scholars attached to the *maṭhikā* in the form of a permanent endowment for the purpsoe of feeding 25 Brāhmaṇas probably per day. This *maṭhikā* is the same as the one figuring in the other two inscriptions from Chinchaṇī (Nos.16 and 17 above) included in the present volume. The endowment has been called a *bhōjan-ākshayaṇī* or *bhōjan-ākshyanī*, the word *akshayaṇī* or *akshayanī* being a corruption of Sanskrit *akshaya-nīvī* meaning 'a permanent endowment.' The expression thus means a permanent endowment created for the purpose of providing food free of cost. This endowment is referred to as *bhōjana* and *grāsa* at two different places in the inscription.

Then follow some more of the benedictory and imprecatory stanzas and the statement that the donor's decree was contained in the text of the document as written by one of his officers styled *Dhruva* (*i.e.* the collector of the royal share of the produce from the farmers).

This is followed by the confirmation of the grant by the donor, *Maṇḍalēśvara* Vijja-rāṇaka. The next sentence says that *Dhruva* Mambālaiya wrote the document at the request of both the parties (*i.e.* the donor and the donees) under orders of *Maṇḍalēśvara* Vījja-rāṇaka. The record concludes with a *maṅgala* of the usual type.

Notes

1. Saṁyāna-pattana 700 forming a *maṇḍala* was apparently the district round the town of Saṁyāna (Sanjan) (*EI.*, XXXII, p.73).

2. *Draṅga* generally means 'a town' and it is impossible to belive that a territorial division consisting only of 700 villages or hamlets contained as many as 4000 towns. It therefore seems that *draṅga* in the inscription in a mistake for *dramma*. The intended meaning of the passage in question may therefore be that the annual revenue income of the territory under the rule of the Mōḍha chief of Saṁyāna district consisting of 700 villages or hamlets was 4000 *drammas* possibly meaning coins of silver (*ibid.*).

****

No.19

THANA PLATES OF NAGARJUNA: SAKA YEAR 961

Location : Ṭhāṇā, Thana District, Maharashtra

Date : Śaka year 961=1039 A.D.

Script : Nāgarī

Language : Sanskrit

King : Nāgārjuna

Dynasty : Śilāhāras of North Kōṅkaṇ

Reference : Mirashi, V.V., *CII,* VI, pp.75-82, No.13; Dikshit, M.G., *EI.,* XXXVII, pp.247ff.

Text

Metre: Vv. 1, 2, 11, 12, 18, 22, 24-28, 30-33 *Anushṭubh;* 3-5, 15 *Vasantatilakā;* 6 *Pṛithvī;* 7, 9, 10, 14, 16, 19 *Śārdūlavikrīḍita;* 8 *Sragdharā;* 13 *Āryā;* 17, 23 *Indravajrā;* 20 *Mālinī;* 21 *Vaṁśastha;* 29 *Śālinī*

सिद्धम् जयश्चाऽभ्युदयश्च ॥

लभते सर्व्वकार्येषु पूजया गणना यकः ।

विघ्नं निघ्नन्स वः पायादपायाद्गणनायकः ॥ १ ॥

स वः पातु शिवो नित्यं यन्मौलौ भाति जाह्नवी ।

सुमेरुशिखरोद्गच्छदच्छचन्द्रकलोपमा ॥ २ ॥

जीमूतकेतुतनयो नियतं दयालु

र्ज्जीमूतवाहन इति त्रिजगत्प्रसिद्धः ।

देहं निजं तृणमिवाकलयन्परार्थे

यो रक्षते स्म गरुडात्खलु शंखचूडम् ॥ ३ ॥

तस्यान्वये निखिलभूपतिमौलिनूल

रत्नद्युतिच्छुरितनिर्म्मलपादपीठः।

श्रीसाहसाङ्क इव साहसिकः कपर्द्दी

सीलारवंशतिलको नृपतिर्ब्बभूव ॥ ४ ॥

तस्मादभूच्च तनयः पुलशक्तिनामा

सीमासमः सुरगुरूदितराजनीतेः।

निर्ज्जित्य संगरमुखेखिलवैरिवर्ग्गं

निष्कण्टकं जगति राज्यमकारि येन ॥ ५ ॥

ततोपि समभूत्सुतो नृपशिरोविभूषामणिः

शितः सृणिरिवापरोरिकरिणां कपर्द्दी लघुः।

यदीययशसा जगत्यतिशयेन शुक्लीकृते

न भाति सुरवारणो न च शशी न दुग्धाम्बुधिः ॥ ६ ॥

तस्मादप्यभवद्विभूतिपदवीपात्रं पवित्रीकृता

शेषक्ष्मावलयो महीपतिलकः श्रीवप्पुवन्नः सुतः।

संग्रामांगणरंगिणासिलतया लूनैकदन्ता हठा

त्सर्व्वे येन विनायका विरचिता विद्वेषिणां दन्तिनः ॥ ७ ॥

तस्माज्जातस्तनूजो रजनिकर इवानंदिताशेषलोकः

श्लाघ्यः श्रीझंझराजो दिवसकर इव ध्वस्तनिःशेषदोषः।

शंभोर्यो द्वादशापि व्यरचयदचिरात्कीर्त्तनानि स्वनाम्ना

सोपानानीव मन्ये प्रणततनुभृतां स्वर्ग्गमार्गोद्यतानाम् ॥ ८ ॥

भ्राता तत्र ततस्ततोज्वलयशोराशीप्रकाशीकृता

शेषक्ष्मावलयो बली बलवतां श्रीगोग्गिराजोभवत्।

चापाकर्षणकर्म्मणि प्रवणतां यस्मिन्गते भूपतौ

भीष्मद्रोणपृथासुतप्रभृतयश्चित्ते चमत्कारिताः ॥ ९ ॥

तस्माद्विस्मयकारिहारिचरितप्रख्यातकीर्त्तिः सुतः

श्रीमान्वज्जडदेवभूपतिरभूद्भूचक्रचूडामणिः।

दोर्द्दण्डैकबलस्य यस्य सहसा संग्रामरंगांगणे

राज्यश्रीः स्वयमेव वक्षसि रतिं चक्रे मुरारेरिव ॥ १० ॥

जयन्त इव वृत्रारेः पुरारेरिव षण्मुखः।

ततः श्रीमानभूत्पुत्रः सच्चारित्रोपराजितः। ११ ॥

कर्ण्णस्त्यागेन यः साक्षात्सत्येन च युधिष्ठिरः।

प्रतापाद्दीप्तिमार्त्तण्डः कालदण्डश्च यो द्विषाम्॥ १२ ॥

शरणागतसामन्ता अपरेपि च जगति रक्षिता येन।

स जयति यथार्त्थनामा शरणागतवज्रपंजरो देवः ॥ १३ ॥

येन स्वागतमागताय विहितं गोम्माय नानाविधं

येनैवैयपदेवनाम्नि चलितं राज्यं स्थिरं कारितम्।

भिल्लम्माम्मणमम्बुवक्षितिभुजां दत्तं च येनाभयं

तस्य श्रीबिरुदंकरामनृपतेरन्यत्किमावर्ण्यते ॥ १४ ॥

तस्माद्बभूव भुवि वज्जडदेव नामा

भूपालमस्तकमणिस्तनयो नयज्ञः।

अद्यापि यस्य चरितानि जनाः समस्ता

रोमांचकंचुकितगात्रलता स्तुवन्ति ॥ १५ ॥

तद्भ्राताथ ततोरिकेसरिनृपो जातः सतां सम्मतो

दृप्तारातिकुलाचलैकदलने दंभोलिलीलां दधत् ।

गत्वा शैशव एव सैन्यसहितो दृष्ट्वा च सोमेश्वरं

तस्याग्रे पितुराज्ञया जगदलं यः कीलयित्वागतः ॥ १६ ॥

तद्भ्रातृजो वज्जडदेवसूनुः

श्रीच्छित्तराजो नृपतिर्ब्बभूव ।

सीलारवंशः शिशुनापि येन

नीतः परामुन्नतिमुन्नतेन ॥ १७ ॥

हतारिनारीनेत्रांभस्सेकसंवर्द्धनादिव ।

ब्रह्माण्डमण्डपं यस्य कीर्त्तिवल्ल्यतिरोहति ॥ १८ ॥

दृप्तारातिषु कोपकालदहनः सौभाग्यनारायणो

वारस्त्रीषु ततोनुजः समभवन्नागार्जुनः क्ष्मापतिः ।

यस्यामानुषमूर्ज्जितं भुजबलं दूरान्निशम्य द्विषां

निद्रातीव रणांगणव्यसनिनीदोर्द्दण्डकण्डूलता ॥ १९ ॥

यदसमशिबिरान्तर्म्मत्तगन्धेभदान

प्रसरदनिलशुष्यत्स्रोतसोदिग्गजेन्द्राः ।

अरिनगरविदाहोद्दामदिग्व्यापिधूम

प्रसरभयनिमीलल्लोचनान्युन्मिषन्ति ॥ २० ॥

अथ स्वकीयपुण्योदयात्समधिगतपंचमहाशब्दमहासामन्ताधिपतितगर-
पुरपरमेश्वरश्रीसीलारनरेन्द्रजीमूतवाहनान्वयप्रसूतसुवर्ण्णगरुडध्वजसहज

विद्याधरकोदण्डसहस्रार्जुननरेन्द्रनागार्जुनत्यागजगज्झम्पशरणगागतवज्र पंजरप्रभृतिसमस्तराजावलीविराजितमहामण्डलेश्वरश्रीमन्नागार्जुनराजदेवे निजभुजोपार्ज्जितानेकमण्डलसमेतां पुरीप्रमुखचतुर्दशग्रामशतीसमन्वि-तसमस्तकोंकणभुवं समनुशासति तथैतद्राज्यचिन्ताभारमुद्वहति महामा-त्यश्रीदद्धपैये तथा महासान्धिविग्रहिकश्रीसोढलैये सत्येतस्मिन्काले प्रवर्त्तमाने स च महामण्डलेश्वरश्रीमन्नागार्जुनदेवः सर्व्वानिव स्वसम्बध्यमानकानन्यानपि समागामिराजपुत्रमंत्रिपुरोहितामात्यप्रधाना-प्रधानानि नैयोगिकांस्तथा राष्ट्रपतिविषयपतिनगरपतिग्रामपतिनियुक्ता-नियुक्तराजपुरुषजनपदांस्तथा हंयमननगरपौरत्रिवर्ग्गप्रभृतींश्च प्रणति-पूजासत्कारसमादेशैः संदिशत्यस्तु वः संविदितं यथा ॥

चला विभूतिः क्षणभंगि यौवनं कृतान्तदन्तान्तरवर्ति जीवितम्।
तथाप्यवज्ञा परलोकसाधने नृणमहो विस्मयकारि चेष्टितम्॥ २१ ॥

तथा चान्तर्लीनजराराक्षसीप्रारब्धग्रासं यौवनं स्वर्ग्गवासान्नरकपात-सममिष्टसमागमवियोगदुःखं कदलीगर्ब्भवदसारः संसारः। सहजजरा-मरणसाधारणकं शरीरं पवनचलितकमलिनीदलगतजललवतरलतरे धनायुषी इति मत्वा दृढतरविरक्तिबुध्या संगृह्णीयात् दानफलम्॥

कृतत्रेताद्वापरेषु तपोत्यर्त्थं प्रशस्यते।
मुनयोत्र तु शंसन्ति दानमेकं कलौ युगे॥ २२॥

तथा चोक्तं भगवता व्यासेन।

अग्नेरपत्यं प्रथमं सुवर्णं भूर्व्वैष्णवी सूर्यसुताश्च गावः।
लोकत्रयन्तेन भवेद्धि दत्तं यः कांचनं गां च महीञ्च दद्यात्॥ २३॥

आस्फोटयन्ति पितरः प्रवल्गन्ति पितामहाः ।

भूमिदोस्मत्कुले जातः स नः सन्तारयिष्यति ॥ २४ ॥

भूमिदानं सुपात्रेषु सुतीर्थेषु सुपर्व्वसु ।

अगाधापारसंसारसागरोत्तारणं भवेत् ॥ २५ ॥

धवलान्यातपत्राणि दन्तिनश्च मदोद्धताः ।

भूमिदानस्य पुष्पाणि फलं स्वर्ग्गः पुरन्दरः ॥ २६ ॥

इति धर्म्माधर्म्मविचारचतुरचिरन्तनमुनिवचनान्यवधार्य मातापित्रोरात्मनश्च श्रेयोर्त्थिना मया शकनृपकालातीतसंवत्सरशतेषु नवसु एकषष्ट्यधिकेषु प्रमाथिनामसंवत्सरान्तर्ग्गतश्रावणवदिपंचदश्यां यत्रांकतोपि संवत् ९६१ श्रावण वदि १५ बुधे संजातसूर्यग्रहणपर्वणि सुतीर्थे स्नात्वा गगनैकचक्रचूडामणये कमलिनीकामुकाय भगवते सवित्रे नानाविधकुसुमश्लाघ्यमर्घ्यं दत्त्वा सकलसुरासुरगुरुं त्रैलोक्यस्वामिनं भगवन्तमुमापतिमभ्यर्च्च्य यजनयाजनाध्ययनाध्यापनादिषट्कर्म्मनिरताय क्रतुक्रियाकाण्डशौण्डाय परमब्रह्मणे महाब्राह्मणाय मध्यदेशान्तःपातिहस्तिग्रामविनिर्ग्गताय पाराशरगोत्राय यजुर्व्वेदशाखिने माधवपण्डिताय गोकर्ण्णपण्डितसुताय यजनयाजनाध्ययनाध्यापनादिष्टकर्म्मकरणाय बलिचरुवैश्वदेवाग्निहोत्रक्रतुक्रियाद्युपसर्प्पणार्थं स्वपरिग्रहपोषणार्थं च कोरियलद्वादशकान्तःपाति मंजुवलीग्रामः। यस्य चाघाटनानि पूर्वतः दोणाग्रामसीमासंधौ मधूकवृक्षः तथा राजमार्ग्गः तथा वोडणं तथा उदुम्बरवृक्षः तथा झोतिश्च ॥ दक्षिणतः वाइंगणीग्रामसीमासंधौ वंवे पिप्परी तथा बदरी वरली च ॥ पश्चिमतो धवलाग्राम-

सीमासंधौ उदुम्बरवृक्षः तथा मधूकवृक्षश्च ॥ उत्तरतः कुडिसवराग्राम-सीमासंधौ नदी तथा खडकविरइका च ॥ एवं चतुराघाटनोपलक्षितः स्वसीमापर्यन्तः सवृक्षमालाकुलः सतृणकाष्ठोदकोपेतः पर्वतक्षितिसम-कालीनः पूर्व्वदत्तदेवदायब्रह्मदायवर्ज्जं पूर्व्वप्रसिद्ध्या भट्ठौकासादिसहितः अचाटभटप्रवेश्यः अनादेश्यः अनासेध्यः समुत्पद्यमानद्रम्मशत-त्रयसंख्यः उदकातिसर्ग्गेण नमस्यवृत्त्या परमया भक्त्या प्रतिपादितः। तदस्य सान्वयबन्धोरपि भुंजतो भोजयतो वा कृषतः कर्षयतो वा न केनापि परिपंथना करणीया ॥ यत उक्तमेव पुरातनमहामुनिभिः-

बहुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ २७ ॥
सद्योदानं निरायासं सायासं दीर्घपालनम्।
अत एवर्षयः प्राहुर्द्दानाच्छ्रेयोनुपालनम् ॥ २८ ॥
दत्त्वा भूमिं भाविनः पार्त्थिवेन्द्रान्
भूयो भूयो याचते रामभ्द्रः।
सामान्योयं धर्म्मसेतुर्नृणां
काले काले पालनीयो भवद्भिः ॥ २९ ॥

इति मुनिवचनान्यवधार्य समागामिभूपालैरस्मद्वंशजैरन्यैर्व्वा पालन-धर्म्मफललोभ एव करणीयः। न पुनस्तल्लोपनपापकलंकाग्रेसरेण केनापि भवितव्यम्। यस्त्वेवमभ्यर्त्थितोपि लोभादज्ञानतिमिरपटलावृतमतिरा-च्छिंद्यादाच्छिद्यमानमनुमोदेत वा स पंचभिर्म्महापातकैरुपपातकैश्च

लिप्तो रौरवमहारौरवान्धतामिस्रादिनरकांश्चिरमनुभविष्यति ॥ तथा चोक्तं भगवता व्यासेन ॥

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।

स विष्ठायां कृमिर्भूत्वा कृमिभिः सह पच्यते ॥ ३० ॥

विंध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।

महाहयो हि जायन्ते भूमिदायं हरन्ति ये ॥ ३१ ॥

गामेकां स्वर्ण्णमेकं वा भूमेरप्येकमंगुलम् ।

हरन्नरकमाप्नोति यावदाभूतसंप्लवम् ॥ ३२ ॥

षष्टिं वर्षसहस्राणि स्वर्ग्गे तिष्ठति भूमिदः ।

आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥ ३३ ॥

यथा चैतदेवं तथा शासनदाता लेखकहस्तेन स्वमतमारोपयति। यथा मतं मम महामण्डलेश्वरश्रीमन्नागार्जुनराजदेवस्य महामण्डलेश्वरश्रीमद्व-ज्जडदेवराजसूनोर्यदत्र शासने लिखितम्। लिखितं चैतन्मया श्रीमद्राजा-नुज्ञया भाण्डागारसेनश्रीजोगपैयेन भाण्डागारसेनमहाकविश्रीनागलै-यभ्रातृसूनुना। यदत्रोनाक्षरमधिकाक्षरं वा तत्सर्वं प्रमाणमिति॥ मंगलमिति ॥ श्रीः ॥

Summary

This inscription, engraved on a set of 3 copper-plates, consists 88 lines of neatly executed and well-preserved writing. The plates are strung together by means of a ring which carries the usual Garuḍa seal of the Śilāhāras. This charter is composed partly in prose and

partly in verse and records the grant of some land to a Brāhmaṇa.

Verses 1-18 descriptive of the predecessors of the ruling king Nāgārjuna are repeated from the earlier grants of his elder brother Chhittarāja. The next two verses descriptive of Nāgārjuna are new. They are seen repeated in the subsequent grants of his successor Mummuṇirāja.

The inscription itself refers to the reign of the Śilāhāra king Nāgārjuna, the younger brother and successor of Chhittarāja. This is the only known inscription of that king. Before its discovery it was known from the *Udayasundarīkathā* of Sōḍḍhala that he had succeeded Chhittarāja. He is described in the present plates like other Śilāhāra princes who preceded him, but has one more *biruda viz. Kōdaṇḍa-Sahasrārjuna,* not noticed in their case. At the time of the present grant the *Mahāmātya* Daddhapaiya and the *Mahāsāndhivigrahika* Sōḍhalaiya are stated to have borne the burden of his government.

The object of the present plates is to record the grant, by *Mahāmaṇḍalēśvara* Nāgārjuna, of a plot of land in the village Muñjavalī[1] to Mādhava Paṇḍita, son of Gōkarṇa Paṇḍita, of the Pārāśara *gōtra* and Yajurvēda *śākhā.* He had hailed from Hastigrāma in Madhyadēśa (Central India). The donation was made for the performance of religious duties, for the daily sacrifices and for the maintenance of his family as well as for the merit of the king. Most of the donees of the grants of the Śilāhāras were Brāhmaṇas of the Ṛigvēda *śākhā* who had come to Kōṅkaṇ from Karahāṭa, modern Karhāḍ, but the

donee of the present grant is of a different type. He was a Yajurvēdin and hailed from Central India.

The grant is dated in Śaka 961, on the fifteenth *tithi* of the dark fortnight of Śrāvaṇa, Wednesday, the cyclic year being Pramāthin, with a solar eclipse. The date corresponds regularly to the 27th August 1039 A.D.

The donated village Muñjavalī[1] was situated in the Group Kōriyala[2]-12. To its east lay the village Dōṇā,[3] to its south Vāiṅgaṇī[4] village, to its west Dhavalā[5] village, and to its north a river[6] and Kuḍisavarā[7] village. Most of these villages can still be identified. The grant included clusters of trees (*vṛikshamālākula*), grass (*tṛiṇa*), wood (*kāshṭha*) and water (*udaka*) and was to be enjoyed by the donee as long as the mountains and the earth would endure. It also included low and fallow lands in accordance with the previous custom, but excluded gifts previously made to gods and Brāhmaṇas. Further, the grant village was not to be entered by *Chāṭas* and *Bhaṭas*, not to be assigned and not to be attached. The said village carried with it 300 *drammas* being the cost of the crop produced therein (*samutpadyamānadrammaśatatraya-saṁkhyaḥ*).

The list of the officers and others addressed by the donor regarding the proposed grant of land is the same as the one met with in the Berlin Museum plates of Chhittarāja (No.15 above). The present charter was written by the Treasury Officer (*Bhāṇḍāgārasēna*) Jōgapaiya, the nephew of another Treasury Officer, the *Mahākavi* Nāgalaiya. He had written the Thāṇā plates of Arikēsarin and the Bhāṇḍup, Divē Āgar and the Berlin Museum plates of Chhittarāja. He continued to serve

Mummuṇi, the successor of Nāgārjuna, as his Thāṇā plates also were written by him. Thereafter, Nāgalaiya did the work of the scribe.

Notes

1. The donated village Mañjavalī is now a deserted site situated in between the Vāngani railway station and the Vāngani village which lies two miles south of it (*EI.*, XXXVII, p.249).

2. Kōriyala, which was the head-quarters of a group of 12 villages is probably represented by modern Gorela or Goriyali which lies about 2 miles to the west of Vāngani railway station (*ibid.*, p.50).

3. Dōṇā is represented by a village of the same name being about 1.5 miles away from the grant village (*EI.*, XXXVII, p.249).

4. Vāiṁgaṇī is identified with Vāngni, a small railway station on the Bombay-Poona line of the Central Railway (*ibid.*).

5. Dhavalā still retains its old name and lies about 1 mile to the east of the village Muñjavalī (*ibid.*).

6. The river mentioned in the inscription is no other than Ulhāsa though not mentioned by name (*ibid.*).

7. Kuḍisavarā lies about 2 miles north of Muñjavalī (*ibid.*).

******

No.20

THANA PLATES OF MUMMUNIRAJA
SAKA YEAR 970

Location	: Ṭhāṇā, Thana District, Maharashtra
Date	: Śaka Year 970=1049 A.D.
Script	: Nāgarī
Language	: Sanskrit
King	: Mummuṇirāja
Dynasty	: Śilāhāras of North Kōṅkaṇ
Reference	: Mirashi, V.V., *CII,* VI, pp.82-98, No.14

Text

Metre: Vv. 1, 2, 11, 12, 19, 24, 25, 27-30, 32 *Anushṭubh;* 3-5, 15, 18, 33 *Vasantatilakā,* 6 *Pṛithvī;* 7, 9, 10, 14, 16, 20 *Śārdūlavikrīḍita;* 8 *Sragdharā;* 13 *Āryā;* 17, 26 *Indravajrā;* 21, 22 *Mālinī;* 23 *Vaṁśasthā;* 31 *Śālinī*

सिद्धम् ॥ जयश्चाभ्युदयश्च ।

लभते सर्व्वकार्य्येषु पूजया गणना यकः ।

विघ्नं निघ्नन्स वः पायादपायाद् गणनायकः ॥ १ ॥

स वः पातु शिवो नित्यं यन्मौलौ भाति जाह्नवी ।

सुमेरुशिखरोद्गच्छदच्छचन्द्रकलोपमा ॥ २ ॥

जीमूतकेतुतनयो नित्यं दयालु

र्ज्जीमूतवाहन इति त्रिजगत्प्रसिद्धः ।

देहं निजं तृणमिवाकलयन्परार्थे

यो रक्षति स्म गरुडात्खलु शंखचूडम् ॥ ३ ॥

तस्यान्वये निखिलभूपतिमौलिनूल

रत्नद्युतिच्छुरितनिर्म्मलपादपीठः।

श्रीसाहसाङ्क इव साहसिकः कपर्द्दी

सीलारवंशतिलको नृपतिर्ब्बभूव ॥ ४ ॥

तस्मादभूच्च तनयः पुलशक्तिनामा

सीमासमः सुरगुरूदितराजनीतेः।

निर्ज्जित्य संगरमुखेखिलवैरिवर्ग्गं

निष्कण्टकं जगति राज्यमकारि येन ॥ ५ ॥

ततोपि समभूत्सुतो नृपशिरोविभूषामणिः

शितः सृणिरिवापरोरिकरिणां कपर्द्दी लघुः।

यदीययशसा जगत्यतिशयेन शुक्लीकृते

न भाति सुरवारणो न च शशी न दुग्धाम्बुधिः ॥ ६ ॥

तस्मादप्यभवद्विभूतिपदवीपात्रं पवित्रीकृता

शेषक्ष्मावलयो महीपतिलकः श्रीवप्पुवन्नः सुतः।

संग्रामांगणरंगिणासिलतया लूनैकदन्ता हठा

त्सर्व्वे येन विनायका विरचिता विद्वेषिणां दन्तिनः ॥ ७ ॥

तस्माज्जातस्तनूजो रजनिकर इवानंदिताशेषलोकः

श्लाघ्यः श्रीझंझराजो दिवसकर इव ध्वस्तनिःशेषदोषः।

शंभोर्यो द्वादशापि व्यरचयदचिरात्कीर्त्तनानि स्वनाम्ना

सोपानानीव मन्ये प्रणततनुभृतां स्वर्ग्गमार्गोद्यतानाम् ॥ ८ ॥

भ्राता तत्र ततस्ततोज्वलयशोराशीप्रकाशीकृता

शेषक्ष्मावलयो बली बलवतां श्रीगोग्गिराजोभवत् ।

चापाकर्षणकर्म्मणि प्रवणतां यस्मिन्गते भूपतौ

भीष्मद्रोणपृथासुतप्रभृतयश्चित्ते चमत्कारिताः ॥ ९ ॥

तस्माद्विस्मयकारिहारिचरितप्रख्यातकीर्त्तेः सुतः

श्रीमान्वज्जडदेवभूपतिरभूद्भूचक्रचूडामणिः ।

दोर्द्दण्डैकबलस्य यस्य सहसा संग्रामरंगांगणे

राज्यश्रीः स्वयमेव वक्षसि रतिं चक्रे मुरारेरिव ॥ १० ॥

जयन्त इव वृत्रारेः पुरारेरिव षण्मुखः ।

ततः श्रीमानभूत्पुत्रः सच्चारित्रोपराजितः । ११ ॥

कर्ण्णस्त्यागेन यः साक्षात्सत्येन च युधिष्ठिरः ।

प्रतापाद्दीप्तिमार्त्तण्डः कालदण्डश्च यो द्विषाम् ॥ १२ ॥

शरणागतसामन्ता अपरेपि च जगति रक्षिता येन ।

स जयति यथार्त्थनामा शरणागतवज्रपंजरो देवः ॥ १३ ॥

येन स्वागतमागताय विहितं गोम्माय नानाविधं

येनैवैयपदेवनाम्नि चलितं राज्यं स्थिरं कारितम् ।

भिल्लम्माम्मणमम्बुवक्षितिभुजां दत्तं च येनाभयं

तस्य श्रीविरुदंकरामनृपतेरन्यत्किमावर्ण्ण्यते ॥ १४ ॥

श्रीमानभूत्तदनु वज्जडदेव नामा

भूपालमस्तकमणिस्तनयो नयज्ञः ।

अद्यापि यस्य चरितानि जनाः समस्ता

रोमांचकंचुकितगात्रलता स्तुवन्ति ॥ १५ ॥

तद्भ्राताथ ततोरिकेसरिनृपो जातः सतां सम्मतो

दृप्तारातिकुलाचलैकदलने दंभोलिलीलां दधत् ।

गत्वा शैशव एव सैन्यसहितो दृष्ट्वा च सोमेश्वरं

तस्याग्रे पितुराज्ञया जगदलं यः कीलयित्वागतः ॥ १६ ॥

तद्भ्रातृजो वज्जडदेवसूनुः

श्रीच्छित्तराजो नृपतिर्ब्बभूव ।

सीलारवंशः शिशुनापि येन

नीतः परामुन्नतिमुन्नतेन ॥ १७ ॥

लम्बालकानि कुचकुम्भतटोपकण्ठ

प्रभ्रष्टहारलतिकानि निरंजनानि ।

उत्खाततीक्ष्णकरवालविदारितस्य

योन्तःपुराणि परिपंथिजनस्य चक्रे ॥ १८ ॥

हतारिनारीनेत्रांभस्सेकसंवर्द्धनादिव ।

ब्रह्माण्डमण्डपं यस्य कीर्त्तिवल्ल्यतिरोहति ॥ १९ ॥

दृप्तारातिषु कोपकालदहनः सौभाग्यनारायणो

वारस्त्रीषु ततोनुजः समभवन्नागार्जुनः क्ष्मापतिः ।

यस्यामानुषमूर्ज्जितं भुजबलं दूरान्निशम्य द्विषां

निद्रातीव रणांगणव्यसनिनीदोर्द्दण्डकण्डूलता ॥ २० ॥

यदसमशिबिरान्तर्म्मत्तगन्धेभदान

प्रसरदनिलशुष्यत्स्रोतसोदिग्गजेन्द्राः ।

अरिनगरविदाहोद्दामदिग्व्यापिधूम

प्रसरभयनिमीलल्लोचनान्युन्मिषन्ति ॥ २१ ॥

तदनु तदनुजन्मा मूर्त्तिमान्मीनकेतुः

क्षतरिपुविभवोभून्मुम्मुणिः क्षोणिपालः ।

विधृतधनुषि यस्मिन्वाजिनीराजनान्ते

बलभिदपि बलीयान्वार्षिकं चापमौज्झत् ॥ २२ ॥

अथ स्वकीयपुण्योदयात्समधिगतपञ्चमहाशब्दमहासामन्ताधिपतितगर-पुरपरमेश्वरशिलाहारनरेन्द्रजीमूतवाहनान्वयप्रसूतसुवर्ण्णगरुडध्वजपश्चि-मससुद्राधिपतित्यागजगज्झम्पिसीलारमार्त्तण्डराजमार्त्तण्डडमरमेघडम्ब-रमुण्डमालालंकृतवसुमतीस्वयंवरशरणागतवज्रपंजरप्रभृतिसमस्तराजा-वलीविराजितमहामण्डलेश्वरश्रीमन्मुम्मुणिदेवराजो निजभुजोपार्ज्जितानेकमण्डलसमेतां पुरीप्रमुखचतुर्दशग्रामशतीसमन्वितसमस्तकोंकणभुवं समनुशासति तथैतद्राज्यचिन्ताभारमुद्वहति महामात्यश्रीजोउपैये तथा महासान्धिविग्रहिकश्रीविठपैये सत्येतस्मिन्काले प्रवर्त्तमाने स च महामण्डलेश्वरश्रीमन्मुम्मुणिदेवराजः सर्वानेव स्वसंबध्यमानकानन्या-नपि समागामिराजपुत्रमन्त्रिपुरोहितामात्यप्रधानाप्रधाननैयोगिकांस्तथा राष्ट्रपतिनगरपतिविषयपतिग्रामपतिनियुक्तानियुक्तराजपुरुषजनपदांस्तथा हंयमननगरपौरत्रिवर्ग्गप्रभृतींश्च प्रणतिपूजासत्कारसमादेशैः संदिशत्यस्तु वः संविदितं यथा ॥

चला विभूतिः क्षणभंगि यौवनं

कृतान्तदन्तान्तरवर्ति जीवितम् ।

तथाप्यवज्ञा परलोकसाधने

नृणमहो विस्मयकारि चेष्टितम् ॥ २३ ॥

तथा चान्तर्लीनजराराक्षसीप्रारब्धग्रासं यौवनं स्वर्ग्गवासान्नरकपातसम-मिष्टसमागमवियोगदुःखं कदलीगर्भवदसारः संसारः। सहजजरा-मरणसाधारणकं शरीरं पवनचलितकमलिनीदलगतजललवतरलतरे धनायुषी इति मत्वा दृढतरविरक्तिबुध्या संगृह्णीयात् स्वदानफलम् ॥

कृतत्रेताद्वापरेषु तपोत्यर्त्थं प्रशस्यते।

मुनयोत्र तु शंसन्ति दानमेकं कलौ युगे ॥ २४ ॥

न तथा सफला विद्या न तथा सफलं तपः।

यथात्र मुनयः प्राहुर्द्दानमेकं कलौ युगे ॥ २५ ॥

तथा चोक्तं भगवता व्यासेन।

अग्नेरपत्यं प्रथमं सुवर्णं भूर्व्वैष्णवी सूर्यसुताश्च गावः।

लोकत्रयन्तेन भवेत्प्रदत्तं यः कांचनं गां च महीञ्च दद्यात् ॥ २६ ॥

आस्फोटयन्ति पितरः प्रवल्गन्ति पितामहाः।

भूमिदोस्मत्कुले जातः स नः संतारयिष्यति ॥ २७ ॥

धवलान्यातपत्राणि दन्तिनश्च मदोद्धताः।

भूमिदानस्य पुष्पाणि फलं स्वर्ग्गः पुरन्दर ॥ २८ ॥

इति धर्म्माधर्म्मविचारचतुरचिरन्तनमुनिवचनान्यवधार्य स्वकीय-पट्टमहाराज्ञीश्रीपद्मैराज्ञयाः श्रेयोत्थं मया शकनृपकालातीतसंवत्सरशतेषु नवसु सप्तत्यधिकेषु सर्व्वधारिसंवत्सरान्तर्ग्गतफाल्गुनशुद्धपंचदश्यां यत्राङ्कतोपि संवत् ९७० फाल्गुन शुद्ध १५ संजातसोमग्रहणपर्वणि सुतीर्त्थे स्नात्वा गगनैकचूडामणये कमलिनीकामुकाय भगवते सवित्रे

नानाविधकुसुमश्लाघ्यमर्घ्यं दत्त्वा सकलसुरासुरगुरुत्रैलोक्यस्वामिनं भगवन्तमुमापतिमभ्यर्च्य यजनयाजनाध्ययनाध्यापनादिषट्कर्म्म-निरतेभ्यः क्रतुक्रियाकाण्डशौण्डेभ्यः परमब्रह्मभ्यो महाब्राह्मणेभ्यो यत्रादौ करहाटविनिर्ग्गतजामदग्न्यवत्सगोत्रजं बह्वृचशाखिमहाब्राह्मण-श्रीनारायणपण्डितं महाब्राह्मणश्रीतिक्कपैयोपाध्यायसुतं तथैचैतद्भ्रातृ-राम्बपण्डितं तथैतद्भ्रातृलक्ष्मीधरपण्डितं करहाटविनिर्ग्गत . . . . गोत्रजं बह्वृचशाखिकर्ण्णाटकेशवभट्टोपाध्ययं . . . . . . सुतं करहाटविनि-र्ग्गतजामदग्न्यवत्सगोत्रजं बह्वृचशाखिगोपतिपण्डितं श्रीराम्बपण्डितसुतं करहाटविनिर्ग्गतजामदग्न्यवत्सगोत्रजं बह्वृचशाखिधारेश्वरभट्टं माधव-भट्टसुतं करहाटविनिर्ग्गतगार्ग्यगोत्रजं बह्वृचशाखिगोवर्द्धनभट्टसुतं नारायणभट्टं करहाटविनिर्ग्गतं कपिगोत्रजं बह्वृचशाखिचक्रपाणिभट्टं द्रोणभट्टसुतं करहाटविनिर्ग्गतं आत्रेयगोत्रजं बह्वृचशाखिदांडपैयसुतं माधवज्योतिर्विदं करहाटविनिर्ग्गतं आत्रेयगोत्रजं बह्वृचशाखि वाम्बदेवभट्टं रिसियपभट्टसुतं करहाटविनिर्ग्गतं काश्यपगोत्रजं बह्वृचशाखिवावलैयं दांडपैयसुतं करहाटविनिर्ग्गतभारद्वाजगोत्रजं बह्वृचशाखि दिवाकरैयं सिद्धपैयसुतं करहाटविनिर्ग्गतं काश्यपगोत्रजं बह्वृचशाखिजनार्द्दनभट्टं वेव्वलषडंगवित्सुतं ॥ करहाटविनिर्ग्गतमात्रेय-गोत्रजं बह्वृचशाखिवाम्बणं तीकपैयसुतं प्रभृति चतुर्दश ॥ भ्यो यजनयाजनाध्ययनाध्यापनादिषट्कर्म्मकरणाय बलिचरुवैश्वदेवाग्नि-होत्रक्रतुक्रियाद्युपसर्प्पणार्थं स्वपरिग्रहपोषणार्थं च प्राग्लिखित-श्रीनारायणपण्डित तथा दिवाकरैयाभ्यां वंटकद्वयं द्वयमितरेभ्यो वंटकैकं

विधाय वरेटिकाविषयान्तःपाति एकसालग्रामो यत्र सिद्धायात्पलाण्डसमं पंचचत्वारिंशद्रम्माधिकानि द्रम्माणां चत्वारिशतान्यंकतोपि द्र ४४५ यस्य चाघाटनानि। पूर्व्वत ऊलसनदी सीमा। दक्षिणतः पवहानदी। पश्चिमतः सियलिपार्श्वे गोमार्ग्गः। उत्तरतोश्वत्थवृक्षस्तथा गोमार्ग्गश्च ॥ तथैतद्ग्रामीयगृहद्रम्मास्तथा कुमारगदियाणकश्च ॥ तथैतद्विषयान्तः-पातिभूतबलिग्रामो यत्र सिद्धायात्पलाण्डसमं त्रयोविंशदधिकं द्रम्मशतद्वयमंकतोपि द्र २२३ यस्य चाघाटनानि। पूर्व्वतो विरकः। दक्षिणतः पर्व्वतः। पश्चिमतः पर्व्वतः एव। उत्तरतो विरक एव। तथैत-द्ग्रामीयगृहद्रम्मास्तथा कुमारगदियाणकश्च ॥ छ ॥ तथैतद्विषयान्तः-पातिवडवलीग्रामो यत्र सिद्धायात्पलाण्डसमं एकोनसप्तत्यधिकं द्रम्मशतद्वयमंकतोपि द्र २६९ यस्य चाघाटनानि। पूर्व्वतोश्वत्थवृक्षस्तथा पिंपरिवृक्षश्च। दक्षिणतः उच्चादेवीसत्कडोंगरिका। पश्चिमतो विरकः। उत्तरतः पवहानदी। तथैतद्ग्रामीयगृहद्रम्मास्तथा कुमारगद्दियाणकश्च ॥ छ ॥ तथैतद्विषयान्तःपाति आसलग्रामो यत्र सिद्धायात्पलाण्ड-सममष्टचत्वारिंशदधिकानि द्रम्माणां पंचशतान्यंकतोपि द्र ५४८ यस्य चाघाटनानि। पूर्व्वतो वडवलीग्राममध्ये विरकः ॥ दक्षिणतो विरक एव। पश्चिमतो बृहत्पर्व्वतः उत्तरतो विकराग्रामसीमायां विरकः ॥ तथैतद्ग्रामीयगृहद्रम्मास्तथा कुमारगद्दियाणकश्च ॥ छ ॥ तथैतद्विषयान्तः-पाति . . . . . ग्रामान्तर्व्वर्त्ति घंटेश्वरक्षेत्रं यत्र सिद्धायात्पलाण्डात्समुत्प-द्यमानअष्टचत्वारिंशद्रम्मायत्रांकतोपि द्र ४८ यस्य चाघाटनानि। पूर्व्वत एकसालग्राममध्ये गोमार्ग्गः। दक्षिणतः पवहा नदी। पश्चिमतः

श्रीनागेश्वरदेवसत्कपिंपरिकाक्षेत्रं तथा राजमार्ग्गश्च उत्तरतो गोमार्ग्गः ॥ तथैतत्क्षेत्रीयगृहद्रम्मास्तथा कुमारगद्दियाणकश्च ॥ छ ॥ तथैतद्विषयान्तःपाति ब्राह्मणमधुपण्डितभुज्यमानउम्बरवल्लीग्रामीयारुहणात्पंचाशद्द्रम्मा यत्रांकतोपि हस्तद्रम्म द्र ५० ॥ छ ॥ छ ॥ तथा वरेटिकाविषयबाह्यं वावैलकब्राह्मणेभ्यो यत्रादौ। मध्यदेशविनिर्ग्गताय गार्ग्यगोत्राय बह्वृचशाखिने महाब्राह्मणदद्दपैयाय महाब्राह्मणब्रह्मनायकसुताय अभ्यन्तरषट्षष्टिविषयान्तःपातिमूलंदग्रामान्तर्व्वर्त्तिकोट्ठारवेढीक्षेत्रं यत्र सिद्धायाद्विंशतिद्रम्मास्तथैतद्ग्राममानेन पलाण्डाद्व्रीहीणां सार्द्धमूटकैकश्च। यत्रांकतोपि समुत्पद्यमान द्र २० व्रीहिमूडा १॥ यस्य चाघाटनानि॥ पूर्व्वतः खैरोण्ढाक्षेत्रं। दक्षिणतो वटुकेशवसत्कवावकः। पश्चिमतो वौलथैभट्टारिकासत्ककुसुम्बीक्षेत्रं॥ उत्तरतो विप्रतिक्कम्बैयसत्कक्षेत्रं॥ तथैतत्क्षेत्रप्रतिबद्धगृहद्रम्माश्चैतस्मा एव ॥ छ ॥ तथा करहाटविनिर्ग्गताय वासिष्ठगोत्राय बह्वृचशाखिने ब्राह्मणवाप्पैयाय ब्राहमणधालनषडंगवित्सुताय अभ्यन्तरषट्षष्टिविषयान्तःपातिवोरियलाग्रामान्तर्व्वर्त्तिवाडक्षेत्रं यत्र सिद्धायात् षट्त्रिंशद्द्रम्मास्तथैतद्ग्राममानेन पलाण्डाद्व्रीहीणां पादोनचत्वारोमूटकाश्च। यत्रांकतोपि द्र ३६ व्रीहिमूडा ३।।। यस्य चाघाटनानि पूर्व्वतः खानुवडाक्षेत्रसत्कऊकासस्तथा आभिट्ठावृक्षश्च। दक्षिणतो विरइका। पश्चिमतः . . . . . . ग्रामप्रतिबद्धकाढेवलीपल्लिका। उत्तरतः विप्रदाउपैयसत्कवावकः॥ तथात्रत्यीयनिहुरक्षेत्रं यत्र सिद्धायादष्टादशद्रम्मास्तथैतद्ग्राममानेन पलाण्डाद्व्रीहीणां दशकुटपाधिकः सार्धमूटकैकश्च। यत्रांकतोपि द्र १८ व्रीहि मूडा १॥ कु १०। यस्य

चाघाटनानि। पूर्व्वतो गोमार्ग्गः पश्चिमतो गोप्रचारः। उत्तरतश्चिंचावृक्षः॥ तथाऽत्रत्यीयवौलपोण्ढाक्षेत्रं। यत्र सिद्धायान्नव द्रम्मास्तथा ग्राममानेन पलाण्डाद्व्रीहीणां पञ्चकुटपोनः मूटकैकश्च। यत्रांकतोपि द्र ९ व्रीहिखण्डिका ३ कुडव १५। यस्य चाघाटनानि पूर्व्वतो विष्णुनारायणदेवसत्कवावकः। दक्षिणतो निहुरक्षेत्रं। पश्चिमतः कुटुम्बिकपांबुवसत्कारामकः। उत्तरतः खानूवलक्षेत्र॥ तथैतत्क्षेत्रत्रयप्रतिबद्धगृहद्रम्माश्चैतस्मा एव॥छ॥ तथा करहाटविनिर्ग्गताय काश्यपगोत्राय बह्वृचशाखिने ब्राह्मणदांउपैयाय ब्राह्मणरिसियपैयसुताय शूर्प्पारकषट्षष्टिविषयान्तःपातिबृहदडणिकग्रामान्तर्व्वर्त्तिपोण्ढाक्षेत्रद्वयम्। यस्य चाघाटनानि। पूर्व्वत ऐशानीं दिशमारभ्याग्नेयीं दिशं यावदश्वत्थवृक्षस्तथा न्यग्रोधवृक्षस्तथा विंचावृक्षसंयुक्तोश्वत्थवृक्षस्तथा खदिरवृक्षस्तथा ऊषरं च। दक्षिणतो वांकडिक्षेत्रं तथा सिंघलद्वीपक्षेत्रं च। पश्चिमतः पाषाणशृंखलिका तथा निखातपाषाणाश्च। उत्तरतो मधुक्षेत्रं॥ तथाऽत्रत्यीयतोरणीक्षेत्रद्वयं। यस्य चाघाटनानि। पूर्व्वतो नाणेवापक्षेत्रं वेडेवापक्षेत्रं च। दक्षिणतो राजमार्ग्गः। पश्चिमतः पूर्व्वभुक्त्या पानीयप्रपातः। उत्तरतो भाभोण्ठाक्षेत्रं। एवं क्षेत्रचतुष्टयसिद्धायाद्द्वाविंशतिद्रम्माधिकं द्रम्मैकशतं तथैतद्ग्राममानेन पलाण्डाद्व्रीहीणां सार्द्धमूटकचतुष्टयं च। यत्रांकतोपि द्र १२२ व्रीहि मूडा ४॥ तथैतद्ग्राममध्ये गृहचतुष्टयं तथैतत्क्षेत्रचतुष्टयप्रतिबद्धगृहद्रम्माश्च॥ तथैतद्विषयान्तःपाति लघुअडणिकान्तर्व्वर्त्तिमानिक्षेत्रम्। यस्य चाघाटनानि॥ पूर्व्वतो वारसौन्दक्षेत्रम्। दक्षिणतो जम्बूवटीक्षेत्रम्। पश्चिमतः

खण्डिवलीग्रामः। उत्तरतः खण्डिवलीग्राम एव तथा पूर्वभुक्तिश्च॥ तथैतत्क्षेत्रप्रतिबद्धमधूकक्षेत्रं। यस्य चाघाटनानि पूर्व्वतः चोलिक्षेत्रं। दक्षिणतो वेन्दरीकच्छः। पश्चिमतो वेन्दरीकच्छ एव। उत्तरतो लघुवाहलिका॥ तथैतद्ग्रामान्तर्व्वर्त्ति उत्तेश्रवाक्षेत्रं। यस्य चाघाटनानि। पूर्व्वतः छेंभं। दक्षिणतो गोमार्ग्गः। पश्चिमतो गोमार्ग्गः। उत्तरतो बन्धः॥ एवं क्षेत्रत्रयसिद्धायात्पंचाशद्द्रम्मा यत्रांकतोपि द्र ५० तथैतद्ग्राममध्ये गृहैकं च॥ तथैतद्विषयान्तःपातिखानुवडाग्रामान्तर्व्वर्त्तिकुसुम्भोलिक्षेत्रं। यस्य चाघाटनानि। पूर्व्वतो मधुवृक्षः। दक्षिणतो राजकीयकुसुम्भोलिक्षेत्रं। पश्चिमतः क्षारनदी खज्जनं। उत्तरतो वटवृक्षस्तथापूर्व्वभुक्तिश्च॥ तथाऽत्रत्यीयपिंपलवापक्षेत्रं। यस्य चाघाटनानि। पूर्व्वतो वटवृक्षः। दक्षिणतः कुसुम्भोलिक्षेत्रम्। पश्चिमतो राजकीयकुसुम्भोलिक्षेत्रं। उत्तरतः पूर्वभुक्तिपानीयप्रपातस्तथा डोंगरिका च॥ तथाऽत्रत्यीयचणेवटीक्षेत्रं। यस्य चाघाटनानि। पूर्व्वतो गोमार्ग्गः दक्षिणतो गोमार्ग्गः एव। पश्चिमतः क्षारनदी खज्जनं उत्तरतः कुसुम्भोलिक्षेत्रम्। तथैतत्क्षेत्रप्रतिबद्धोवकासश्च। यस्य चाघाटनानि। पूर्व्वत आगरवेढीक्षेत्रं। दक्षिणतः अर्द्धपादक्षेत्रं तथा चरिका च। पश्चिमतस्तटाकपाली। उत्तरतस्तलावटीक्षेत्रं॥ एवं क्षेत्रचतुष्टयसिद्धायादशीतिद्रम्मा यत्रांकतोपि द्र ८०। तथैतद्ग्राममध्ये गृहत्रयं च॥ छ॥ छ॥ तथा करहाटविनिर्ग्गताय काश्यपगोत्राय बह्वृचशाखिने ब्राह्मणनागदेवैयाय ब्राह्मणरिसियपैयसुताय शूर्पारकषट्षष्टिविषयान्तःपातिपेढालग्रामान्तर्व्वर्त्तिथापडक्षेत्रद्वयं तथा सालियपक्षेत्रद्वयमुभयं क्षेत्रचतुष्टयम्। यस्य

चाघाटनानि। पूर्व्वतो भम्बनीवाहक्षेत्रं। दक्षिणतस्तृतीयराजकीय-थापडक्षेत्रम्। पश्चिमतस्तडागपाली। उत्तरतो देइयलाक्षेत्रम्। तथैतद्ग्रामान्तर्व्वर्त्तिजलूवोण्ढाक्षेत्रम्। यस्य चाघाटनानि। पूर्व्वतस्तखा-लासत्कवावकः। दक्षिणतस्तडागिका। पश्चिमतः कोञ्चौरोण्ढाक्षेत्रम्। उत्तरतः खातुक्षेत्रम्। एवं क्षेत्रपंचकसिद्धायाद्रम्माणां शतमेकं यत्रांकतोपि द्र १०० । तथैतत्क्षेत्रप्रतिबद्धगृहद्रम्माश्च ॥ छ ॥ तथा करहाटविनिर्ग्गताय जामदग्न्यवत्सगोत्राय बह्वृचशाखिने ब्राह्मणगोविन्दैयाय ब्राह्मणमही-धरैयसुताय शूर्पारकषट्षष्टिविषयान्तःपातिपेढालग्रामान्तर्वर्त्ति देइय-लाक्षेत्रम्। यस्य चाघाटनानि। पूर्व्वतो राजकीयदेइयलाक्षेत्रम्। दक्षिणतः सालियपक्षेत्रं। पश्चिमतो देइयलाक्षेत्रकोकासः॥ उत्तरतः खोज्जवादलक्षेत्रं। तथैतद्ग्रामान्तर्व्वर्त्तिकवडोच्छिक्षेत्रं तथा कणीक्षेत्रं च। ययोश्चाघाटनानि। पूर्व्वतः पर्व्वतिकासत्कदन्तच्छिदः। दक्षिणतो राजमार्ग्गः। पश्चिमतो डोंगरिका। उत्तरतस्तडागिका। एवं क्षेत्रत्रयसि-द्धायाद्रम्माणां शतमेकं। यत्रांकतोपि द्र १०० तथैतत्क्षेत्रत्रयप्रतिबद्ध-गृहद्रम्माश्च॥ छ॥ तथा पुरीविनिर्ग्गताय भारद्वाजगोत्राय गोभिल-शाखिने ब्राह्मणनन्नपैयाय ब्राह्मणमधुवलैयसुताय शूर्प्पारकषट्षष्टि-विषयान्तःपातिपेढालग्रामान्तर्व्वर्तिखानूक्षेत्रद्वयम्। यस्य चाघाटनानि। पूर्व्वतो गोमार्ग्गः। दक्षिणतो जलूवोंढाक्षेत्रं तथा कोंचौरोण्ढाक्षेत्रं च। पश्चिमतः लशाखिने तडागं। उत्तरतो राजकीयोकासः। एवं क्षेत्रद्वय-सिद्धायाद्रम्माणां शतैकं यत्रांकतोपि द्र १०० तथैतत्क्षेत्रद्वयप्रतिबद्ध-गृहद्रम्माश्च ॥ छ ॥ तथा करहाटविनिर्ग्गताय काश्यपगोत्राय बह्वृच-

शाखिने ब्राह्मणलोकपैय्याय ब्राह्मणवावणैयसुताय शूर्प्पारिकषट्ट्-षष्टिविषयान्तःपातिपेढालग्रामान्तर्व्वर्त्तिमाझिलवावाक्षेत्रम्। यस्य चाघाटनानि। पूर्व्वतो जोगेश्वरभट्टसत्कवावकः। दक्षिणतः कदम्बवृक्षः पश्चिमतो जोगेश्वरभट्टसत्कवावकः। उत्तरतो मधुवृक्षः। तथैतत्क्षेत्रप्रतिबद्धप्रदेशैकः। यस्य चाघाटनानि। पूर्व्वतो जोगेश्वरभट्ट-सत्कवावकः। दक्षिणतो ब्रह्मादायक्षेत्रम्। पश्चिमतोश्वत्थवृक्षः। उत्तरतश्चिंचावृक्षः॥ तथैतद्ग्रामान्तर्व्वर्त्ति आधवाइलाक्षेत्रं। यस्य चाघाटनानि। पूर्व्वतो ब्रह्मदायक्षेत्रम्। दक्षिणतः पर्व्वतः। पश्चिमतः पर्व्वतः एव। उत्तरतश्चणेवेढीक्षेत्रं। तथैतद्विषयान्तःपातिवीरारग्राम-प्रतिबद्धउप्पलपल्लिकान्तर्व्वर्त्तिकच्छक्षेत्रम्। यस्य चाघाटनानि। पूर्व्वतो राजकीयतत्खण्डकच्छक्षेत्रम्। दक्षिणतो नात्युन्नतवरलीसत्कपानीय-प्रपातः। पश्चिमतो मधुवृक्षः उत्तरतः पर्व्वतसत्कपानीयप्रपातः। एवं क्षेत्रत्रयसिद्धायाद्रम्माणां शतैकं। यत्रांकतोपि द्र १००। तथैतत्क्षेत्र-त्रयप्रतिबद्धगृहद्रम्माश्च॥ छ॥ एवं चतुराघाटनोपलक्षिता ग्रामस्तथा वावकाश्च सवृक्षमालाकुलाः स्वसीमापर्यन्ताः सतृणकाष्ठोदकोपेताः पूर्व्वप्रदत्तदेवदायब्रह्मदायवर्ज्जा अचाटभटप्रवेश्या अनासेध्याः। प्राग्लिखितक्रमेण समुत्पद्यमानद्रव्योत्पत्तिसंयुक्तास्तथा लिखितवावैल-कदांउपैयसत्कलघुअडिणिका तथा खानुवडा उभयग्रामद्वयीयक्षेत्राणां सत्कशुल्कमुक्तिवर्ज्ज श्रीस्थानके समायातसिद्धादायपलाण्डगृहद्रम्मा-दिपदकीयकल्लिवनमानेन तंडुलकुसैकादशसत्कशुल्कमुक्तिसहिता उदकातिसर्ग्गेण नमस्यवृत्त्या परमया भक्त्या प्रतिपादिताः॥ तदेतेषां

सान्वयबंधूनामपि भुंजतां भोजयतां कृषतां कर्षयतां वा न केनापि परिपंथना करणीया ॥ यत उक्तमेव पुरातनमहामुनिभिः ।

बहुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ २९ ॥
सद्योदानं निरायासं सायासं दीर्घपालनम् ।
अत एवर्षयः प्राहुर्द्दानाच्छ्रेयोनुपालनम् ॥ ३० ॥
दत्त्वा भूमिं भाविनः पार्त्थिवेन्द्रान्
भूयो भूयो याचते रामभद्रः ।
सामान्योयं धर्म्मसेतुर्न्नृपाणां
काले काले पालनीयो भवद्भिः ॥ ३१ ॥

इति मुनिवचनान्यवधार्य समागामिभिभूपालैरस्मद्वंशजैरन्यैर्व्वा पालन-धर्म्मफललोभ एव करणीयः । न पुनस्तल्लोपनपापकलंकाग्रेसरेण केनापि भवितव्यम् ॥ यस्त्वेवमभ्यर्त्थितोपि लोभादज्ञानतिमिरपटलावृतमतिरा-च्छिन्द्यादाच्छिद्यमानमनुमोदेत वा स पञ्चभिर्म्महापातकैरुपपातकैश्च लिप्तो रौरवमहारौरवान्धतामिस्रादिनरकांश्चिरमनुभविष्यति । तथा चोक्तं भगवता व्यासेन ।

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।
स विष्ठायां कृमिर्भूत्वा कृमिभिः सह पच्यते ॥ ३२ ॥

इत्यपि ॥ भूयोभ्यर्थना ।

मद्वंशजाः परमहीपतिवंशजा वा
पापादपेतमनसो भुवि भाविभूपाः ।

ये पालयन्ति मम धर्म्ममिमं समग्रम्

तेषां मया विरचितोंजलिरेष मूर्ध्नि ॥ ३३ ॥

छ ॥ यथा चैतदेवं तथा शासनदाता लेखकहस्तेन स्वमतमारोपयति।

यथा मतं मम। महामण्डलेश्वरश्रीमन्मुम्मुणिराजदेवस्य महामण्डले-श्वरश्रीमद्वज्जडदेवराजसूनोर्यदत्र शासने लिखितम् ॥ लिखितं चैतन्मया श्रीमद्राजानुज्ञया भाण्डागारसेनप्रधानश्रीजोउपैयेन भाण्डागारसेनमहा-कविश्रीनागलैयभ्रातृसूनुना। यदत्रोनाक्षरमधिकाक्षरं वा तत्सर्व्वं प्रमाणमिति ॥ छ ॥ छ ॥ श्रीर्भवतु स्वामिनः ॥ छ ॥ शिवमस्तु ॥ छ ॥

Summary

This inscription, engraved on a set of 5 copper-plates, consists 186 lines of neatly executed and well-preserved writing. A few place names, personal names and a *gōtra*-name, however, have become illegible. The plates are held together by a ring which has the usual Śilāhāra Garuḍa seal. This grant is written partly in prose and partly in verse and records the royal grants of some villages and lands as well as of the produce partly in the form of *drammas* and partly in food-grains to certain Brāhamaṇas. There are 33 verses in all, of which 22 occur in the eulgistic portion.

The record opens with a verse in praise of Gaṇapati, which is followed by another invoking the blessings of Śiva. The next 15 verses which eulogise Jīmūtavāhana and the Śilāra (Śilāhāra) kings born in his family from Kaparddin I to Chhittarāja are repeated from the earlier grants of the Śilāhāras. The next 5 verses which describe Chhittarāja and his brothers Nāgārjuna and

Mummuṇi are new, but they contain mere conventional praise. The formal part of the grant except for the details of the donees, villages and lands granted is also repeated from the earlier grants of the family.

The genealogy of the Śilāhāras is given as in other grants of the family. In the family of Jīmūtavāhana, the son of Jīmūtakētu, was born Kapardin (I), the ornament of the Śilāra (Śilāhāra) family. He was succeeded by the following kings – Pulaśakti; Laghu Kapardin (or Kapardin II); Vappuvanna; Jhañjha; his brother Gōggirāja; his son Vajjaḍa I; his son Aparājita; Vajjaḍa II; his brother Arikēsarin; his nephew Chhittarāja; his younger brothers Nāgārjuna and Mummuṇirāja; one after the other. The description of most of these princes is conventional and yields no historical informations.

The object of the present inscription is to record the grant, by the Śilāhāra Mummuṇirāja, of some villages and lands to learned Brāhmaṇas on the occasion of the lunar eclipse on the 15th *tithi* of the bright fortnight of Phālguna in the Śaka year 970, the cyclic year being Sarvaddhārin. The date corresponds regularly to the 20th February 1049 A.D. The grant was made by the Śilāhāra king for the spiritual welfare of his crowned queen Padmai.

The present plates record two separate grants to two groups of Brāhmaṇas. The first grant consisted of the following villages in the Varēṭikā-*vishaya*[1] (district) to the fourteen Brāhmaṇas, Nārāyaṇa Paṇḍita and others, who hailed from Karahāṭaka,[2] *viz.*, Ēkasāla[3] (445 *drammas*), Bhūtavali[4] (223 *drammas*), Vaḍavalī[5] (269 *drammas*), Āsalagrāma[6] (548 *drammas*), Umbaravalī[7] (50 *drammas*)

and one more, the name of which has become indistinct (48 *drammas*). The grant was in the form of number of *drammas* (stated in the brackets) from the revenue of the villages besides one *dramma* per house and also a *Kumāragadyāṇaka*. The names of all the 14 donees with their father's names and the *gōtras* and *śakhas* to which they belonged are all mentioned.

It is to be noted that the revenue from the villages mentioned above in the form of *drammas,* the house-tax and the *Kumāragadyaṇas* derived from them (the villages) were pooled together and distributed among the donees who probably lived at one place. The villages were not assigned to them severally. Of the donees, Nārāyaṇa Paṇḍita and Divākaraiya were given two shares each, and the rest one share each. It is also noteworthy that one of the donees, *viz.,* Kēśavabhaṭṭa, is described as Karṇāṭa while the 13 other Brāhmaṇas named along with him are not so specified though living in the Kannaḍa speaking Karahāṭa. The Brāhmaṇas of Karahāṭa correspond to the modern sub-sect of the Karhāḍē Brāhmaṇas in Maharashtra and Kōṅkaṇa.

The purpose of the grant was to provide for the observance, by these Brāhmaṇas, of their religious duties (*shaṭkarams*), the performance of the *pañchamahāyajñas* and the maintenance of their families.

While stating the boundaries of the villages in the Varēṭikā-*vishaya* rivers Ūlasa[8] and Pavahā[9] and the villages of Siyali, Vadavalī, Vikarā[10] and Ēkasāla are mentioned. The particulars given here of some boundaries of the donated villages show clearly that all of them were situated near each other and so their revenue and other

income could be easily pooled together and distributed among the donees.

The second grant made by means of the present plates consisted of the gift of the produce partly in the form of *drammas* and partly in food-grains from fields in two sets of other villages, not included in the Varēṭikā *vishaya,* to certain Brāhmaṇas individually. The villages were situated in the following two *vishayas:*

(A) Villages in the Abhyantara-Shaṭshashṭi-vishaya[11]-

(i) Mūlanda[12] and (ii) Vōriyalā[13]

(B) Villages in the Śūrpāraka-Shaṭshashṭi-vishaya[14]-

(i) Bṛihad-Aḍaṇikā[15]

(ii) Laghu-Aḍaṇikā[16]

(iii) Khānuvaḍā[17]

(iv) Pēḍhāla[18] and

(v) Vīrāra[19]

The fields whose produce was granted are named generally after the kind of food-grains produced in them such as *Khairōṇḍhā-kshētra, Khānuvaḍā-kshētra, Nihura-kshētra, etc.* While stating the boundaries of the donated fields in these villages the following particulars are specified: fields, hills, *ukāsa* (fields producing subsidiary grains), fruit-gardens, trees, boundary-stones (*pāshāṇa-śṛiṅkhalikā*), small steams, cow-paths, *khajjana* (salty land), *pānīya-prapāta* (water-falls), salty streams, temples, royal roads, *etc.*

The produce of the fields in the aforementioned villages in rice-measures and *drammas* was assigned to

the seven Vāvailaka Brāhmaṇas, Daddapaiya and others. The names of these seven donees with their fathers' names, their original places and the *gōtras* and *śākhās* to which they belonged are all mentioned. Five of them had come from Karahāṭa like those mentioned before; of the remaining two one hailed from Madhyadēśa and the other from Purī.[20]

While stating the measures of grains, *mūṭaka*, *khaṇḍikā* and *kuṭapa* are mentioned. Lines 115-116 state first the quantity of grains in one donation as one *mūṭaka* less by five *kuṭapas* and later mention the same quantity as follows: 3 *khaṇḍikas* and 15 *kuḍavas.* This gives the following table of the measures of food-grains:

20 *kuṭapas* = 1 *khaṇḍikā*

4 *khaṇḍikās* = 1 *mūṭaka*

It is stated that at the time of the present grant *Mahāmātya* Jōupaiya and *Mahāsāndhivigrahika* Viṭhapaiya bore the burden of the government of *Mahāmaṇḍalēśvara* Mummuṇirāja. The list of officers and others addressed by the king in respect of the proposed grant in the present inscription is the same as the one found in the Berlin Museum plates of Chhittarāja (No.15 above).

This grant was written by the Treasury Officer (and) the minister, Jōupaiya, the nephew of the Treasury Officer, the great poet, Nāgalaiya.

Notes

1. Varēṭikā *vishaya* seems to have comprised part of the modern Karjat Taluk of the Kolaba District, as many villages mentioned as situated in it can be satisfactorily identified in the vicinity of the

Bhivapurī Road station of the Central Railway, which lies in the Karjat Taluk (*CII.*, VI, p.85).

2. Karahāṭaka is modern Karhāḍ in the Satara District (*ibid.*, pp.29-30).

3. Ēkasāla is to be identified with the village of the same name, now situated about 1½ miles to the north of Bhivapurī Road Railway Station (*ibid.*, p.85).

4. Bhūtavali is about a mile to the south-west of Vaḍavalī (*ibid.*, p.86).

5. Vaḍavalī village lies about a mile to the south of Ēkasāla (*ibid.*).

6. Āsalagrāma is the same as the present day hamlet of Āsala about a furlong to the north of Bhūtavali (*ibid.*).

7. Umbaravalī is probably represented by Umrolī, a small village situated about a mile to the south of the Bhivapurī Road Railway Station (*ibid.*).

8. River Ulāsa is identified with the modern river Ulhāsa flowing about a furlong to the north of the village Ēkasāla (*ibid.*, pp.85-86).

9. River Pavahā is identified with a small stream flowing in between the villages Ēkasāla and Vaḍavalī crossing the railway track near the milestone SE 57 (*ibid.*, p.86).

10. Vikarā has been identified with a *vāḍī* specified by the name Bekare, which lies about two furlongs north of the village Āsala (*ibid.*).

11. Abhyantara-Shaṭshashṭi *vishaya* is evidently identical with the Sthānakābhyantarashaṭshashṭi *vishaya* mentioned in the Bhāṇḍup plates of Chhittarāja. It was so called because it included the Śilāhāra capital Sthānaka (modern Ṭhāṇā) and it comprised the territory between the Thāṇā and Bassein creeks (*ibid.*).

12. Mūlanda still retains its ancient name almost unchanged and is a railway station near Ṭhāṇā on the Central Railway (*ibid.*).

13. Variyalā is evidently modern Borivalī, a station on the Western Railway, which is the chief town of a Taluk of the same name in the Ṭhāṇā District (*ibid.*).

14. Śūrpāraka-shaṭshashṭi *vishaya* comprised the territory round Śūrpāraka, modern Sōpāra in the Bassein Taluk (*ibid.*).

15 and 16. The two villages Bṛihad-Aḍaṇikā and Laghu-Aḍaṇikā are identified with the village Adaṇī, situated 8½ miles to the east of Virār, which lies about 5 miles north of Sōpārā (ancient Śūrpāraka). (*ibid.*).

17. Khānuvaḍā lies to the north of Aḍaṇikā (*ibid.*).

18. Pēḍhāla is identical with Pēlhār, about 8 miles N.N.E. of Bassein (*ibid.*).

19. Virāra still retains its ancient name and is a station on the Western Railway (*ibid.*).

20. Purī was the ancient capital of Kōṅkaṇ (*ibid.*).

✵✵✵✵✵✵✵

No.21

PRINCE OF WALES MUSEUM PLATES OF MUMMUNIRAJA: SAKA YEAR 971

Location : Prince of Wales Museum, Bombay

Date : Śaka year 971 = 1049 A.D.

Script : Nāgarī

Language : Sanskrit

King : Mummuṇirāja

Dynasty : Śilāhāras of North Kōṅkaṇ

Reference : Mirashi, V.V., *CII,* VI, pp.98-106; No.15

Text

Metre: Vv. 1, 2, 11, 12, 19, 24, 25, 27-31, 34-38 *Anushṭubh;* 3-5, 15, 18 *Vasantatilakā;* 6 *Pṛithvī;* 7, 9, 10, 14, 16, 20 *Śārdūlavikrīḍita;* 8 *Sragdharā;* 13 *Āryā;* 17, 26, 33 *Indravajrā;* 21, 22 *Mālinī;* 23 *Vaṁśastha;* 32 *Śālinī*

सिद्धम् ।

जयश्चाभ्युदयश्च ॥

लभते सर्व्वकार्य्येषु पूजया गणनाय कः ।

विघ्नं निघ्नन्स वः पायादपायाद्गणनायकः ॥ १ ॥

स वः पातु शिवो नित्यं यन्मौलौ भाति जाह्नवी ।

सुमेरुशिखरोद्गच्छदच्छचंद्रकलोपमा ॥ २ ॥

जीमूतकेतुतनयो नियतं दयालु

र्जीमूतवाहन इति त्रिजगत्प्रसिद्धः ।

देहन्निजं तृणमिवाकलय्यन्परार्थे

यो रक्षति स्म गरुडात्खलु शंखचूडम् ॥ ३ ॥

तस्यान्वये निखिलभूपतिमौलिभूत

रत्नद्युतिच्छुरितनिर्म्मलपादपीठः ।

श्रीसाहसांक इव साहसिकः कपर्द्दी

सीलारवंशतिलको नृपतिर्ब्बभूव ॥ ४ ॥

तस्मादभूच्च तनयः पुलशक्तिनामा

सीमासमः सुरगुरूदितराजनीतेः ।

निर्ज्जित्य संगरमुखेखिलवैरिवर्ग्गं

निष्कण्टकं जगति राज्यमकारि येन ॥ ५ ॥

ततोपि समभूत्सुतो नृपशिरोविभूषामणिः

शितः सृणिरिवापरोरिकरिणां कपर्द्दी लघुः ।

यदीययशसा जगत्यतिशयेन शुक्लीकृते

न भाति सुरवारणो न च शशी न दुग्धांबुधिः ॥ ६ ॥

तस्मादप्यभवद्विभूतिपदवीपात्रं पवित्रीकृता

शेषक्ष्मावलयो महीपतिलकः श्रीवप्पुवन्नः सुतः ।

संग्रामांगणरंगिणासिलतया लूनैकदन्ता हठा

त्सर्व्वे येन विनायका विरचिता विद्वेषिणां दन्तिनः ॥ ७ ॥

तस्माज्जातस्तनूजो रजनिकर इवानंदिताशेषलोक

श्लाघ्यः श्रीझंझराजो दिवसकर इव ध्वस्तनिःशेष दोषः ।

शंभोर्यो द्वादशापि व्यरचयदचिरात्कीर्त्तनानि स्वनाम्ना

सोपानानीव मन्ये प्रणततनुभृतां स्वर्ग्गमार्ग्गोद्यतानाम् ॥ ८ ॥

भ्राता तत्र ततस्तस्तोज्ज्वलयशोराशिः प्रकाशीकृता

शेषक्ष्मावलयो बली बलवतां श्रीगोग्गिराजोऽभवत्।

चापाकर्षणकर्म्मणि प्रवणतां यस्मिन्गते भूपतौ

भीष्मद्रोणपृथासुतप्रभृतयश्चित्ते चमत्कारिताः॥ ९॥

तस्माद्विस्मयकारिहारिचरितप्रख्यातकीर्त्तिः सुतः

श्रीमान्वज्जडदेवभूपतिरभूद्भूचक्रचूडामणिः।

दोर्दण्डैकबलेन यस्य सहसा संग्रामरंगांगणे

राज्यश्रीः स्वयमेत्य वक्षसि रतिं चक्रे मुरारेरिव॥ १०॥

जयंत इव वृत्रारेः पुरारेरिव षण्मुखः।

ततः श्रीमानभूत्पुत्रः सच्चरित्रोपराजितः॥ ११॥

कर्ण्णस्त्यागेन यः साक्षात्सत्येन च युधिष्ठिरः।

प्रतापाद्दीप्तिमार्त्तण्डः कालदण्डश्च यो द्विषाम्॥ १२॥

शरणागतसामंता अपरेऽपि हि जगति रक्षिता येन।

स जयति यथार्थनामा शरणागतवज्रपंजरो देवः॥ १३॥

येन स्वागतमागताय विहितं गोम्माय नानाविधं

येनैवैयपदेवनाम्नि चलितं राज्यं स्थिरं कारितम्।

भिल्लम्माम्मणमम्बुवक्षितिभृतां दत्तं च येनाभयं

तस्य श्रीबिरुदंकरामनृपतेरन्यत् किमावर्ण्यते॥ १४॥

श्रीमानभूत्तदनु वज्जडदेवनामा

भूपालमस्तकमणिस्तनयो नयज्ञः।

अद्यापि यस्य चरितानि जनाः समस्ता

रोमांचकंचुकितगात्रलताः स्तुवन्ति ॥ १५ ॥

तद्भ्राताथ ततोरिकेसरिनृपो जातः सतां संमतो

दृप्तारातिकुलाचलैकदलने दंभोलिलीलां दधत् ।

गत्वा शैशव एव सैन्यसहितो दृष्ट्वा च सोमेश्वरं

तस्याग्रे पितुराज्ञया जगदलं यः कीलयित्वागतः ॥ १६ ॥

तद्भ्रातृजो वज्जडदेवसूनुः

श्रीच्छित्तराजो नृपतिर्ब्बभूव ।

सीलारवंशः शिशुनापि येन

नीतः परामुन्नतिमुन्नतेन ॥ १७ ॥

लंबालकानि कुचकुंभतटोपकंठ

प्रभ्रष्टहारलतिकानि निरंजनानि ।

उत्खाततीक्ष्णकरवालविदारितस्य

योन्तःपुराणि परिपंथिजनस्य चक्रे ॥ १८ ॥

हतारिनारीनेत्रांभःसेकसंवर्द्धनादिव ।

ब्रह्माण्डमण्डपं यस्य कीर्त्तिवल्ल्यधिरोहति ॥ १९ ॥

दृप्तारातिषु कोपकालदहनः सौभाग्यनारायणो

वारस्त्रीषु ततोनुजः समभवन्नागार्जुनः क्ष्मापतिः ।

यस्यामानुषमूर्जितं भुजबलं दूरान्निशम्य द्विषां

निद्रातीव रणांगणव्यसनिनी दोर्द्दण्डकंडूलता ॥ २० ॥

यदसमशिविरान्तर्मत्तगंधेभदान

प्रसरदनिलशुष्यत्स्रोतसोदिग्गजेन्द्राः ।

अरिनगरनिदाहोद्दामदिग्व्यापिधूम

प्रसरभयनिमीलल्लोचनान्युन्मिषन्ति ॥ २१ ॥

तदनु तदनुजन्मा मूर्त्तिमान्मीनकेतुः

क्षतरिपुविभवोभून्मुम्मुणिक्षोणिपालः ।

विधृतधनुषि यस्मिन्वाजिनीराजनांते

बलभिदपि बलीयान्वार्षिकं चापमौज्झत् ॥ २२ ॥

अथ स्वकीयपुण्योपचयात् समधिगताशेषपंचमहाशब्दमहासामन्ताधि-पतितगरपुरपरमेश्वरश्रीशिलाहारनरेन्द्रजीमूतवाहनान्वयप्रसूतसुवर्ण्णग-रुडध्वजाभिमानमहोदधित्यागजगज्झम्पझंपडाचार्यशरणागतवज्रपंजर-प्रभृतिसमस्तराजावलीविराजितमहामण्डलेश्वराधिपतिश्रीमुम्मुणिराजदेवे निजभुजोपार्ज्जितानेकमण्डलसहितपुरीप्रमुखचतुर्दशग्रामशतीसमन्वित-कोंकणमण्डलमनुशासति । तथैतदीयराज्यचिन्ताभारं नि . . . महामात्य श्रीदद्दपैयमहासांधिविग्रहिकश्रीविट्ठपैयेत्यादिश्रीकरणे स च महामण्ड-लेश्वराधिपतिश्रीमन्मुम्मुणिराजदेवः सर्व्वानेव स्वसम्बध्यमानकान-न्यानपि समागामिराजपुत्रमंत्रिपुरोहितामात्यप्रधानाप्रधानान् नियोगिका-नियोगिकांस्तथा राष्ट्रपतिविषयपतिनगरपतिग्रामपतींश्च । तथा हंजमन-नगरपौरत्रिवर्ग्गप्रभृतींश्च प्रणतिपूजासत्कारादेशपूर्वकं सम्बोधयत्यस्तु वः संविदितं यथा ॥

चला विभूतिः क्षणभंगि यौवनं

कृतान्तदन्तान्तरवर्ति जीवितम् ।

तथाप्यवज्ञा परलोकसाधने

नृणामहो विस्मयकारि चेष्टितम् ॥ २३ ॥

तथा चान्तर्ल्लीनजराराक्षसीप्रारब्धग्रासं यौवनम्। स्वर्ग्गवासान्नरक-पातसममिष्टसमागमवियोगदुःखम्। कदलीकाण्डगर्भवदसारः संसारः। सहजजरामरणव्याधिसाधारणकं शरीरम्। पवनचलितकमलिनीदल-गतजललवतरलतरे धनायुषी इति मत्वादृढतरविरक्तिबुद्धया संगृह्णीया-यात् दानफलम् ॥

कृतत्रेताद्वापरेषु तपोत्यर्थं प्रशस्यते ।
मुनयोऽत्र प्रशंसन्ति दानमेकं कलौ युगे ॥ २४ ॥

न तथा सफला विद्या न तथा सफलं तपः ।
यथाऽत्र मुनयः प्राहुर्दानमेकं कलौ युगे ॥ २५ ॥

तथा चोक्तं भगवता व्यासेन ।

अग्नेरपत्यं प्रथमं सुवर्ण्णं
भूर्वैष्णवी सूर्यसुताश्च गावः ।
लोकत्रयं तेन भवेद्धि दत्तं
यः कांचनं गां च महीं च दद्यात् ॥ २६ ॥

आस्फोटयन्ति पितरः प्रवल्गन्ति पितामहाः ।
भूमिदोस्मत्कुले जातः स नः संतारयिष्यति ॥ २७ ॥

भूमिदानं सुपात्रेषु सुतीर्थेषु सुपर्वसु ।
अगाधापारसंसारसागरोत्तारणं भवेत् ॥ २८ ॥

धवलान्यातपत्राणि दन्तिनश्च मदोद्धताः ।
भूमिदानस्य पुष्पाणि फलं स्वर्ग्गः पुरन्दर ॥ २९ ॥

इति धर्म्माधर्म्मविचारचतुरश्चिरंतनमुनिवचनान्यवधार्य मातापित्रो-रात्मनश्च श्रेयोर्थिना मया शकनृपकालातीतसंवत्सरशतेषु नवसु एकसप्तत्यधिकेषु विरोधिसंवत्सरान्तर्ग्गतभाद्रपदशुद्धपंचदश्यां यत्रांक-तोपि संवत् ९७१ भाद्रपदशुद्ध १५ शुक्रे संजातसोमग्रहणपर्व्वणि सुतीर्थे स्नात्वा गगनैकचक्रचूडामणये कमलिनीकामुकाय भगवते भास्कराय नानाविधमर्घ्यं दत्त्वा भगवंतं सुरासुरगुरुं त्रिलोकीपतिमुमापतिमभ्यर्च्य यजनयाजनादिषट्कर्मनिरतेभ्यः क्रतुक्रियाकाण्डशौण्डेभ्यः महामात्य-श्रीदद्दपैयविरचितब्रह्मपुरीविप्रेभ्यः। यत्र प्रत्येकं नामगोत्रादीनि॥ गौडदेशविनिर्ग्गतशाण्डिल्यगोत्रकौथुमशाखिकोकोपण्डितः पितामह-पण्डितसुतः मध्यदेशान्तःपातिमुंजस्थानविनिर्ग्गतवत्सगोत्रबहृच-शाखिदेवधरदीक्षितः यज्ञदीक्षितसुतः तथा भारद्वाजगोत्रमाध्यंदिन-शाखिदामोदरः केसैयादीक्षितसुतः तथा भार्ग्गवगोत्रबहृचशाखिसूदनैयः सोमेश्वरैयोपाध्यायसुतः लाटदेशान्तःपातिभृगुकच्छविनिर्ग्गतउपमन्यु-गोत्रबहृचशाखिदामोदरः सूदनदीक्षितसुतः तथा आत्रेयगोत्राणायनीय-शाखिनारायणोपासनी दामोदरोपाध्यायसुतः कुशिकगोत्रबहृचशाखिश्री-पतिः अग्निहोत्री केशवोपाध्यायसुतः तथा आत्रेयगोत्रबहृचशाखिश्री-पतिभट्टः दुर्गैया उपासनिसुतः तथा जमदग्निगोत्रबहृचशाखी कनकेश्वरः वेलादित्योपाध्यायसुतः तथा आत्रेयगोत्रबहृचशाखिवलैयोपासनी दीग्वैयाग्निहोत्रिसुतः लोकाक्षगोत्री यज्ञशाखिसर्व्वदेवैय ईश्वरोपाध्याय-सुतः तथा आत्रेयगोत्रबहृचशाखिविट्ठपैयोपाध्यायः सोढलैयोपाध्या-यसुतः एवमादिभ्यः यजनयाजनादिषट्कर्म्मकरणाय बलिचरुकाग्निहोत्र-

क्रतुक्रियाद्युत्सर्प्पणाय च मंदरजविषयान्तःपाति किइच्छिताग्रामः समस्तपल्लिकासहितः आरामकपूगीखनिकासमन्वितश्च। यस्य चाघाट-नानि। पूर्व्वतः श्रीनेरपर्व्वतीयपाणीवाडसीमा। उत्तरतो नीम्बाग्राम-सीमा। पश्चिमतो मातरग्रामसीमा। दक्षिणतः साम्बिननदीसीमा। एवं चतुराघाटनोपलक्षितः स्वसीमापर्य्यन्तः सतृणकाष्ठोदकोपेतः पूर्व्वदत्त-देवदायब्रह्मादायवर्ज्जः अनादेश्यः अनासेध्यः समुत्पद्यमानद्रम्मपंच-दशशतायस्थानः यत्रांकतोपि द्रम्माः १५०० पर्व्वतक्षितिसमकालीन आचंद्रार्कं यावत् उदकातिसर्ग्गेण परमया भक्त्या शासनेन प्रतिपादितः। तदेतेषां भुंजतां भोजयतां कृषतां कर्षयतां वा न केनापि परिपंथना करणीया। यदुक्तं पुरातनमहामुनिभिः।

बहुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥ ३०॥
सद्योदानं निरायासं सायासं दीर्घपालनम्।
अत एव मुनयः प्राहुर्दानाच्छ्रेयोनुपालनम्॥ ३१॥
दत्त्वा भूमिं भाविनः पार्थिवेन्द्रान्
भूयो भूयो याचते रामभद्रः।
सामान्योयं धर्म्मसेतुर्न्नराणां
काले काले माननीयो भवद्भिः॥ ३२॥
यानीह दत्तानि पुरा नरेन्द्रैर्द्दानानि धर्मार्थ यशस्कराणि।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत॥ ३३॥

इत्यवधार्य समागामिभिर्नृपतिभिरन्यैर्व्वा धर्म्मपालनफललोभ एव

करणीयः। न पुनस्तल्लोपनपापकलंकाग्रेसरेण केनापि भवितव्यम्।

एवमभ्यर्थितोपि लोभादज्ञानतिमिरपटलावृतमतिराच्छिंद्यादाच्छिद्यमानं

वानुमोदेत स स्वयं च महापातकैरुपपातकैर्व्वा लिप्यते। रौरव-

महारौरवांधतमिस्रादिनरकांश्चिरमनुभविष्यति। उक्तं च भगवता

व्यासेन।

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम्।

स विष्ठायां कृमिर्भूत्वा कृमिभिः सह पच्यते॥ ३४॥

विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः।

महाहयो हि जायन्ते भूमिदायं हरन्ति ये॥ ३५॥

गामेकां स्वर्ण्णमेकं वा भूमेरप्येकमंगुलम्।

हरन्नरकमाप्नोति यावदाहूतसंप्लवम्॥ ३६॥

आरामाणां सहस्रेण तडागानां शतेन च।

गवां कोटिप्रदानेन भूमिहर्त्ता न शुध्यति॥ ३७॥

षष्टिवर्षसहस्राणि स्वर्ग्गे तिष्ठति मानवः।

आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥ ३८॥

अथ भूयोभ्यर्थना।

मद्वंशजाः परमहीपतिवंशजा वा

पापादपेतमनसो भुवि भाविभूपाः।

ये पालयन्ति मम धर्म्ममिमं समस्तं

तेषां मया विरचितोंजलिरेष मूर्ध्नि॥ ३९॥

यथा चैतदेवं दापको लेखकहस्तेन स्वकीयमतमारोपयति। मतं मम

महामण्डलेश्वराधिपतिश्रीमन्मुम्मुणिराजदेवस्य महामण्डलेश्वराधिपति-

श्रीमद्वज्जडदेवसूनोः। लिखितं चैतन्नागलैयेन ॥

Summary

This inscription, engraved on a set of 3 copper-plates, consists 49 lines of neatly executed and well-preserved writing. The plates were held together by a ring having a seal with the figure of Garuḍa. The record is written partly in verse and partly in prose like other grants of the Early Śilāhāras, and it registers the royal grant of a village to 12 Brāhmaṇas.

The record opens with a verse in praise of Gaṇapati, which is followed by another invoking the blessings of Śiva. The eulogistic portion of this grant has the same number of verses and those too in the same order as in the preceding grant (No.20 above). The inscription refers itself to the reign of the Śilāhāra King Mummuṇirāja. His genealogy is traced from the mythical Jīmūtavāhana, the first historical king being Kapardin I. Mummuṇirāja bears the same titles as in the preceding grant. So this grant makes no addition to our historical knowledge of the Śilāhāra dynasty. At the time of the present grant the responsibility of Mummuṇirāja's administration (*śrīkaraṇa*) was undertaken by the *Mahāmātya* Daddapaiya, the *Mahāsāndhivigrahika* Viṭṭhapaiya and others.

The object of the present inscription is to record the grant, by Mummuṇirāja, of the village Ki-ichchhitā situated in the *vishaya* of Mandaraja[1] to twelve Brāhmaṇas, Kōkō Paṇḍita and others, residing in the *agrahāra* of Brahmapurī[2] founded by Daddapaiya, the

Mahāmātya of Mummuṇirāja. The donated village was bounded on the east by the boundary of the village Pāṇīvāḍa[3] of the Śrī-Nēra hill, on the north by the boundary of the village Nīmbā, on the west by the village Mātara, and on the south by the river Sāmbina. The revenue of the village amounted to 1500 *drammas*. The purpose of the grant was to provide for the performance of the religious rites and the usual *Pañchamahāyajñas, viz., bali, charu, agnihōtra,etc.* The names of all the 12 Brāhmaṇa donees with their fathers' names, countries, *gōtras* and *śākhās* to which they belonged are all mentioned. It is to be noted however, that in the case of only three of the donees places of their origin are mentioned. They are: Gauḍa,[4] Muñjasthāna[5] in Madhyadēśa and Bṛigukachchha[6] in the Lāṭa-dēśa.[7] Further, it is also noteworthy that 5 out of the 12 donees and 11 of their fathers bear an epithet with their names. These epithets, *viz., Paṇḍita, Dīkshita, Upāsanī, Agnihōtrī* and *Upādhyāya* are indicative of the learning, teaching and performance of religious rites on the part of the donees.

The grant was made on the occasion of a lunar eclipse which occurred on the 15th tithi of the bright fortnight of Bhādrapada in the Śaka year 971. The reading of the week-day is uncertain. This date corresponds to the 15th August 1049 A.D.

The grant contains towards the end the aproval of Mummuṇirāja, son of Vajjaḍadēva and the statement that it was written by Nāgalaiya.

Notes

1. Mandaraja *vishaya* comprised the territory in the vicinity of Divē Āgar (*CII.*, VI, p.100).

2. The *agrahāra* of Brahmapurī may now be represented by the village of Brāhmaṇaghar in the adjoining Taluk of Māṇgaōn of the Kolaba District (*ibid.*).

3. Pāṇīvāḍa may be identical with Pāṇadarē in the Mahal of Mahasālā (*ibid.*).

4. Gauḍa is well-known as the name of North and West Bengal (*ibid.*).

5. Muñjasthāna may have been some place founded by the famous Paramāra king Muñja. Perhaps, it is identical with modern Mujpur, south of Rādhanpur in Gujarat (*ibid.*).

6. Bhṛigukachchha is the modern Broach in Gujarat (*ibid.*).

7. Lāṭa-dēśa is well-known as the name of Central and Southern Gujarat (*ibid.*).

******

No.22
DIVE AGAR PLATE OF MUMMUNIRAJA
SAKA YEAR 975

Location	: Divē Āgar, Kolaba District, Maharashtra
Date	: Śaka year 975 = 1053 A.D.
Script	: Nāgarī
Language	: Sanskrit
King	: Mummuṇirāja
Dynasty	: Śilāhāras of North Kōṅkaṇ
Reference	: Mirashi, V.V., *CII.*, VI, pp.107-110; No.16; Gai, G.S., *EI.*, XXXIX, pp.132-34

Text

सिद्धम्। जयश्चाभ्युदयश्च ॥

शकनृपकालातीतसंवत्सरशतेषु नवसु पञ्चसप्तत्यधिकेषु विजयसंवत्स-रान्तर्ग्गत आषाढ वदि पञ्चम्यां यत्राङ्कतोपि संवत् ९७५ आषाढ वदि ५ अद्येह समधिगताशेषपञ्चमहाशब्दमहासामन्ताधिपतितगरपुरपरमेश्वर-श्रीसीलारनरेन्द्रजीमूतवाहनान्वयप्रसूतसुवर्ण्णगरुडध्वज सीलारमा-र्त्तण्ड राजमार्त्तण्ड डमरमेघडम्बर वीरपुरन्दर निश्शंकलंकेश्वर रिपुमुण्ड-मालालंकृतवसुमतीस्वयंवर वीरचरितभारतावतार अरिवीरपतनकेदार प्रतिराजप्रजागर रायचतुरङ्गजयचतुर दैत्यरिपुदलनदामोदर तरुणीहृद-याकृष्टिमंत्राक्षर शौर्यमदगन्धसेन्दुर शरणागतवज्रपंजरेत्यादिसमस्त-राजावलीविराजितमहामण्डलेश्वराधिपतिश्रीमन्मुम्मुणिराजदेवविजय-राज्ये। तथैतद्राज्यचिन्ताभारं समुद्वहति महासान्धिविग्रहिक-श्रीविट्ठपैनायके सत्येतस्मिन्काले प्रवर्त्तमाने स च महामण्डलेश्वरा-

धिपतिश्रीमुम्मुणिदेवराजः। प्रधानश्रीनारायणैयः तथा सांधिविग्रहिक-श्रीविट्ठपैनायकः पुरोहितश्रीवासुदेवोपाध्यायः। तथा श्रीनारायण-पण्डितः। तथा श्रीदिवाकरज्योतिषिकः। भाण्डागारसेनप्रधान-श्रीजोउपैयः। सान्धिविग्रहिकश्रीठाकुरेयः। तथा द्वितीयच्छेपाटी-सेनश्रीवावपैयादिप्रधानपुरुषाणां प्रत्यक्षं आगरदीपकनिवासिषोडश-महत्तरकप्रमुखचक्षुष्मत्तोपेतान् महाब्राह्मणान् पूर्व्वं श्रीपद्मलदेवी-व्यवस्थापनव्यवस्थयैव एतान् व्यवस्थापयति यथाऽस्माभिर्द्दीपकागर-ग्रामः वोरितली। कतिल। कालैज। ग्रामत्रयसहितः कोष्ठेयकृतः। तत्रेयं व्यवस्था। इतःप्रभृति अस्मदीयकरणे न राज्ञीभिः कुमारैर्व्वा भोक्तव्यः॥ सामन्तनायकठाकुरादीनां कस्यापि न देयः॥ ब्रह्मणैश्च प्रतिवर्षं पूर्व-रूढया सिद्धायो देयः। षोडशभिः स्मारिकामध्ये विचारिता दण्डादायः। दीपकागरस्यैव देणकपडणकादिकं न ग्राह्यम्। प्राग्लिखितग्रामत्रयस्य तु पुनः मण्डलाचारेण देणकपडणकादिकं ग्राह्यम्॥ एवमनया व्यवस्थया पूर्व्वाचारेण व्यवहरन्तो ब्राह्मणा आचन्द्रार्कं प्रतिपालनीयाः। लिखितं चैतन्महाभाण्डागारसेनप्रधानश्रीजोउपैयेनेति ॥ श्रीरस्तु।

Summary

This inscription, engraved on one side of a single copper-plate, consists 18 lines of neatly executed and well-preserved writing. Some of the letters exhibit a slight tendency towards ornamentation, *e.g.,* cursive letter *dai* in *adhipati* (ll.7-8), *śirōmātras* of letter *dai* in *daityaripu* (1.6), *sau* in *saurya* (1.7), *etc.* The whole record is in prose and it records a settlement in respect of the village Dīpakāgara.

After the *Siddham* symbol followed by the benedictory expression *Jayaśchābhyudayaścha,* the inscription commences with its date, *viz.,* the fifth tithi of the dark fortnight of Āshāḍha in the Śaka year 975, the cyclic year being Vijaya. It corresponds to the 22nd July 1053 A.D.

The plate refers itself to the reign of the Śilāhāra king, the *Mahāmaṇḍalēśvarādhipati* Mummuṇirāja, who bears in this record not only the *birudas* noticed in his other grants but some others also which occur here for the first time. See *e.g.* the following: *Sīlāra-mārtaṇḍa* (the Sun of the Sīlāra family), *Ḍamara-mēgha-ḍambara* (thunder to the hostile multitude), *Vīra-Purandara* (Indra among heroes), *Niśśṅka-Laṅkēśvara* (the fearless Lord of Laṅkā), *Ripu-muṇḍa-māl-ālaṅkṛita-vasumatī-svayaṁvara* (the self chosen consort of the earth adorned with the garland of the cut-off heads of enemies), *Vīra-charita-Bhārat-āvatāra* (an incarnation of the heroic descendant of Bharata), *Ari-vīra-patana-Kēdāra* (Śiva causing the downfall of hostile warriors), *Pratirāja-prajāgara* (he who causes spleeplessness to hostile princes), *Rāya-chatur-aṅga-jaya-chatura* (clever in vanquishing the four-membered army of kings), *Daitya-ripu-dalana-Dāmōdara* (veritable Kṛishṇa in destroying demon-like foes), *Taruṇī-hṛiday-ākṛishṭi-mantrākshara* (an incantation attracting hearts of young women), and *Śaurya-mada-gandha-sēndura* (a scent-elephant with the rut of valour). Unlike other early records of the Śilāhāras, the present plate does not give the genealogy of the regining king.

The object of the present inscription is to record a *vyavasthā* (settlement) in respect of the village

Dīpakāgara[1] together with its three hamlets, *viz.*, Vōritalī,[2] Katila and Kālaija,[3] which was in effect the ratification of the *vyavasthā* previously laid down by the queen Padmaladēvī. She is mentioned also in the Bhōighar plates (No.12 above) and was evidently the mother of the three brothers Chhittarāja, Nāgārjuna and Mummuṇi. The *vyavasthā* was made in the presence of the following royal officials, *viz.*, the *Pradhāna* (minister) Nārāyaṇaiya, the *Sāndhivigrahika* Viṭṭhapaiya Nāyaka, the *Purōhita* (family priest) Vāsudēvōpādhyāya and Nārāyaṇa Paṇḍita, the *Jyotishka* (astrologer) Divākara, the Treasury Officer, Minister Jōupaiya, the *Sāndhivigrahika* Ṭhākurēya, the Junior Treasury Officer Vāvalaiya and others as well as the principal Brāhmaṇas and the sixteen *Mahattaras* (representatives) of Āgaradīpaka.

The *vyavasthā* stipulates that the queen and the princes as well as the *Sāmantas, Nāyakas* and *Ṭhākuras*[4] should not claim any enjoyment of the said village and the hamlets. The Brāhmaṇas should pay the annual levy according to the previous custom. The fine as imposed by the assembly (*Smārikā*) of the sixteen persons should be paid. Only Dīpakāgara was exempted from *dēṇaka* (cess) and *paḍaṇaka* (accommodation), while the three hamlets are not so exempted. The Brāhmaṇas who observed this *vyavasthā* are to be protected so long as the Sun and the Moon endure.

The charter was written by the *Pradhāna* Jōupaiya, the Chief Treasury Officer. He is mentioned as scribe in several other records of Chhittarāja and Mummuṇirāja.

Notes

1. Dīpakāgara is undoubtedly Divē Āgar, where the plate was found (*CII.*, VI, p.108).

2. Vōritalī may be Vadavali about 3 km. north by east of Divē Āgar (*ibid.*).

3. Kālaija is probably Kārlē about 3 km. almost due south of Divē Āgar (*ibid.*).

4. These seem to be officers of different grades. *Sāmanta* may have been the head of a Province, *Nāyaka*

that of a division, and *Ṭhākura* that of a vishaya (district) (*ibid., n.* 1).

******

No.23
AMBARNATH TEMPLE INSCRIPTION OF MAMVANIRAJA: SAKA YEAR 982

Location	: Ambarnāth, Thana District, Maharashtra
Date	: Śaka year 982 = 1061 A.D.
Script	: Nāgarī
Language	: Sanskrit
King	: Māṁvāṇirāja
Dynasty	: Śilāhāras of North Kōṅkaṇ
Reference	: Mirashi, V.V., *CII.*,VI,pp. 110-113,No.17

Text

सिद्धम्। संवत् ९८२ श्रावण शुद्ध ९ शुक्रे समधिगताशेषपञ्चमहाशब्द-महामंडलेश्वराधिपतिरिपुदैत्यदलनदामोदरशरणागतवज्रपंजरेत्यादिसमस्तराजावलिविराजमानमहामण्डलेश्वरश्रीमांवाणिराजदेवविजयराज्ये-एतत्समस्तराज्यचिंताभारसमुद्वहनमहामात्यश्रीबिंबपैयस्तथा महाप्रधानश्रीनागणैयस्तथा लेखसान्धिविग्रहिकश्रीवकवैयस्तथा महासान्धिविग्रहिकश्रीजोगलैयस्तथा भाण्डागारप्रथमस्थेपाढिसेनमहादेवैयस्तथा द्वितीयस्येमभाइलैयादिप्रधानश्रीकरणाधिष्ठितकल्याणविजयराज्ये वर्धमाने श्रीमहाराजगुरुनाभातलघुराजगुरुश्रीविलंडशिवभट्ट षकाणपैवयकमहासामंतश्रीतासिवराजलैः कारापकैः भूत्वा श्री अम्बरनाथदेवकुला . . . . . . भगलसमुद्धरितपाटल्यां महामण्डलेश्वरश्रीमच्छित्तराजदेवस्य भवनं संपादितम्।

Summary

This inscription, engraved on a stone girder of the temple at Ambarnāth, consists 6 lines of writing. Some letters in the last line are indistinct. This inscription is wholly in prose and records the completion of the Ambarnāth temple which had been commenced by Chhittarāja.

The inscription refers itself to the reign of the *Mahāmaṇḍalēśvara* Māṁvāṇirājadēva, who is described as having obtained the five *mahāśabdas* and as having assumed the *birudas Mahāmaṇḍalēśvarādhipati* (the chief of the *Mahāmaṇḍalēśvaras*), *Ripu-daitya-dalana-Dāmōdara* (veritable Dāmōdara who has exterminated the demons that were his enemies) and *Śaraṇāgata-vajrapaṁjara* (an adamantine cage protecting those that seek his protection). This king is evidently identical with Mummuṇi, the youngest brother of the Śilāhāra king Chhittarāja.

The object of the inscription seems to be that the temple of Ambarnāth, which had been commenced by *Mahāmaṇḍalēśvara* Chhittarājadēva was completed by some royal officers during the reign of Māṁvaṇirāja. In the introductory portion of the inscription are mentioned the following officers of Māmvāṇirāja: the *Mahāmātya* Bimbapaiya; the *Mahāpradhāna* Nāgaṇaiya; the *Lēkha-Sāndhivigrahika* Vakavaiya; the *Mahāsāndhivigrahika* Jōgalaiya; the Senior *Bhāṇḍāgārasēna* (Treasury Officer) Mahādēvaiya, and the Junior *Bhāṇḍāgārasēna* Bhāilaiya. Among those who caused to be completed the temple at Pāṭapallī[1] were the chief *Rājaguru* Nābhāta, the Junior *Rājaguru* Vilaṇḍaśivabhaṭṭa and the *Mahāsāmanta*

Tāsivarājala. Of these, the *Mahāmātya* Nāgaṇaiya is mentioned also in the Bhāṇḍup and Berlin Museum plates of Chhittarāja (Nos.13 and 15 above) and the grant of his feudatory Chāmuṇḍarāja (No.16 above).

Note

1. Pāṭapallī may have been the ancient name of the village where the temple of Ambarnāth is situated (*CII.,* VI, p.112).

****

No.24
VIHAR STONE INSCRIPTION OF ANANTADEVA I
SAKA YEAR 1003

Location	: Vihār, Thana District, Maharashtra
Date	: Śaka year 1003
Script	: Nāgarī
Language	: Sanskrit
King	: Anantadēva I
Dynasty	: Śilāhāras of North Kōṅkaṇ
Reference	: Mirashi, V.V., *CII.,* VI, pp. 113-115; No.18

Text

संवत् १००३ महामण्डलेश्वराधिपतिश्रीअनंतदेवविजयराज्ये अमात्यरुद्र-पैयादिषु श्रीकरणचिन्तां वहत्सु वियाडिकवंशमावैयसुत अज्यापानायकस्य खैरामणे सिद्धाय देणा पडणं गृहद्रम्मा दत्ता ॥

Summary

This inscription, engraved on a sandstone slab, consists only four lines of somewhat defaced writing in the upper half and three more almost completely effaced in the lower half. The language of the record is incorrect Sanskrit influenced by Marāṭhī. The inscription is laconically worded and so its meaning is somewhat uncertain.

The inscription mentions *Mahāmaṇḍalēśvarādhipati* Anantadēva (I) without any reference to his royal family. But the findspot of the record and the title *Mahāmaṇḍalēśvarādhipati* prefixed to his name leave no

doubt that he is the first homonymous Śilāhāra king. The date Śaka 1003 falls in his reign, as another record of his time, *viz.* the Khārepāṭaṇ plates (No.25 below), is dated only 13 years later, in Śaka 1016. The date of the present record does not admit of verification for want of necessary details.

The concise nature of the present record makes it difficult to ascertain its purport clearly. It seems to record the donation of the revenue dues (*siddhāya*), accommodation cess (*paḍaṇa*) and the house-tax in *drammas* (*gṛiha-dramma*) in the village Khairāmaṇa to Ajyapānāyaka, the son of Māvaiya, who belonged to the family named Viyāḍika. The donor is not mentioned, but he was probably the Śilāhāra king as the whole revenue of a village was donated. The inscription seems to be a public notification for the information of the residents of the village.



No.25
KHAREPATAN PLATES OF ANANTADEVA I
SAKA YEAR 1016

Location : Khārēpāṭaṇ, Ratnagiri District, Maharashtra

Date : Śaka year 1016 = 1095 A.D.

Script : Nāgarī

Language : Sanskrit

King : Anantadēva I

Dynasty : Śilāhāras of North Kōṅkaṇ

Reference : Mirashi, V.V., *CII.,* VI,pp.115-120 No.19

Text

Metre: Vv. 1, 2, 11, 12, 19 *Anushṭubh;* 3-5, 15, 18, 23, 25 *Vasantatilakā;* 6 *Pṛithvī;* 7, 9, 10, 14, 16, 20 *Śārdūlavikrīḍita;* 8, 24 *Sragdharā;* 13 *Āryā;* 17 *Indravajrā;* 21, 22 *Mālinī*

सिद्धम् ।

लभते सर्व्वकार्येषु पूजया गणना यकः ।

विघ्नन्निघ्नन्स वः पायादपायाद्गणनायकः ॥ १ ॥

स वः पातु शिवो नित्यं यन्मौलौ भाति जाह्नवी ।

सुमेरुशिखरोद्गच्छदच्छचंद्रकलोपमा ॥ २ ॥

जीमूतकेतुतनयो नियतं दयालु

र्ज्जीमूतवाहन इति त्रिजगत्प्रसिद्धः ।

देहं निजं तृणमिवाकलयन्परार्थे

यो रक्षति स्म गरुडात्खलु शंखचूडम् ॥ ३ ॥

तस्यान्वये निखिलभूपतिमौलिनूत्न

रत्नद्युतिच्छुरितनिर्मलपादपीठः ।

श्रीसाहसांक इव साहसिकः कपर्द्दी

सीलारवंशतिलको नृपतिर्ब्बभूव ॥ ४ ॥

तस्मादभूच्च तनयः पुलशक्तिनामा

सीमासमः सुरगुरूदितराजनीतेः ।

निर्ज्जित्य संगरमुखेखिलवैरिवर्ग्गं

निष्कण्टकं जगति राज्यमकारि येन ॥ ५ ॥

ततश्च समभूत्सुतो नृपशिरोविभूषामणिः

शितः सृणिरिवापरोरिकिरिणां कपर्द्दी लघुः ।

यदीययशसा जगत्यतिशयेन शुक्लीकृते

न भाति सुरवारणो न च शशी न दुग्धाम्बुधिः ॥ ६ ॥

तस्मादप्यभवद्विभूतिपदवीपात्रं पवित्रीकृता

शेषक्ष्मावलयो महीपतिलकः श्रीवप्पुवन्नः सुतः ।

संग्रामांगणरंगिणासिलतया लूनैकदंता हठा

त्सर्व्वे येन विनायका विरचिता विद्वेषिणां दंतिनः ॥ ७ ॥

तस्माज्जातस्तनूजो रजनिकर इवानंदिताशेषलोकः

श्लाघ्यः श्रीझंझराजो दिवसकर इव ध्वस्तनिःशेषदोषः ।

शंभोर्यो द्वादशापि न्यरचयदचिरात्कीर्त्तनानि स्वनाम्ना

सोपानानीव मन्ये प्रणततनुभृतां स्वर्ग्गमार्गोद्यतानाम् ॥ ८ ॥

भ्राता तस्य ततस्ततोज्ज्वलयशोराशिः प्रकाशीकृता

शेषक्ष्मावलयो बली बलवतां श्रीगोग्गिराजोभवत्।

चापाकर्षणकर्म्मणि प्रवणतां यस्मिन्गते भूपतौ

भीष्मद्रोणपृथासुतप्रभृतयः सर्व्वे चमत्कारिताः ॥ ९ ॥

तस्माद्विस्मयकारिहारिचरितप्रख्यातकिर्त्तिः सुतः

श्रीमान्वज्जडदेवभूपतिरभूद्भूचक्रचूडामणिः।

दोर्दण्डैकबलस्य यस्य सहसा संग्रामरंगांगणे

राज्यश्रीः स्वयमेत्य वक्षसि रतिं चक्रे मुरारेरिव ॥ १० ॥

जयंत इव वृत्रारेः पुरारेरिव षण्मुखः।

ततः श्रीमानभूत्पुत्रः सच्चरित्रोऽपराजितः ॥ ११ ॥

कर्ण्णस्त्यागेन यः साक्षात्सत्येन च युधिष्ठिरः।

प्रतापाद्दीप्तिमार्त्तण्डः कालदण्डश्च यो द्विषाम्॥ १२ ॥

शरणागतसामंता अपरेपि च जगति रक्षिता येन।

स जयति यथार्थानामा शरणागतवज्रपंजरो देवः ॥ १३ ॥

येन स्वागतमागताय विहितं गोम्माय नानाविधं

येनैवैयपदेवनाम्नि चलितं राज्यं स्थिरं कारितम्।

भिल्लम्मामम्मणमम्बुवक्षितिभृतां दत्तं च येनाभयं

तस्य श्रीबिरुदंकरामनृपतेरन्यत्किमावर्ण्यते ॥ १४ ॥

श्रीमानभूत्तदनु वज्जडदेवनामा

भूपालमस्तकमणिस्तनयो नयज्ञः।

अद्यापि यस्य चरितानि जनाः समस्ता

रोमांचकंचुकितागात्रलता स्तुवन्ति ॥ १५ ॥

तद्भ्राता च ततोरिकेसरिनृपोजातः सतां सम्मतो

दृप्तारातिकुलाचलैकदलने दंभोलिलीलां दधत् ।

गत्वा शैशव एव सैन्यसहितो दृष्ट्वा च सोमेश्वरं

तस्याग्रे पितुराज्ञया जगदलं यः कीलयित्वागतः ॥ १६ ॥

तद्भ्रातृजो वज्जडदेवसूनुः श्रीच्छित्तराजो नृपतिर्ब्बभूव ।

शीलारवंशः शिशुनापि येन नीतः परामुन्नतिमुन्नतेन ॥ १७ ॥

लंबालकानि कुचकुंभतटोपकंठ

प्रभ्रष्टहारलतिकानि निरंजनानि

उत्खाततीक्ष्णकरवालविदारितस्य

योन्तःपुराणि परिपंथिजनस्य चक्रे ॥ १८ ॥

हतारिनारीनेत्रांभस्सेकसंवर्द्धनादिव ।

ब्रह्माण्डमण्डपं यस्य कीर्त्तिवल्ल्यधिरोहति ॥ १९ ॥

दृप्तारातिषु कोपकालदहनः सौभाग्यनारायणो

वारस्त्रीषु ततोनुजः समभवन्नागार्जुनः क्ष्मापतिः ।

यस्यामानुषमूर्ज्जितं भुजबलं दूरान्निशम्य द्विषां

निद्रातीव रणांगणव्यसनिनी दोर्द्दण्दकण्डूलता ॥ २० ॥

यदसमशिबिरान्तर्म्मत्तगंधेभदान

प्रसरदनिलशुष्यत् स्रोतसो दिग्गजेन्द्राः ।

अरिनगरनिदाहोद्दामदिग्व्यापिधूम
प्रसरभयनिमीलल्लोचना नोन्मिषंति ॥ २१ ॥
तदनु तदनुजन्मा मूर्त्तिमान्मीनकेतुः
क्षतरिपुविभवोभून्मुम्मुणिः क्षोणिपालः ।
विधृतधनुषि यस्मिन्वाजिनीराजनां ते
बलभिदपि बलीयान्वार्षिकं चापमौज्झत् ॥ २२ ॥
तस्मिन्नृपे प्रवरकीर्त्तिशरीरभाजि
नागार्जुनस्य तनयो नयचक्रवर्त्ती ।
भूपोऽभवत्परमधर्म्मविशुद्ध देहः
सीलारगोत्रनृपरत्नमनन्तपालः ॥ २३ ॥
जाते दायादवैरिन्व्यसनिनि समये यैरवासप्रभावै
र्ध्वस्ता देवद्विजातिप्रमथनविधिना कोंकणक्षोणिरेषा ।
तानुग्रान्पापराशीन्मुनयवनभटान्खड्गधाराम्बुरासैः ।
क्षिप्त्वोच्चैश्चंद्रबिम्बे स्वकुलपतिसखो यः स्वकीर्त्तिं लिलेख ॥ २४ ॥
चिन्तामणौ प्रणयिनां नयनाभिरामे
कामे कुरंगकदृशां जगदेकवीरे ।
निर्व्वैरिवीरमवनीवलयं विधाय
धर्म्मेण पालयति तत्र नरेंद्रचन्द्रे ॥ २५ ॥
अथ स्वकीयपुण्योदयात्समधिगतपंचमहाशब्दमहासामंताधिपतितगर-
पुरपरमेश्वरशीलारनरेन्द्रजीमूतवाहनान्वयप्रसूतसुवर्णगरुडध्वजाभिमान

महोदधिनिःशंकलंकेश्वरवीरचरितभारतावतारअरिवीरपतनकेदारकोपका-लानलत्यागजगज्झंपझंपडाचार्यपश्चिमसमुद्राधिपतिरायपितामहशरणा-गतवज्रपंजरप्रभृतिसमस्तराजावलीविराजितमहामंडलेश्वराधिपतिश्रीम-दनंतदेवकल्याणविजयराज्ये निजभुजोपार्जितानेकमंडलसमेतां पुरीप्रमु-खचतुर्दशग्रामशतीसमन्वितां समस्तकोंकणभुवं समनुशासति तथैतद्रा-ज्यचिन्ताभारं समुद्वहति महामात्यश्रीनौवितकवासैदः। महासांधिवि-ग्रहिकश्रीरिषिभट्टः भांडागारिकप्रथमच्छेपादीसेनमहादेवैयप्रभुः। द्वितीय-च्छेपादीसेनप्रधानश्रीसोमणैयप्रभुः। एवमादिश्रीकरणे प्रवर्तमाने स च महामंडलेश्वरः श्रीमदनन्तदेवराजः सर्व्वानेव स्वसंबध्यमानकान् अन्या-नपि राजपुत्रमंत्रिपुरोहितामात्यप्रधानाप्रधाननियोगिकांस्तथा राष्ट्रपति-विषयपतिनगरपतिग्रामपतिनियुक्तानियुक्तराजपुरुषजनपदांस्तथा हंजम-ननगरपौरत्रिवर्ग्गप्रभृतींश्च प्रणतिपूजासत्कारसमादेशैः संदिशत्यस्तु वः संविदितं यथा॥ शकनृपकालातीतसंवत्सरदशशतेषु षोडशाधिकेषु भावसंवत्सरांतर्ग्गतमाघशुद्धप्रतिपदायां यत्रांकतोपि संवत् १०१६ महामंडलीकश्रीमदनंतदेवेन श्रीमद्वलीपत्तनीयमहाप्रधानदुर्गश्रेष्ठिसुत-महाप्रधानश्रीभाभणश्रेष्ठिनस्तद्भ्रातृमहासांधिविग्रहिकश्रीधणामश्रेष्ठिनः तयोर्यत्प्रवहणं श्रीस्थानके तथा नागपुरसूर्प्पारकचेमूल्यादिषु वेलाकुलेषु चतुर्दशशतकुंकणाभ्यंतरेषु यत्प्रवहणं समागच्छति तस्य यच्छुल्कं नोरिककर्मकराणामपि प्रवेशे निर्गमेपि श्रीकुंकणचक्रवर्त्तिना श्रीमदनंतदेवराज्ञा सीलारेण दत्तताम्रशासननिबद्धं शुल्कं परित्यक्तम्। तत्पुत्रपौत्रादीनां श्रेष्ठिपाणमश्रेष्ठिकुडुकुलश्रेष्ठिमालैयादीनामपि प्रतिपाल-

नीयम्॥ उपार्जितं चैतत् श्रीधरपंडितेन राजद्वारस्थितेन कुंकण-चक्रवर्तिनं श्रीमदनंतदेवं समाराध्य ॥ * ॥

Summary

This inscription, engraved on a set of 3 copper-plates, consists 84 lines of well-executed and well-preserved writing. The plates were held together by a ring with the usual Garuḍa seal of the Śilāhāras. This grant is written partly in verse and partly in prose. It records the exemption from certain customs dues granted by the Śilāhāra king Anantapāla I to two merachants.

The first 22 verses, which contain initial *maṅgalas* and the description of the Śilāhāra kings from Kapardin I to Mummuṇi, are repeated from the earlier grants like the Prince of wales Museum plates of Mummuṇirāja (No.21 above). The next 3 verse (23-25) which describe the donor Anantapāla (also called Anantadēva elsewhere in the record), the son of Nāgārjuna, are new. Verse 24 states that at the end of the reign of Mummuṇi, there was a civil war in the kingdom, taking advantage of which the Kōṅkaṇa country was overrun by the Yavanas, who harassed gods and Brāhmaṇas. But Anantapāla drove away the Yavanas and inscibrd his fame on the disc of the moon. It is suggested that the Kadambas of Goā, assisted by some Yavana chiefs ruling on the west coast, raided the Kōṅkaṇa country. Anantapāla not only drove out the invaders, but he seems to have conquered southern Kōṅkaṇ and some part of the Goā territory. This is shown by the present grant which allows some concessions to the merchants of Balipattana (Khārēpāṭaṇ) in the Ratnagiri District. Besides the title *Niḥśaṅka-Laṅkēśvara* (the

fearless lord of Laṅka) assumed by Anantapāla suggests his control over Laṅkā (part of the Goā territory). As his rule extended over the whole Kōṅkaṇ country, he is referred to as *Kōṅkaṇa-Chakravartin* in the present grant.

The inscription records the exemption from certain custom dues and other concessions granted by Anantapāla to two merchants of Balipattana,[1] *viz.,* Bhābhaṇa-śrēshṭhin, who held the rank of *Mahāpradhāna,* and his brother Dhaṇāma-śrēshṭhin, who was *Mahāsāndhi-vigrahika,* when their ships and sailors entered the ports in North Kōṅkaṇ such as Śrīsthānaka,[2] Nāgapura,[3] Śūrpāraka[4] and Chēmūlya.[5] This favour seems to have been made in recognition of the services rendered by these high officers in the conquest of South Kōṅkaṇ and perhaps of some part of Goā.

The record has been dated on the first tithi of the bright fortnight of Māgha in the Śaka year 1016, the cyclic year being Bhāva. The date corresponds to the 9th January 1095 A.D.

At the time of the present grant Anantadēva's government was administered by the *Mahāmātya,* the Admiral (*Nauvitaka*) Vāsaida, the *Mahāsāndhivigrahika* Rishibhaṭṭa, the senior Treasury Officer, the *Mahāpradhāna* Mahādēvaiyaprabhu, the Junior Treasury Officer, the *Pradhāna* Sōmaṇaiyaprabhu and others.

The list of officers and others addressed by the king in respect of the grant contained in present inscription is the same as found in the Prince of Wales Museum plates of Mummuṇirāja mentioned above.

Notes

1. Balipattana is the same as Khārēpāṭaṇ, the findspot of the inscription (*CII.,* VI, p.116).

2. Śrīsthānaka is modern Ṭhānā (*ibid.,* p.56).

3. Nāgapura may be modern Nāgāv, 6 miles south-east of Alibāg in the Kolaba District (*ibid.,* p.116).

4. Śūrpāraka is modern Sōpāra (*ibid.,* p.86).

5. Chemūlya is certainly Chaul in the Kolaba District (*ibid.,* p.116).

****

No.26
KHAREPATAN PLATES OF RATTARAJA
SAKA YEAR 930

Location	: Khārēpāṭaṇ, Ratnagiri District, Maharashtra
Date	: Śaka year 930 = 1008 A.D.
Script	: Nāgarī
Language	: Sanskrit
King	: Raṭṭarāja
Dynasty	: Śilāhāras of South Kōṅkaṇ
Reference	: Mirashi, V.V., *CII.*, VI, pp. 183-193; No.41
	Kielhorn, F., *EI.*, III, pp.292-302

Text

Metre: Vv. 1 *Śārdūlavikrīḍita;* 2, 3 *Sragdharā;* 4 *Āryā;* 5 *Śikhariṇī;* 6 *Vasantatilakā;* 7, 26 *Śālinī;* 8-12, 24, 25, 27-29 *Anushṭubh;* 22, 23 *Indravajrā*

सिद्धम्। ओं नमः शिवाय।

हेलोल्लालितचण्डदण्डचरणांगुष्ठाग्रभागाहत

स्वर्ग्गगोद्गतशुक्तिसंपुटगलन्मुक्ताभृतं ताण्डवे।

पाणौ वीक्ष्य कपालमाश्वथ जटाचन्द्रामृतोज्जीवितं

कंकालं च यदद्भुतं स्मितमवत्वीशेन तद्वश्चिरम्॥ १॥

गोत्रं भित्वा न भूतो न मधुपवसतिर्न्नो सदा धर्मवक्रो

नाक्रान्तो दण्डकोटया न च परपवनाकम्पितो नान्तहीनः।

नाधिस्तान्नीतमूलः प्रकृतिरतिघनो नो रणे दत्तपृष्ठः

S.No. 5 - Inscription No. 26

Kharepatan Plates of Rattaraja; Saka Year 930

सोपूर्व्वोस्तीह वंशो यदुकुलतिलको राष्ट्रकूटेश्वराणाम्॥ २॥

तत्रासीद्दन्तिदुर्ग्गः प्रभुरपि च ततः कृष्णराजः पितृव्य

स्तस्माद्गोविन्दराजस्तमनु निरुपमोऽस्माज्जगत्तुंगदेवः।

तत्पुत्रोमोघवर्षो रिपुवनदहनोऽस्याप्यथाकालवर्षो

नप्तास्य श्रीन्द्रराजो रुचिरतरवपुस्तत्सुतोमोघवर्षः॥ ३॥

शृंगाररसनिवासो वसन्तवद्वरवधूसमूहवृतः।

हरिरिव तस्य कनीयान्भ्राता गोविन्दराजोभूत्॥ ४॥

पितृव्यस्तस्यासित्प्रणयिजनताकल्पविटपी

कृतांतोरातीनां नयगुणनिधिर्बद्दिगनृपः।

प्रतिच्छन्दः साक्षात्कृतयुगनृपाणां कलियुगे

सदाचारः शान्तो मुनिरिव जगत्तुंगतनयः॥ ५॥

शंभोः षडानन इवात्रिमुनेरिवेन्दू

रामो यथा दशरथस्य हरेर्ज्जयन्तः।

तस्यात्मजोपि चतुरंबुधिमेखलाया

भर्ता भुवः समभवद्भुवि कृष्णराजः॥ ६॥

सौरं भित्त्वा मण्डलं योगदृष्ट्या

याते तस्मिन्शैवसद्मावकाशम्।

तस्य भ्राता खोटिकाख्यस्ततोऽभू

त्पृथ्वीभर्ता त्यागधामोर्ज्जितश्रीः॥ ७॥

कक्कलस्तस्य भ्रातृव्यो भुवो भर्ता जनप्रियः।

आसीत्प्रचण्डधामेव प्रतापजितशात्रवः ॥ ८ ॥

समरे तं विनिर्जित्य तैलपोभून्महीपतिः ।

चालुक्यान्वयभ्राजिष्णुररातिगजकेसरी ॥ ९ ॥

तस्यात्मजः परं जिष्णुः ख्यातः सत्याश्रयोभवत् ।

क्षितीश्वरः सत्त्ववृत्तिर्विक्रमैकरसोर्ज्जितः ॥ १० ॥

एवं प्रवर्द्धमानचालुक्यान्वयश्रीसत्याश्रयराजे रट्टपाटीमनुशासति ॥

आसीद्विद्याधराधीशो गरुत्मद्दत्तजीवितः

जीमूतकेतोः सत्पुत्रो नाम्ना जीमूतवाहनः ॥ ११ ॥

ततः सिलारवंशोभूत्सिंहलक्ष्माभृतां वरः ।

प्रभूतभूतसौभाग्यभाग्यवानूर्ज्जितोर्ज्जितः ॥ १२ ॥

नाम्ना सणफुलः ख्यातः कृष्णराजप्रसादवान् ।

समुद्रतीरसह्यान्तदेशसंसाधनोभवत् ॥ १३ ॥

तत्पुत्रो धर्म्म एवाभून्नाम्ना धम्मियरः परः ।

प्रतापवान्महादुर्ग्गबलिपत्तनकृत्कृती ॥ १४ ॥

तस्मादैयपराजोभूद्विजिगीषुगुणान्वितः ।

स्नातश्चन्द्रपुरासन्ननालिकेराम्बुना स यः ॥ १५ ॥

बभूवावसरस्तस्मान्नीतिशास्त्रार्थतत्त्ववित् ।

एकनेत्रप्रदग्धारिकाण्डश्चण्डपराक्रमः ॥ १६ ॥

आदित्यवर्म्मा पुत्रोभूत्तेजसादित्यवत्ततः ।

तस्मादवसरो जातो जितारिर्द्धर्म्मवान्नृपः ॥ १७ ॥

चेमूल्यचन्द्रपुरजक्ष्माभृत्साहाय्यकारकात्।

ततोभवदिन्द्रराजस्त्यागभोगातिसुन्दरः॥ १८॥

तस्मात्प्रभूतभाग्योभूद्भीमो भीमाभविक्रमः।

तेजसा राहुवद्ग्रस्तचन्द्रमण्डल उज्वलः॥ १९॥

ततश्चावसरो राजा जातोतीव विवेकवान्।

प्राज्ञः प्राज्ञजनावासः शूरः परमरूपवान्॥ २०॥

रट्टनामाभवत्तस्माद्राजा पुण्यवतां वरः।

नीतिज्ञो नीतिशास्त्रार्थवृद्धसेवी जितेन्द्रियः॥ २१॥

परमभट्टारकमहाराजाधिराजसत्याश्रयदेवानुध्यातमाण्डलिकश्रीरट्टराजः सर्व्वानिव स्वसंबध्यमानपौरजानपदप्रधानामात्यवर्ग्गमाहूय संबोधयत्यस्तु वः संविदितं यथान्तर्लीनजरापूतनारब्धग्रासं यौवनं निरयपतनमिवेष्टवियोगदुःखं व्याधिजरामरणसाधारणं च शरीरकं पवनचलकमलदलगतजललवसदृशी धनायुषी मत्वा दानफलञ्च विवेकबुध्या। उक्तं च मुनिभिः।

अग्नेरपत्यं प्रथमं सुवर्ण्णम्

भूर्वैष्णवी सूर्यसुताश्च गावः।

लोकत्रयं तेन भवेद्धि दत्तं

यः कांचनं गां च महीं च दद्यात्॥ २२॥

इति मुनिवचनमवधार्य पित्रोरुद्देशेनात्मनश्च श्रेयसे शकनृपकालातीतसंवत्सरान्तर्गतनवशतेषु त्रिंशदधिकेषु प्रवर्त्तमानकीलकसंवत्सरान्त-

र्गतज्येष्ठपौर्णमास्यां श्रीमदव्वेश्वरदेवपञ्चोपचारपूजापुरस्सरखण्डस्फुटित-संस्काराद्यर्थं सतपस्विभोजनाच्छादनच्छात्रविद्वज्जनाभ्यागताद्युपयोगार्थञ्च कूष्माण्डीग्रामस्तस्याघट्टनानि कथ्यन्ते। पूर्व्वतो मणिग्रामप्रपा दक्षिणतो वापरवटग्राममार्ग्गः। पश्चिमतः सचान्दलकपित्थग्रामवाहला। उत्तरतः क्षारनदी तथाऽसनवीरग्रामस्तस्य पूर्व्वतो धारवाहला। दक्षिणतः कारपवर्णीग्रामनदी। पश्चिमतः समुद्रः। उत्तरतो गवहणग्रामनदी। तथा वडङ्गुलग्रामस्तस्य पूर्व्वतो भोगदेवपर्व्वतयमलप्रस्तरो दक्षिणतोऽखड-दवाहला। पश्चिमतः पटसडपाषाणः उत्तरतः स्तामान-ग्रामसीसवीपर्व्वतः॥ ४॥ तथा देवलक्ष्मीग्रामे जीवलोकः। १। व्यङ्गरुले चाकान्तरः १। सय्यापल्यां जूहकः १। तदेतद्ग्रामत्रयादिकं चतुराधाटविच्छिन्नं सर्वराजकीयायाभ्यन्तरसिद्धमचाटभटप्रवेशं पूर्व्वदत्त-देवदायब्रह्मदायवर्ज्जं श्रीमत्तमयूरान्वयकर्क्करोणीसंततिप्रसूतविद्वद्ब्रह्मचा-र्याचार्यभोग्यमाचंद्रार्कं पालनीयम्। श्रीमन्मत्तमयूरान्वयान्तर्गतकर्क्करो-णीसंतानगुरुक्रमायातसिद्धान्ततत्त्वार्कापहृतमोहान्धतमसानां तपोमहि-मप्रध्वस्ताशेषसङ्गानां प्रबोधप्रदीपप्रकाशितस्वर्गापवर्गमार्गाणां समाधि-जयलब्धत्रिभुवनकीर्त्तीनां श्रीमदम्भोजशम्भुगुरूणां चरणकमलान्तर्लीन-मधुलिड्भ्यः श्रीमदात्रेयविद्वद्गुरुभ्यो विद्यादानस्वरूपेण समदाम्। तथा द्वीपान्तरायातवहित्रात्स्वर्ण्णगदियाणं १ चेमूल्यचन्द्रपुरवर्ज्जकन्दलमूली-यायातप्रवहणात्स्वर्ण्णधरणं दारिकाकुटुम्बानि च। तैलिककुटुम्बमेकं १ मालाकारकुटुम्बं १ कुम्भकारकुटुम्बं १ रजककुटुम्बं १। दुर्गाभ्यन्तरे च जगतीपुरार्थं भूमिं तस्याघट्टनानि कथ्यन्ते। आपूर्व्वतो वसतिप्राकारो

दक्षिणतो मर्कटगोपुरं पश्चिमतः शीवटमार्ग उत्तरतो मार्गकूपः॥ दुर्ग्गाद्वहिश्च पुष्पवाट्यर्थं पूर्व्वप्रसिद्धवडवाभुवम्॥ तदयं धर्म्मो मामकीन आत्मनीनैः भाविभिर्नरेन्द्रैरनुपालनीयः। उक्तञ्च मुनिभिः।

यानीह दत्तानि पुरा नरेन्द्रै

र्द्दानानि धर्म्मार्थयशस्कराणि।

निर्म्माल्यवान्तप्रतिमानि तानि

को नाम साधुः पुनराददीत॥ २३॥

बहुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः।

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥ २४॥

सद्यो दानं निरायासं सायासं दीर्घपालनम्।

अत एवर्षयः प्राहुर्दानाच्छ्रेयोनुपालनम्॥ २५॥

दत्त्वा भूमिं भाविनः पार्थिवेन्द्रान्

भूयो भूयो याचते रामभद्रः।

सामान्योयं धर्मसेतुर्नृपाणां

काले काले पालनीयो भवद्भिः॥ २६॥

यस्त्वेवमभ्यर्थितोपि कलिकालमुषितमनस्कः पुरातनधर्म्मदायलुप्तिं करिष्यति स एव निरयफलमनुभविष्यति। उक्तं च।

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम्।

षष्टिं वर्षसहस्राणि विष्ठायां स कृमिर्भवेत्॥ २७॥

षष्टिं वर्षसहस्राणि स्वर्ग्गे तिष्ठति भूमिदः।

आच्छेत्ता चानुमन्ता च तान्येव नरकं व्रजेत्॥ २८ ॥

इति मुनिवचनान्यवधार्य समस्तागामिनृपतिभिः पालनधर्म्मफललोभ एव करणीयः। न पुनस्तल्लोपकलङ्कपरैर्भवितव्यम्। यथा चैतदेवम् तथा श्रीरट्टराजः स्वहस्ते स्वहस्तमारोपयति। स्वहस्तोयं मम श्रीरट्टराजस्य।

मुद्राशुद्धं क्रियाशुद्धं भुक्तिशुद्धं सचिह्नकम्।

राजस्वहस्तशुद्धं तु शुद्धिमायाति शासनम्॥ २९ ॥

शिवमस्तु ॥ सांधिविग्रहिकश्रीदेवपालसुतेन लोकपार्यनाम्ना

लिखितमिदम्॥

Summary

This inscription, engraved on a set of 4 copper-plates, consists 77 lines of well-executed and well-preserved writing. The plates were strung on a circular ring, which has soldered on to it an image of the mythical bird Garuḍa. He is represented as a man, with wings, squatting full front, with the hands clasped on the breast, and under the wing of his left shoulder is seen a hooded serpent, the head projecting from behind. This record, written partly in verse and partly in prose, registers the royal grant of certain villages and certain tax amount levied on vessels arriving from out side, made in favour of a Śaiva ascetic.

After the initial verse in praise of Śiva, the inscription glorifies the Rāshṭrakūṭa family and gives, in vv.38 the following well-known genealogy of that family- Dantidurga; his uncle Kṛishṇa I; Gōvinda II; Nirupama (Dhruva); Jagattuṅga (Gōvinda III); his son Amōghavarsha (I); Akālavarsha (Kṛishṇa II); his grandson

Indra (III); his son Amōghavarsha (II); his younger brother Gōvindarāja (IV); his uncle Baddiga (Amōghavarsha III); his son Kṛishṇarāja (III); his brother Khōṭika, and finally his nephew Kakkala. Vv. 9 and 10 then tell us that, having defeated Kakkala, Tailapa of the Chālukya lineage became king, and that he was succeeded by his son Satyāśraya; and a short prose passage in line 20-21 intimates that this grant of Raṭṭarāja's was made while king Satyāśraya was ruling over Raṭṭapāḍi, *i.e.* the dominions of the Rāshṭrakūṭas. These genealogies of the Rāshṭrakūṭa and Later Chālukya kings are as in genuine Rāshṭrakūṭa and Chālukya records.

The genealogy of Raṭṭarāja of the Śilāra family is given in vv.11-21. The royal family is said to have descended from the Vidyādhara prince Jīmūtavāhana, son of Jīmūtakētu. The first prince Saṇaphulla is said to have become the lord of the country extending from the ocean to the Sahya mountain by the favour of Kṛishṇa (I). His son was Dhammiyara, the founder of the great fortified city of Balipattana.[1] Then flourished Aiyapa, who was crowned with the water of cocoanuts at Chandrapura.[2] Thereafter, there was Avasara (I). His son was Ādityavarman, from whom was born Avasara (II), who rendered help to the rulers of Chēmūlya[3] and Chandrapura. He was followed by Bhīma, who annexed Chandramaṇḍala. He was succeeded by Avasara (III), who was followed by Raṭṭarāja, the reigning king.

The inscription refers to Raṭṭarāja as the Māṇḍalike of the *Paramabhaṭṭāraka Mahārājādhirāja* Satyāśraya, the later Chālukya king mentioned above. It records the grant, by Raṭṭarāja, of the three villages *viz.*,

Kūshmāṇḍī, Asanaīra and Vaḍaṅgula to his learned preceptor Ātrēya who was a disciple of the Śaiva ascetic Ambhōjaśambhu of the Karkarōṇī branch of the Mattamayūra clan, for the purpose of worshipping with five-fold offerings the holy god Avvēśvara and keeping his temple in proper repair, and of providing food and raiment to ascetics and for the use of disciples, learned men and visitors. As many as 6 villages, 2 rivers and a salt river (*kshāra-nadī*), a water course (*vāhalā*) and 2 hills are mentioned in connection with the boundaries of these three donated villages.

In addition to these, a *jīvalōka*[4] at the village of Dēvalakshmī, a *chākāntara*[4] at Vyaṅgarula[5] and a *jūhaka*[4] at Sayyāpalī were also given for the same purpose.

It is stated that the temple of Avvēśvara, referred to above, had been probably built by Raṭṭarāja's father Avasara III, who apparently named the god after himself. We are further told in this inscription about some additional gifts, *viz.*, a *gadyāṇa* of gold from every vessel coming from foreign lands, and a *dharaṇa* of gold from every ship coming from Kandalamūlīya, excepting Chēmūlya and Chandrapura; and also about the settlement of families of female attendants (*dēvadāsīs*), oilmen, gardners, potters and washermen, and also some land within the fort, the boundaries of which are specified. It seems that the temple was situated within the fortified capital of Balipattana. The scribe was Lōkapārya, son of the *Sāndhivigrahika* Dēvapāla.

The inscription is dated in the Śaka year 930, the cyclic year being Kīlaka. This date corresponds to Saturday, the 22nd May, 1008 A.D.

This inscription, together with the Paṭṭankuḍi plates of Avasara II, (*USVAE.*, VII, No.62), helps to arrive at the correct genealogy of the Śilāhāra rulers of South Kōṅkaṇ.

Ambōjaśambhu, whose disciple Ātrēya received the present grant, is said to have belonged to the Karkarōṇī branch of Mattamayūra clan. Mattamayūra was a celebrated centre of Śaivism in that period. The Āchāryas of this place belonged to the Śaiva, as distinguished from the Pāśupata, school of Śaivism. Their names like that of Ambhōjaśambhu of the present plates, ended in *śiva* or *śambhu* as those of the Pāśupatas ended in *rāśi.* Mattamayūra was probably the ancient name of Kadwāhā in Central India. Ambhōjaśambhu seems to have come to South Kōṅkaṇ from that distant place in Central India.

The record contains as many as 7 benedictory and imprecatory stanzas and a verse (27) about an authoritative charter.

Notes

1. Balipattana is probably the ancient name of modern Khārēpāṭaṇ. (*CII.*, VI, p.187)

2. Chandrapura is Chāndor on the Parodā river, south of Gōa (*ibid.*).

3. Chēmūlya is Chaul in the Kolaba District about 30 miles south of Bombay (*ibid.*).

4. The three words, *viz., Jīvalōka, Chākāntara,* and *Jūhaka* have been explained by Sircar as 'a village institution of uncertain meaning' (*IEG.*, pp.64, 136 and 137).

5. Vyangarula may be modern Vēṅgurlē in the Ratnagiri District (*CII.*, VI, p.187).

****

No.27
BALIPATTANA PLATES OF RATTARAJA
SAKA YEAR 932

Location	: Balipattana (Khārēpāṭaṇ), Ratnagiri District, Maharashtra
Date	: Śaka year 932=1010 A.D.
Script	: Nāgari
Language	: Sanskrit
King	: Raṭṭarāja
Dynasty	: Śilāhāras of South Kōṅkaṇ
Reference	: Mirashi, V.V., *CII.*, VI, pp.193-199; No.42

Text

Metre: Vv. 1 *Āryā;* 2-12, 14, 16-18 *Anushṭubh;* 13 *Indravajrā;* 15 *Śālinī*

सिद्धम्। स्वस्ति।

श्रीरपिविपुलास्तादभिमतदेवताप्रसादेन।

संसारसारधर्म्मक्रियावतां प्राणिनां सततम्॥ १॥

आसीद्विद्याधराधीशोगरुत्मद्दत्तजीवितः।

जीमूतकेतोः सत्पुत्रो नाम्ना जीमूतवाहनः॥ २॥

ततः सिलारवंशोभूत्सिंहलक्ष्माभृतां वरः।

प्रभूतभूतसौभाग्यभाग्यवांस्तत्र चोर्ज्जितः॥ ३॥

नाम्ना सणफुलः ख्यातः कृष्णराजप्रसादवान्।

समुद्रतीरसह्यान्तदेशसंसाधको नृपः ॥ ४ ॥
तत्सुतो धर्म्म एवाभून्नाम्ना धम्मियरः परः।
प्रतापवान्महादुर्ग्गबलिपत्तनकृत् कृती ॥ ५॥
तस्मादैयपराजोभूद्विजिगीषुगुणान्वितः।
स्नातश्चन्द्रपुरासन्ननालिकेराम्बुना स यः ॥ ६ ॥
बभूवावसरस्तस्मान्नीतिशास्त्रार्थतत्त्ववित्।
एकनेत्रप्रदग्धारिकाण्डश्चण्डपराक्रमः ॥ ७ ॥
आदित्यवर्म्मा पुत्रोभूत्तेजसादित्यवत्ततः।
तस्मादवसरार्योभूज्जितारिर्द्धर्म्मवान्नृपः ॥ ८ ॥
चेमूल्यचन्द्रपुरजक्ष्माभृत्साहाय्यकारकात्।
ततोभवदिन्द्रराजस्त्यागभोगातिसुन्दरः ॥ ९ ॥
तस्मात्प्रभूतभाग्योभूद्भीमो भीमाभविक्रमः।
तेजसा राहुवद्ग्रस्तचन्द्रमण्डल उज्ज्वलः ॥ १० ॥
ततश्चावसरो राजा जातोतीवविवेकवान्।
प्राज्ञः प्राज्ञजनावासः धीरः परमरूपवान् ॥ ११ ॥
रट्टनामाभवत्तस्माद्राजा पुण्यवतां वरः।
नीतिज्ञो नीतिशास्त्रार्थवृद्धसेवी जितेन्द्रियः ॥ १२ ॥

तस्य महामाण्डलिकश्रीरट्टार्यराजराज्ये चन्द्रार्कप्रवर्द्धमानपूज्ये श्रीबलि-पत्तने ॥ पञ्चमहामठस्थाननगरहञ्जमानप्रधानामात्यवर्ग्गमाहूय रट्टराजः सम्बोधयति। अस्तु वः संविदितम् ॥ शकनृपकालातीतसंवत्सर-

नवशतेषु द्वात्रिंशदधिकेष्वङ्कतोपि ९३२ साधारणसंवत्सरान्तर्गत पुष्यबहुलप्रतिपदि रविवारे उत्तरायणसंक्रान्तौ समस्तराजावलीसमलङ्कृतश्रीरट्टराजेन स्वहस्तेन हस्तोदकं कृत्वा ब्राह्मणसेणावइनागमैयसुतसङ्कमैयस्य कल्वालभक्तग्रामाद्वाइङ्गणक्षेत्र . . . . स्तस्याभिधानम्। जवलरा . . च वलोठी अत्र उभयतः जपतनभ . . . राषट्कमर्यादाः। अन्यच्च। अग्रहारपलउरेग्रामात्पश्चिमायामावडि नाम वाडी तत्र संझैयनामब्राह्मणस्तस्य नघृ कुंवरैयस्य च छाठव्वैयनामा ब्राह्मणस्तेन च स्वकीयनत्तिका अन्नणा स्वरूपेण श्रीमारसह पूगस्थली जीवलोको दत्तस्तस्य मर्यादाः। पूर्व्वतः पाषाणदेउली। दक्षिणतः नदी। पश्चिमतः वोरिभाठसमीपसमुद्रः। उत्तरतः गावोम। इति सुप्रसिद्धमर्यादाविशुद्धः। श्रीरट्टराजपुत्रपौत्रैः एतच्च पुत्रपौत्रेभ्यः नमस्यरूपेण सर्व्वपरिहारान्परिहत्य प्रतिपालनीयम्। एतदपहरणे महान्दोषः संपद्यते॥ उक्तञ्च मुनिभिः।

यानीह दत्तानि पुरा नरेन्द्रै
र्दानानि धर्म्मार्थयशस्कराणि।
निर्म्माल्यवान्त प्रतिमानि तानि
को नाम साधुः पुनराददीत॥ १३॥
बहुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥ १४॥
सामान्योयं धर्मसेतुर्नृपाणां
काले काले पालनीयो भवद्भिः।

सवनितान्भाविनः पार्थिवेन्द्रान्

भूयो भूयो याचते रामभद्रः ॥ १५ ॥

यस्त्वेवमभ्यर्त्थितोपि कलिकालमुषितमनस्कः पुरातनधर्म्मदायलुप्तिं करिष्यति स एव निरयफलमनुभविष्यति ॥ उक्तं च ।

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।

षष्टिं वर्षसहस्राणि विष्ठायां स कृमिर्भवेत् ॥ १६ ॥

षष्टिवर्षसहस्राणि स्वर्ग्गे तिष्ठति भूमिदः ।

आच्छेत्ता चानुमन्ता च तान्येव नरकं व्रजेत् ॥ १७ ॥

इति मुनिवचनान्यवधार्य समस्तागामिनृपतिभिः पालनधर्म्मफललोभ एव करणीयः । न पुनस्तल्लोपकलंकपरैर्भ्भवितव्यम् ॥ यथा चैतदेवम् श्री-रट्टराजः स्वहस्ते स्वहस्तमारोपयति । स्वहस्तोयं मम श्रीरट्टराजस्य ।

मुद्राशुद्धं क्रियाशुद्धं भुक्तिशुद्धं सचिह्नकम् ।

राजस्व हस्तशुद्धंतु शुद्धिमायाति शासनम् ॥ १८ ॥

सान्धिविग्रहिकश्रीदेवपालार्यसुतेन लोकपार्यनाम्ना लिखितमिदमिति ॥ मंगलं महाश्रीः ॥ ॥ अलं हरणेन दानपट्टस्य ।

Summary

This inscription, engraved on a set of 3 copper-plates, consists 96 lines of well-executed and well-preserved but carelessly written writing. The plates are strung on a circular ring which has soldered on to it the image of Garuḍa, who is represented as a man squatting with his hands clasped on the chest. The inscription is composed partly in verse and partly in prose. There is an

admixture of Marathi words here and there. The grammatical construction is faulty in several places. This inscription records certain gifts made by Raṭṭarāja to a Brāhmaṇa.

The inscription refers itself to the reign of the *Mahāmāṇḍalike* Raṭṭarāja of the Silāra (Śilāhāra) family. Unlike his Khārēpāṭaṇ plates (No.26 above), it does not give in the beginning the genealogy of the Rāshṭrakūṭas, nor does it mention any Chālukya suzerain of the Śilāhāra king, though it was issued only two years later. It gives the genealogy of the Śilāhāras exactly as in the Khārēpāṭaṇ paltes, all the verses being repeated, of course with minor variations at a few places. Raṭṭarāja called himself Māṇḍalika in the Khārēpāṭaṇ plates, and described himself as meditating on the feet of the later Chālukya king Satyāśraya, who is mentioned with Imperial titles therein. Here the name of the suzerain is omitted, and Raṭṭarāja is seen to have assumed a higher title, *viz., Mahāmāṇḍalika.*

The inscription was issued from Balipattana,[1] which was evidently the capital of Raṭṭarāja. It is dated in the Śaka year 932, on the occasion of the Uttarāyaṇa Saṅkrānti, which fell on Sunday, the 1st tithi of the dark fortnight of Pushya (*i.e.* Pausha), the cyclic year being Sādhāraṇa. This date corresponds to the 24th December 1010 A.D.

The object of the inscription is to record certain gifts made by Raṭṭarāja to Saṅkamaiya, son of the Brāhmaṇa Nāgamaiya. No information about the *gōtra* or the Vedic learning, *etc.* of the donee is given, but his father Nāgamaiya is called *Sēṇāvaï*[2] (*Skt. Sēnāpati?*).

So the gift seems to have been made for some consideration other than religious. The things donated were (1) a rice-field, yielding two crops annually (known as *vāiṅgaṇa* in Koṅkaṇ) in the rice-village (*bhaktagrāma*) Kalvāla, and (2) an areca-nut orchard in the hamlet Āvaḍi, west of the *agrahāra* village Palaüre̅.

The royal order in respect of the gift mentioned above was addressed to the residents of the five great *Maṭhas,* guilds, artisans and the chief Amātyas. The inscription closes with the same benedictory and imprecatory verses and the verse about an authoritative charter as occur in the Khārēpāṭaṇ plates, whose writer Lōkapārya also wrote the present charter.

Notes

1. Balipattana is probably identical with modern Khārēpāṭaṇ (*CII.,* VI, p.195).

2. Perhaps Sēṇāvaï is modern Śēṇavi, a Brāhmaṇa sub-caste noticed in Koṅkaṇ (*ibid.,* p. 194, *n.* 1).

****

No.28

MIRAJ PLATES OF MARASIMHA: SAKA YEAR 980

Location	: Miraj, Kolhapur Distrcit, Maharashtra
Date	: Śaka Year 980 = 1058 A.D.
Script	: Kannaḍa
Language	: Sanskrit
King	: Mārasiṁha
Dynasty	: Śilāhāras of Kolhāpur
Reference	: Mirashi, V.V., *CII.*, VI, pp.200-206; No.43

Text

Metres: Vv. 1, 4, 12, 14 *Āryāgīti;* 2, 5 *Śārdūlavikrīḍita;* 3, 9, 23 *Mahāsragdharā;* 6 *Indravajrā;* 8, 10 *Āryagīti and Gīti;* 11, 17, 22 *Sragdharā;* 13, 16 *Gīti;* 15 *Bhujaṅga-prayāta;* 18-21, 24, 25, 27 *Anushṭubh;* 26 *Śālinī*

सिद्धम्।

जयतु जगत्त्रयनाथः

सकळकळाज्ञानध्यानदक्षितयः।

फणिपतिविभूषणाङ्गः

कपिळजटाजूटमण्डनश्शंभुः ॥ १ ॥

स्वस्ति श्रीसियळारवंशतिलको जीमूतवाहान्वय

प्रस्तारप्रभवः सुवर्ण्णगरुडव्याळोळ्ळीळाध्वजः।

विस्तीर्ण्णार्ण्णवमेखळावनिवधूकान्तो महीमण्डळ

प्रस्तुत्यो मळयंकसर्प्पनृपतिः श्रीराजविद्याधरः ॥ २ ॥

S.No. 6 - Inscription No. 28

Miraj Plates of Marasimha; Saka Year 980

अरिभूभृच्चक्रवक्रस्तगरनगरभूपाळकस्तीव्रतेजाः

स्थिरवाक्यश्शौर्य्यशाली नगवरवरपन्नाळदुर्ग्गाद्रिसिंहः ।

स्फुरितोद्यत्कीर्त्तिकान्ताक्षितिमहितमहामण्डळीकाधिनाथः

धरणीरक्षाक्षमः श्रीजतिगनरपतिस्तस्य सूनुः प्रचण्डः ॥ ३ ॥

अरिबळसर्प्पः पार्त्थिवपुरन्दरः खचरवंशचूडारत्नम् ।

खरकरसमप्रभः समग्ररङ्गप्रणयिमाण्डळीकनिधानः ॥ ४ ।

गंजामग्रमुदीर्य्य वैरिनिकरस्यात्मीयतात्रासिना

भुंजानः करहाटकुण्डिविषयं स्वांगीकृतं सर्व्वदो ।

मैरिंजेशमुदग्रकोंकणमहादेशं निजत्रासना

द्भुंजन् नित्यमुदारवीरनृपतिः श्रीगोंकराजोत्तमः ॥ ५ ॥

तस्यानुजोभून्नृपनीतिविद्यः हास्यं न कृद्वण्डगुणे रणे वा ।

लास्यं विधाने नृपगूहलांकः सत्याश्रयस्य क्रमपूजनेष्टः ॥ ६ ॥

रिपुबळसर्प्प मण्डळिकभैरव

वारणवाजिसाधनाधिप जिनवश्यतंत्र ।

नवराज्यसमुद्धरणारिवर्ग्गनिष्कृप

नृपवीरसकिळिगिळाचळदुर्ग्गसमग्र ।

भूरिभूमिप नवसाहसांकमरिराजमनोरुजसुग्रपुरुषम् ॥ ७ ॥

पूर्व्वोक्तगोंकराजः सर्व्वगुणोपेतलक्षणस्तस्य सुतः ।

सर्व्वज्ञभक्तिभुवनाशीर्व्वदपुरस्सरो महामहिमा ॥ ८ ॥

बळवद्विद्विष्टसैन्यक्षयकरपरिपूर्णासिहस्तं दरिद्रा

खिळदीनानाथवन्दिप्रकरमुदकरोद्दानहस्तम् सुरेंद्रा
चळलीलाकारदेवायतनकरलसद्धर्म्महस्तं महोर्व्वी
तळभारोद्धारहस्तं त्रिभुवनतिळकं मारसिंहाग्रहस्तम् ॥ ९॥
माराकारशरीरः वीरारिमदान्धगन्धसिन्धुरसिंहः।
शूरप्रतापनिळयः सारगुणोदारमारसिंहनृपः ॥ १०॥
रेवन्तो वत्सराजो वरतुरगचयारूढरेखाविशुद्धौ।
भीमो भीमप्रतापे निजभुजविजयी राजनीतिप्रवीणः।
कामो रूपप्रसन्ने धवळविमळदिग्वर्त्तिकीर्त्तिप्रतानः।
रामाद्यादिक्षितिपचरितो मारसिंहावनीशः ॥ ११॥

समधिगतपंचमहाशब्दमहामण्डळेश्वर तगरपुरवराधीश्वर श्रीशिळाहार-नरेंद्र जीमूवाहनान्वयप्रसूत सुवर्ण्णगरुडध्वज मरुवंकसर्प्प गोंकनंककार गूहेयनसिंह रिपुमण्डळिकभैरव विद्विष्टगजकण्ठीरव इडुवरादित्य रूपनारायण कलियुगविक्रमादित्य तुरगरेवन्त कामिनीकामदेव श्रीमहालक्ष्मीलब्धवरप्रसादादिसमस्तराजावळीसमळंकृतमहामंडळिकश्री मारसिंहदेवः। निजराजधानीश्रीखिळिगिळदुर्ग्गे। सुखसंकथाविनोदेन राज्यं कुर्वंस्तिष्ठत्यवसरे।

श्रीसिंहस्पर्शार्ज्जितपाशुपतागमकृताभिनवभुवनार्घ्या।
वासितमुदुनीरो लेमेलीशार्प्पितसन्ततिप्रकाशमुनीशः ॥ १२॥

दूरो दुरन्तदुरिता दाराध्यस्सकळभुवनमनुजानाम्।
धीरस्तपःप्रभावे मारास्त्रजयी विमुक्तसंसारः ॥ १३॥
ब्रह्मा कलासु बालब्रह्मसुचारी महेश्वरांघ्रिध्यानः।

जिह्मारहितस्सुमार्ग्गी ब्रह्मेश्वरपण्डितो मुनिर्ज्जयतु ॥ १४ ॥

तदीयाग्रशिष्यस्समस्तागमज्ञः मदक्रोधलोभादिदोषप्रदूरः

सुदृष्टस्सुवृत्तस्सुधर्म्मप्रदीपः पदार्त्थप्रवीणो मुमुक्षुप्रधानः ॥ १५ ॥

श्रीमलेयाळो देवः तस्य महाशिष्यजनपतिस्तुत्यः ।

श्रीमन्मिरिंजनगरस्या स्यांबुजमण्डनो मुमुक्षुनिधिः ॥ १६ ॥

कर्म्मारातीभकुंभप्रहरजपनखानीकदुर्व्वारसिंहः

धर्म्माभोजप्रकाशत्करपरिणतसिद्धान्तनित्योदयार्क्कः ।

कूर्म्माधारप्रशस्ताचरणकरणपादांबुजासेवभृंगः

निर्म्मोहो निष्कळंको निरतिशयतपः श्रीयुतश्चिक्कदेवः । १७ ॥

दानधर्म्मतपःशीलो । ब्रह्मचर्य्यव्रतादिषु ।

चिक्कदेवसमो नास्ति । न भूतो न भविष्यति ॥ १८ ॥

शकनृपकाळातीतसंवत्सरशतेषु । अशीत्यधिकनवशतेष्वंकेषु । प्रवर्त्तमान बिलंबसंवत्सरे । पौषमासस्य शुद्धपक्षे । सप्तम्यां बृहस्पतिवारे । उदगयनपर्व्वणि । पादौ प्रक्षाल्य । धारापूर्व्वकं च । सहस्रत्रितयमिरिंजदेशाभ्यन्तरे । सिरिवोळळचतुर्विंशतिमध्ये । कृष्णावेण्णानदीदक्षिणतटे । पूर्व्वदक्षिणपश्चिमत्रिदशाभागसमावासित । कन्नवाड । हाडलिवाडगाळिकुट्टि । एतेषां पार्श्ववर्त्तिग्रामाणां मध्ये । चतुराघाटसमेत । संस्थितः कुंटवाडनामग्रामः ।

तेन श्रीराजपुत्रेण तस्मै दिव्यतपस्विने ।

स ग्रामश्चार्पितो भक्त्या यत्स्वाम्यं तत्समस्तकम् ॥ १९ ॥

मिरिंजपुरबाहिर्य्ये शिवायतनपंचकम् ।

मारसिंहमहीशेन कृतं तत्कीर्त्तिशासनम् ॥ २० ॥

तदायतनसंबन्धः तद्ग्रामस्तत्र तापसः ।

पूर्व्वाश्रये भवेद्विप्रः इत्याश्रयस्य नैष्ठिकः ॥ २१ ॥

खारंकर्य्ये सुशौचे जपनियमसमाधानसंपन्नशीळे ।

मौनानुष्ठानयुक्ते शमदमनिलये ब्रह्मचर्य्ये सुधैर्य्ये

स्वाध्यायध्यानधाने हरचरणयजे तत्त्ववित्त्वे सुयोगे ।

नित्यं संध्यास्तवैतत्परिणतमुनयस्तत्र तिष्ठंति नान्ये ॥ २२ ॥

परमश्रीकामिनीकेतनममळवचःश्रीरमावासमुग्रा

चरणभ्राजत्तपःश्रीविलुळितवरकान्ताळयं नित्यसत्त्रा ।

करदानश्रीसतीसंपदमखिळयशः श्रीवधूनीडमित्थं

करशोभापूतपंचायतनमनुपमं चिक्कदेवेन पूज्यम् ॥ २३ ॥

बहुभिर्व्वसुधा भुक्ता राजभिस्सगरादिभिः ।

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ २४ ॥

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।

षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ॥ २५ ॥

सामान्योयं धर्म्मसेतुर्नृपाणां काळे काळे पाळनीयो भवद्भिः ।

सर्व्वानेतान् भाविनः पार्थिवेन्द्रान् भूयो भूयो याचते रामभद्रः ॥ २६ ॥

आदेशादात्मभूपस्य । भूपाळसचिवोत्तमः ।

लिखितं शासनं तेन चिक्कदेवस्तु लब्धवान् ॥ २७ ॥

Summary

This inscription, engraved on a set of 3 copper-plates, consists 68 lines of elegantly executed and well-preserved writing in Kannaḍa alphabet. The author of this charter had little command over Sanskrit language. He has used several obscure words and his formation of sentences is irregular and in many places the meaning is uncertain. He has used Kannaḍa words, especially in stating the *birudas* of the ruling king. This inscription records the grant, by the Śilāhāra king Mārasiṁha, of a village to a Pāśupata ascetic.

The inscription refers itself to the regin of the Śilāhāra king Mārasiṁha, ruling over Kolhāpur and the surrounding country. He bears several birudas, *viz., Samadhigatapaṁchamahāśabda, Mahāmaṇḍaḷēśvara, Tagarapuravarādhīśvara, Śrī-Śiḷāhāranarēndra, Jīmūtavāhanānvayaprasūta, Suvarṇagaruḍadhvaja, Maruvaṁkkasarppa, Gōṁkanaṁkakāra, etc.,* the last one being *Śrī-Mahālakshmīlabdhavaraprasāda.* These *birudas* were continued by his successors, but some like *Gōṁkanaṁkakāra* are noticed in this record only. The description of this king is otherwise quite conventional. The record mentions his grandfather Jatiga (II), his father Gōṅka, and uncle Gūhala. Gōṅka is described as the ruler of Karahāṭa[1] and Kuṇḍi[2] *vishaya,* Miriñja-dēśa[3] and Kōṅkaṇa–mahādēśa. Mārasiṁha was residing in his capital of the Khiḷigila[4] fort at the time of this grant.

The object of the inscription is to record the grant, by Mārasiṁha, of the village Kuṇṭavāḍa,[5] situated on the southern bank of the Kṛishṇavērṇā[5] and bounded on the east, south and west by the villages Kannavāḍa,

Hāḍalivāḍa and Gāḷikuṭṭi. These places were included in the territorial division of Sirivōḷaḷa[5]-24 in the Mirin̄jadēśa-300. The donee was the ascetic Chikkadēva, who was a disciple of the Pāśupata Paṇḍita Brahmēśvara. The purpose of the grant seems to have been to provide for the worship of the *pan̄chāyatana* at Mirin̄ja by Chikkadēva. This Śiva *pan̄chāyatana* was a royal memorial created by Mārasiṁha himself. The grant was made on the occasion of the Uttarāyaṇa Saṅkrānti which occurred on Thursday, the 7th tithi of the bright fortnight of Pausha in the Śaka Year 980, when the cylcic year was Vilamba. These details of the date correspond to the 24th December, 1058 A.D.

Brahmēśvara Paṇḍita, the teacher of the donee is said to have acquired the knowledge of the Pāśupata *āgama* by the touch of the holy Siṁha (*Śrī-Siṁhaspars-ārjjitapāśupatāgama*);[6] and described as adorable to the people of all the worlds, as steadfast in austerities, as having conquered the god of love, as having given up the worldly life and so on. Chikkadēva, the donee himself is described as well-versed in *āgamas,* as free from blemishes such as lustful passion, anger and greed, as well-conducted and as a light showing the right *dharma,* and so forth.

Verse 22 states that only seasoned ascetics – and none other – could observe the practices of Chikkadēva, such as devotion to the sun, great purity, observance of prayers, vows and contemplation, *brahmacharya* (celibacy) charterised by tranquility, *etc.* The next verse states that the *pan̄chāyatana* was to be worhsipped by Chikkadēva.

Notes

1. Karahāṭa is modern Karhāḍ in Maharashtra (*CII.*, VI, p.201).

2. Kuṇḍi represents the region round Belagaum in Karnataka (*ibid.*).

3. Miriñja–dēśa evidently comprised the territory round modern Miraj (*ibid.*).

4. Khiḷigila fort is evidently identical with the fort of Panhāḷā (*ibid.*).

5. Kuṇṭavāḍa is the modern Kuṭwāḍ on the bank of the Kṛishṇā, ancient Kṛishṇavērṇā, about 2.5 miles east of Śiroḷ, corresponding to ancient Sirivōḷaḷa, the chief town of the territorial division of that name (*ibid.*).

6. Siṁha seems to have been Brahmēśvara Paṇḍita's guru, who, by the touch of his hand, trnasferred his knowledge to him. Such action is called *Śakti-pāta* (*ibid.*).



No.29

SAMGAMNER COPPER-PLATE INSCRIPTION OF YADAVA BHILLAMA II

Location : Saṁgamner, Ahmadnagar District, Maharashtra

Date : Śaka year 922=1000 A.D.

Script : Nāgarī

Language : Sanskrit

King : Bhillama II

Dynasty : Yādavas of Dēvagiri

Reference : Kielhorn F., *EI.*, II, pp. 212-221

Text

Metre: Vv. 1, 2, 7, 8, 11, 12 *Mālinī;* 3, 6, 17, *Śikhariṇī;* 4, 13 *Anushṭubh;* 5 *Vaṁśastha;* 9, 14-16 *Śārdūlavikrīḍita;* 10 *Śālinī*

ओं नमः शिवाय ।

स्वस्ति शकनृपकालातीतसंवत्सरशतेषु नवसु द्वाविंशत्यधिकेष्वंकतोपि संवत्सराः ९२२ ॥

त्रयमपि भुवनानामीषदुन्मेषमात्रा

त्प्रभवति लयशेषं यन्निमेषादुपैति ।

अतिशयितचरित्रो योगिनामप्यगम्यः

स इह जयतु देवः चारुचन्द्राङ्कमौलिः ॥ १ ॥

भुवनभवनहेतुः दुष्कृताम्भोधिसेतुः

विहितमदनमाथः पार्व्वतीप्राणनाथः ।

निहतमरुदरीशः पातु भिल्लममीशः
करतलकृतशूलः सर्व्वदा चन्द्रचूलः ॥ २ ॥
युगस्यादौशम्भुर्भुवनमसृजद्भव
न्मूर्त्तिस्त्रेधा सुररिपुविरिंचप्रभवतः ।
विरिंचेः संभूतः सकलमरुतां योनिरमलो
मरीचिर्यत्कीर्त्तिर्भ्रमति भुवने कुन्दविशदा ॥ ३ ॥ ।
अत्रिनामाभवत्तस्मात्सूनुस्सत्यपरायणः ।
तत्सूनुरिन्दुराख्यातो जगदानन्दमन्दिरम् ॥ ४ ॥
ततोभवन्निर्म्मलसोमवंशजो विशालभूपालगुणालयं हि यः ।
पुरूरवा भूपतिरर्द्धमासनं सदा सुरेन्द्रस्य बभाज लीलया ॥ ५ ॥
अभूदायुस्तस्मान्नृपतिरमरैर्व्वन्द्यचरितो
हठाक्रान्तारातिप्रणतचरणाम्भोजयुगलः ।
ततो जातो यस्मान्नघुषनृपतिर्ल्लांछनमिषा
ल्लिलेख स्वख्यां स्वभुजविजयी चन्द्रफलके ॥ ६ ॥
अजनि नघुषभूपाद्भूमिपालो ययाति
स्त्रिदशमहितकीर्त्तिर्व्वीरलक्ष्मीर्व्विलासः ।
किमिव गुणगणोसौ वर्ण्यते तस्य सान्द्या
ज्जगदवननिमित्तं यादवानां प्रसूतिः ॥ ७ ॥
अभवदिह ययातेः सज्जनानन्दकारी
यदुनृपतिरशेषाक्रान्तदायादचक्रः ।
सकलविबुधवृन्दैर्व्वन्दितोसौ मुरारि

र्ज्जगदवननिमित्तं यस्य वंशे प्रसूतः ॥ ८ ॥

एतस्माद्यदुवंशतः समभवद्भूपालचूडामणि

र्भूपालः कलिकालकल्मषलवैर्न्नालोकितो भूतले ।

ख्यातः सेउणचन्द्र एव सहसा नाम्ना निजेनाह्वय

द्यो लोकं निजमण्डलं च समदारातीभकण्ठीरवः ॥ ९ ॥

प्रख्यातोसौ सद्गुणैर्यो विशालः संग्रामोद्यद्दुर्द्दमारातिकालः ।

जातस्तस्मादष्टमोचन्द्रभालःसूनुः श्रीमान्धाडियप्पो नृपालः ॥ १० ॥

तदनु विबुधवृन्दानन्दसन्दोहसीमा

समदमदन . . मानिनीमानचौरः ।

असमस . . . . योरिकालानलोभू

त्तत इह . . रेन्द्रो भूतले भिल्लमाख्यः ॥ ११ ॥

ननुकिमिह कवीनां तस्य वर्ण्यं हि न स्या

त्कुमुदविशदकीर्त्तिर्भूतलेद्यापि यस्य ।

रुचिरकनकभासोद्भासिनोमाबबन्ध

प्रतिदिनमिहदेवः पट्टिकां सोमनाथः ॥ १२ ॥

तस्माज्जातः सुतो राजाराजा राजीवलोचनः ।

राजेव राजते योत्र प्रजानन्दकरः सदा ॥ १३ ॥

तस्माद्वन्दिगभूपतिः समभवद्भूपालचूडामणिः

यः सौभाग्यमहोदधिर्मृगदृशां कन्दर्प्पदर्प्पोद्धतः ।

राजा दीर्घभुजद्वयः पृथुलसद्वक्षस्स्थलः संगरे ।

क्रूरारिप्रमदेभदर्प्पदलनः श्रीकृष्णराजानुगः ॥ १४ ॥

श्रीघोरप्पमहानृपस्य दुहिता श्रीवोद्दियव्वाभिधा
शंभोः शैलसुतेव कैटभरिपोर्ल्लक्ष्मीरिव प्रेयसी ।
यस्यासीत्कुमुदावदातयशसः स्तूपायमानं यया
नामावेश्वरमीशवेश्म विहितं कैलासलीलाहरम् ॥१५॥

स्वेनारातिकरालकालरचनाचण्डासिदण्डेन यो
हत्वा मुञ्जमहानृपप्रणयिनीं संग्रामरंगांगणे ।
लक्ष्मीमम्बुधिमेखलावलयितक्ष्मावर्त्तिनीम्प्रापय
द्भूपश्रीरणरंगभीमभवने साक्षात्कुलस्त्रीव्रतम् ॥१६॥

अधिष्ठानं सिन्दीनगरमपरस्वर्ग्गवदिदं
सदा मूर्त्ता लक्ष्मीर्व्वसतिभवने यस्य मुदिता ।
मनः शम्भोः पादाम्बुरुहयुगले ध्याननियतं
यदोर्व्वंशे भूपाचरितमभवच्चारुमहसः ॥१७॥

हिमगिरिशिखरसदृशमिह राजति सुरपुरवर्त्मसंन्निभं हतपुरमथननियत-कैलासगिरिस्पृहमंशुमत्सप्रभम् ॥ पुंजितयश इवेन्दुकुन्दद्युति भूतलति-लकसुन्दरं विजयाभरणनाथाभिधमभिनवगिरिशमन्दिरम् ॥ समधिगत-पंचमहाशब्दमहासामन्तद्वारवतीपुरपरमेश्वरैकशंखध्वनिबधिरितदिगन्त-रालविजयतूर्यारवसंत्रासितजितरिपुसमूहविष्णुवंशोद्भवभवचरणाराधनै-कतत्परमनस्विनीमानोन्मूलनकन्दर्प्पदर्प्पोद्धतारातिनिषूदनसंग्रामराम-कंदुकाचार्यसेल्लविडेगविजयाभरणेत्यादिसमस्तराजावलीविराजजितश्री-मद्भिल्लमराजः ॥

अन्तःशून्यः कदलीगर्भवदसारः संसारः ।

व्याधिजरामरणसाधारणं शरीरम्॥

प्रबलपवनकम्पितनलिनीदलगततुषारतरले च धनायुषी यौवनं च। तथा च।

कृतत्रेताद्वापरयुगेभ्योऽत्यर्थं दानफलम्।

कलौ युगे पुनः शंसंति।

न तथा सफला विद्या न तथा सफलं धनम्।

यथा तु मुनयः प्राहुर्द्दानमेकं कलौ युगे॥

अग्नेरपत्यं प्रथमं सुवर्ण्णं भूर्व्वैष्णवी सुर्यसुताश्च गावः।

लोकत्रयं तेन भवेत्प्रदत्तं यः कांचनं गां च महीं च दद्यात्॥

आस्फोटयन्ति पितरः प्रवल्गन्ति पितामहाः।

भूमिदोस्मत्कुले जातः स नः सन्तारयिष्यति॥

भूमिदानं सुपात्रेषु सुतीर्थेषु सुपर्व्वणि।

अगाधापारसंसारसागरोत्तारणं भवेत्॥

धवलान्यातपत्राणि दन्तिनश्च मदोद्धताः।

भूमिदानस्य पुष्पाणि फलं स्वर्ग्गः पुरन्दर॥

इति पराशरवत्सकुत्साङ्गिरसगौतममनुयाज्ञवल्क्यमुनिवचनान्यवधार्य मया दृढतरविरक्तबुध्या मातापित्रोरात्मनश्च श्रेयोर्थिना हि मया ब्राह्मणानां ग्रामोदत्तः। श्रीसिन्दीनगरान्तःपाति। वाजिकाण्वशाखिने गौतमगोत्राय . . . होपाध्याय नारणैउपाध्यायसुताय तथा वाजिकाण्व-शाखाय कौण्डिन्यगोत्राय विद्याधरैआय श्रीधरैउपाध्यायसुताय तथा बह्वृचशाखाय भरद्वाजगोत्राय महलपैआय विद्वपैयसुताय तथा

वाजिमाध्यंदिनशाखाय कौण्डिन्यगोत्राय महलपैआय इन्दपैयसुताय तथा बह्वृचशाखाय देवपैयाय अल्लपैसुताय तथा छंदोगप्रभाकरदीक्षिताय तथा मैत्रायणीय वच्छपैयः तथा अन्ध्रपम्यणैयः तथा माध्यंदिन-गुहिसपैयः तथा च्छन्दोगग्गलः सोम्मैयसुतः तथा माध्यंदिनमहलपैयः तथा बह्वृचराजदौवारिकमहलपैयः तथा बह्वृचसंग्गलः तथा करहाटवप्पलः तथा वाजिकाण्वनिम्वैयः तथा बह्वृचनेवपैयः तथा बह्वृचशाखाय कौशिकगोत्राय विक्कपैयाय श्रीधरैसुताय तथा धोप्पलाय कौशिकगोत्राय बह्वृचशाखिने। तथा बह्वृचशाखाय अण्णलैयाय तथा बह्वृचशाखाय दन्दपैआय कालपैयसुताय तथा पौम्वदेवः अल्लपैसुताय। एवममीषां द्विजानां पितृपैतामहोपार्ज्जितं मातुलिङ्गीतटसमावासितं अर्ज्जुनोण्ढिकाग्रामं तथा लघु अर्ज्जुनोण्ढीग्रामलघुवव्वुलवेंद्र-ग्रामद्वयाभ्यंतरं सवृक्षमालाकुलं चतुःसीमापर्यन्तं साष्टादशप्रकृत्योपेतं वापीकूपतडागारामसहितं सतृणकाष्टपाषाणोपेतं सकलसमस्तोपेतं। ग्रामस्याघाटाः लिख्यन्ते। पूर्व्वतः संग्गमनगरं दक्षिणतः चिखलीग्रामः पश्चिमतः जम्वलेनिम्वग्रामः उत्तरतः वव्वुलवेद्रत्रिग्रामी। एवं चातुराघाटविशुद्धं सर्व्वाभ्यन्तरसिद्धया पुत्रपौत्रादिसंतत्योपेतानां चंद्रार्क्कं यावत्प्रतिपालनीयं। एवमन्वयजां बंधूनामपि भुञ्जानानां भोजयतां कृषतां कर्षापयतां वा यथेष्टं प्रतिदिशतां प्रतिदेश्यताम् केनापि स्वश्रेबाधा न करणीया। उक्तं च मुनिभिः॥

यानीह दत्तानि पुरा नरेन्द्रैर्द्धनानि धर्म्मार्थयशस्कराणि।
निर्माल्यमालाप्रतिमानि तानि को नाम साधुः पुनराददीत॥

बहुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः।

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥

सद्यो दानं निरायासं सायासं तस्य पालनम्।

एवं हि ऋषयः प्राहुर्दानाच्छ्रेयोनुपालनम्॥

दत्वा भूमिं भाविनः पार्थिवेन्द्रान् भूयो भूयो याचते रामभद्रः।

सामान्योयं धर्म्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः॥

इत्यर्थितोपि यः कलिकालवशाल्लोभाभिभूतो पूर्व्वदानमपहरिष्यति स पंचमहापातकैरुपपातकैर्युतो रौरवादिषु नरकेषु पच्यमानो दुष्कृतमनु-भविष्यति। तथा च व्यासभट्टारकः प्राह।

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम्।

स विष्ठायां कृमिर्भूत्वा कृमिभिः सह पच्यते॥

विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः।

महाहयो हि जायन्ते भूमिदानापहारकः॥

तडागानां सहस्रेण वाजिमेधशतेन च।

गवां कोटिप्रदानेन भूमिहर्त्ता न शुध्यति॥

इति महर्षिवचनान्यवधार्य आगन्तुकराजभिः धर्म्मलोपभयेन प्रतिपालनीयम्। मद्वंशजाः परमहीपतिवंशजा वा पापादपेतमनसो भुवि भाविभूपाः। ये पालयंति मम धर्म्ममिमं समग्रं तेषां मया विरचितोञ्जलिरेष मूर्ध्नि॥ शार्व्वरीसंवत्सरीयभाद्रपदामावास्यायाम् श्रीनासिकीय अरुणासंवेद्यमहीतीर्थे परमव्रतोपवासनियमयुक्तेन श्रीभिल्लममहाराजेन सूर्यग्रहणे ग्रामोयं प्रदत्तः। लिखितमिदं शासनपट्टं

स्थाननियमेन राजनियमेन च मया केशवैउपाध्यायेनेति ॥

यदक्षरं परिभ्रष्टं मात्राहीनं च यद्भवेत् ।

क्षंतुमर्हथ विद्वांसः कस्य न स्खलते मनः ॥

यदत्त्रोनाक्षरमधिकं वा तत्सर्व्वं प्रमाणमिति ॥

Summary

This inscription, engraved on a set of 3 copper plates, consists 116 lines of well-preserved writing. The plates are held together by a ring, bearing a Garuḍa seal. It is composed partly in verse and partly in prose in Sanskrit language, but the names of the Brāhmaṇas and the names of the writer are given in their vernacular forms. This composition contains several grammatical mistakes and omissions. The inscription is one of the *Mahāsāmanta* Bhillama II., and it is the earliest record, hitherto discovered, of the Yādava dynasty of Dēvagiri. It records the grant of a village to a group of Brāhmaṇas.

After the auspicious expression *ōṃ namaḥ Śivāya*, the inscription begins with the date, *viz.*, Śaka year 922, followed by two verses, one glorifying Śiva and the other invoking the god's blessing on Bhillama II, the donor of this grant (ll. 2-7). The genealogy of Bhillama II is given in ll. 7-47. Of these, ll.7-22 contain an account of the descent of the mythical prince Yadu, the reputed founder of the Yādava family. This mythical genealogy includes Brahmā, Marichi, Atri, Indu, Purūravas, Āyus, Naghusha and Yayāti. The first historical prince Sēuṇachandra, introduced in ll. 22-26, is said to have called his dominion (*maṇḍala*) and the people of it after himself. His son was the prince Dhāḍiyappa (ll. 26-28). After him came,

evidently his son, the prince Bhillama I, who is said to have provided the god Sōmanātha with a valuable head-dress (*paṭṭkā*) (ll. 28-33). And he again was succeeded by his son, the prince Rājan or Rāja.

Then it is stated in ll. 34-40 that from Rājan or Rāja sprang the prince Vandiga (the Vaddiga of the other plates), a great warrior, who was a follower or feudatory of the Rashtrakūṭa Kṛishṇa III, and that this Vandiga married the lady Voddiyavvā, the daughter of Dhōrappa, *i.e.* Nirupama, the brother of Krishṇa III. This lady is said to have built a Śiva-temple.

Vandiga was followed by his son Bhillama II, who is glorified for having in battle destroyed the fortune of the Paramāra prince Muñja, and for having thereby made the goddess of fortune to stay at the house of Raṇaraṅgabhīma, who was none other than Western Chālukya Tailapa. Bhillama II's residence was at Sindinagara where Lakshmī[1] incarnate always dwelt full of joy (ll. 40-45). A new Śiva-temple, called *Vijayābharaṇanātha*, described as the collected fame (*puṁjitayaśa*), is mentioned in ll. 45-47 without naming its founder. But basing on the fact that Bhillama II is given the title *Vijayābharaṇa* in l. 51 of the present grant it has been concluded that the Vijayābharaṇanātha- temple referred to above was erected either by himself or his wife.

The formal part of the grant, beginning with l.48, is in prose, but quotes a large number of benedictive and imprecatory verses in ll. 55-61, 89-98, 102-106 and 108-110; and another verse asking the reader's indulgence for

any clerical mistakes which the writing may be found to contain, is given in ll. 114-116.

Bhillamarāja is described in ll. 48-52 as a *Mahāsāmanta* or great feudatory who had obtained the *paṁachamahāśabdas*, the supreme lord of the city of Dvārāvatī (*Dvārāvatīpuravaraparamēśvara*), born in Vishṇu's family, eager to worship Śiva (*Bhavacharaṇārādhanaikatatpara*), *etc.* Of these titles, *Kandukāchārya* (a master in playing at ball), *Sellaviḍega*[2] and *Vijayābharaṇa* are interesting. Then ll. 52-61 contain a statement about vanity of mundane existence and transience of wealth, life and youth, and some stanzas in praise of charity. In ll. 62-64 the king, with his mind free from worldly attachment, and for the welfare of his parents and himself, is said to have given a village to certain Brāhmaṇas.

The names of the 21 donees are given in ll. 64-67. From l. 64 it would seem that they lived at Sindīnagara, which according to l. 43 was the place of residence of Bhillama(II), and which has been identified with the modern Sinnar in the Nasik District of Maharashtra. All the donees were Brāhmaṇas, some students of the Ṛigvēda or Sāmavēda, and others members of the Kāṇva or Mādhyandina *śākhās* of the Vājasanēyin branch of the Yajurvēda, or of the Maitrāyaṇīya *śākhā* of the black Yajurvēda. Some belonged to the Gautama, Kauṇḍinya, Bhārdvāja, or Kauśika *gōtras.* And one (in l. 72) is described as *Rājadauvārika*, the king's doorkeeper.

To these Brāhmaṇas Bhillama (II) gave (ll. 78-80) the village of Arjunōṇḍhikā[3], situated on the banks of the river Mātuliṅgī, and some land between the two villages

Laghu-arjunōṇḍhī and Laghu-vavvulavēdra. The boundaries of the village were (ll. 83-84), to the east, Saṁgamanagara[4], to the south, the village of Chikhaḷī,[5] to the west, the village of Jamvalenimva[5], and to the north, the group of three villages named Vavvulavedra.[6]

Lines 84-88 admonish the future rulers to protect the gift village, well-demarcated on four directions and endowed with *sarvābhyantarasiddhi* (all the taxes to be paid to local authorities), which was to be enjoyed by the donees and their descendants in whatever manner they desired.

Lines 88-110 contain as many as 8 benedictive and imprecatory stanzas interspersed with two short prose passages of same intent. Lines 110-113 add that Bhillama (II) made the donation here recorded on the new-moon day of the month Bhādrapada of the year Śārvarin, on the occasion of a lunar eclipse, at the holy bathing-place (*tīrtha)* of the confluence of the Aruṇā (and Gōdāvarī) at Nasik. And l. 114 gives the name of the writer of this *śāsana-paṭṭa*, Kēśava-upādhyāya, who (in ll.114-116) asks the indulgence of the reader for any mistakes, and winds up with the remark that no verbal deficiencies of this document will affect its validity.

Notes

1. This Lakshmī is said to be the Lakshmī or Lachchhiyavvā of the other grants, the wife of Bhillama (II), the donor of this grant (*El.,* II. p.214).


2. *Sellaviḍega* means the 'heroic wielder of the javelin'. The expression *sella* herein is derived from the Sanskrit *śalya* (*A Histoy of Karnataka*, pp. 228-229).

3. Arjunōṇḍhikā may be the modern Rājapur on the Mālungī river of the Saṁgamner Sub-Division of the Aḥmadnagar District, which perhaps may have received this name in consequence of this grant (*El.,* II, p.216).

4. Saṁgamanagara of the grant would of course be the town of Saṁgamner of the Aḥmadnagar District, which is about three miles east of Rājapur (*ibid.*).

5. Chikhalīgrāma would be the village of Chikhali on the river Ārdalā, about two miles south of Rājapur, and Jamvalenimvagrāma the village of Javlekardak, which is about 2½ miles west of Rājapur (*ibid.*).

6. The group of three villages named Vavvulavedra would be represented by the village Velhāle on the Mālungī river, about two miles north of Rājapur, and two deserted "wadis" not far from it (*ibid.*).



No.30

KALAS – BUDRUKH PLATES OF BHILLAMA III
SAKA-SAMVAT 948

Location	: Kalas-Budrūkh, Ahmadnagar District, Maharashtra
Date	: Śaka-Samvat 948=1025 A.D.
Script	: Nāgari
Language	: Sanskrit
King	: Bhillama III
Dynasty	: Yādavas of Dēvagiri
Reference	: Fleet, J.F., *IA.*, XVII, pp. 117-122

Text

Metre: Vv. 1 *Vaṁśastha;* + *Indravaṁśā;* 2, 4 *Śārdūlavikrī-ḍita;* 3, 8, 12 *Indravajrā;* 5 *Mandākrāntā;* 6, 20 *Upajāti;* 7, 9, 10, 11, 13, 14, 16-19, *Anushṭubh;* 15 *Śālinī;* 21 *Āryā*

ओं ओं नमः सर्व्वज्ञाय ॥

सनातनांगास्त्रिदशानतांह्रयो हिरण्यगर्भाच्युतचंद्रमौलयः ।

उत्पत्तिरक्षाप्रलयैकहेतवो निःश्शेषविश्वस्यशिवं दिशं तु वः ॥ १ ॥

श्रीमानस्ति समस्तविश्वमहितः श्रेयान्यदोरन्वय

स्तस्मिन्सेउणचंद्र इत्यनुपमो जातः प्रतापी नृपः ।

तस्मात्सूनुरनूनकीर्त्तिरजनि श्रीधाडियप्पाह्वयो

विध्वस्ताहितसंहतिर्न्नरपतिर्ज्जातस्ततो भिल्लमः ॥ २ ॥

तस्मादभूद्भूरिगुणानवद्यः श्रीराजनामा नरदेववंद्यः ।

जातस्ततः सूनुररातितूलदावानलो वद्दिगभूमिपालः ॥ ३ ॥

Kalas - Budrakh Plates of Bhillama III; Saka Saṁvat 948

तस्माद्दुग्धमहार्ण्णवादिव शशी विश्वंसमुद्भासय

न्सीमा शौर्यरसस्य भिल्लमनृपः संग्रामरामो भवत्।

तस्यासीज्जगदर्च्चनीयचरिता लक्ष्मीर्म्मनःप्रेयसी

या श्रीयादवराष्ट्रकूटकुलयोर्ज्जाता समुद्योतिनी ॥ ४ ॥

वेसूनामानुपममहिमा तस्य सामन्तरत्नं

धर्म्मी धीमान्समजनि सुतो भिल्लमस्याथ तस्याम्।

तस्याप्यासीदसमसुकृतो विक्रमी न्यक्कृतारिः

पुत्रः पात्रं विशदयशसो नीतिमान्भिल्लमाख्यः ॥ ५ ॥

आनन्दनश्चन्द्र इव प्रजानां यश्च प्रतापी सवितेव रेजे।

तस्य प्रसिद्धा भुवि राजधानी विभाति सिंदीनगराभिधाना ॥ ६ ॥

अथ शकनृपकालातीतसंवत्सरशतेषु नवस्वस्थाचत्वारिंशदधिकेष्वंकतोपि ९४८ ॥ क्रोधनसंवत्सरकार्त्तिकसंजातादित्यग्रहणे समधिगतपंचमहाशब्दमहासामंतैकशंखध्वनिबधिरितभुवनांतरालश्रीविष्णुवंशप्रसूतयादवनारायणादिराजावली विराजितश्रीभिल्लमराजः ॥ असारतां संसारस्य अस्थिरतां यौवनस्य क्षणिकतां विभवस्य विषविषमतां विषयसुखस्य प्रबलपवनवशाचलिततरुशिखरगतपरिणतफलवन्निश्चितपतनतां जीवितस्य चाकलय्य केवलं धर्म्म एव शाश्वतशर्म्मणे संपद्यत इति नियतमवधार्य च तथा

कृतत्रेताद्वापरेभ्यः कलौ दानमेव प्रशंसन्ति मुनयः।

न तथा सफला विद्या न तथा सफलं धनम्।

यथा तु मुनयः प्राहुर्द्दानमेकं कलौ युगे ॥ ७ ॥

अग्नेरपत्यं प्रथमं सुवर्ण्णं भूर्वैष्णवी सूर्यसुताश्च गावः।

लोकत्रयं तेन भवेत्प्रदत्तं यः कांचनं गां च महीं च दद्यात्॥ ८॥

आस्फोटयन्ति पितरो वल्गंति च पितामहाः।

भूमिदोस्मत्कुले जातः स नः संतारयिष्यति॥ ९॥

भूमिदानं सुपात्रेषु सुतीर्थेषु सुपर्व्वसु।

अगाधापारसंसारसागरोत्तरणं भवेत्॥ १०॥

धवलान्यातपत्राणि दंतिनश्च मदोद्धताः।

भूमिदानस्य पुष्पाणि फलं स्वर्ग्गे पुरन्दर॥ ११॥

इत्यादीनि पराशरदक्षकुत्सांगिरसगोतममनुयाज्ञवल्क्यप्रभृतिमहामुनि-वचनानि सम्यगवगम्य मातापित्रोरात्मनश्च सकलनिजवंशस्य च श्रेयसे श्रीसिन्दीनगरामरावतीविभूषायामैरावणानुकारिवारणकटस्थलगलितम-दगंधवासितायां नरेंद्रवृन्दारकदेवार्च्चनोचितविकचराजीवरेणुराजीराजि-तपुण्यपुंजायितजलायां प्रथितसुतीर्थायां मन्दाकिन्यामिव देवनद्यां कृत-यथाविधिस्नानो विहितपितृतर्प्पणो रक्तकमलमिश्रेण वारिणा दत्वार्घमा-दित्याय भक्त्याभिपूज्य शंभुं प्रविहितहोमकार्यः सुकृतिभिः प्रधानपुरुषैः परिवृतो गृहीतगुरुजनानुज्ञः श्रीमध्यदेशांतःपातिटक्कारिकाभट्टग्राम-विनिर्ग्गतमाध्यन्दिनशाखभारद्वाजगोत्रश्रीभट्टाभिधानविप्रवरप्रनप्त्रे श्री-पद्मनाभनप्त्रे श्रीश्रीवत्सनायकसुताय स्वाध्यायस्नानदानपंचभूतयज्ञादि-गृहस्थधर्म्मानुष्ठानरताय महाप्रधानपदविराजिताय श्रीमणम्वाभिधान-नायकाय तद्गुणैः पंचविंशतिभिः सुब्राह्मणैः सह परमभक्त्या हस्तोदकं कृत्वा पूर्व्वभागगतसंगमिकाग्रामं दक्षिणभागगतताम्रप्रस्तरग्रामं पश्चिम-

भागगतथूहग्राममुत्तरभागस्थपयोधरानदीकं चतुराघाटोपलक्षितं सोद्रंगं सोपरिकरं ससीमापर्यंतं सवृक्षमालाकुलं सतृणकाष्ठं सप्रभृतिकानुक-विषयाश्रयं सरिद्वापीकूपकूपिकातडागदीर्घिकाजलस्थलखन्याकरमृद्वनौ-षधिप्रासादगोपुरोपेतं सर्व्वायस्थानसहितं नमस्यमकरवातोत्तरं पुत्रपौत्रा-द्यन्वयोपभोग्यमचाटभटप्रवेशं पूर्वदत्तद्विजदायदेवदायवर्ज्जं वसद्भोज्यवृत्तिं कलशनामानं ग्रामं प्रददौ ॥ तदेषां मणंवादिब्राह्मणानां सान्वयबंधूनां स्वयंभुंजानानां भोजयतां वा कृषतां कर्षयतां वा यथेष्टं प्रतिदिशतां प्रति-देशयतां वा केनापि परिपंथना न कर्त्तव्या ॥ यत उक्तं महामुनिभिः ।

यानीह दत्तानि पुरा नरेन्द्रैर्द्दानानि धर्म्मार्थयशस्कराणि ।
निर्माल्यतुल्यानि भवंति तानि को नाम दत्वा पुनराददीत ॥१२ ॥

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥१३ ॥

सद्योदानं निरायासं सायासं तस्य पालनम् ।
एवं तु मुनयः प्राहुर्द्दानात्तत्पालनं वरम् ॥१४ ॥

सर्व्वानेतान्भाविनः पार्थिवेंद्रान् भूयो भूयो याचते रामदेवः ।
सामान्योयं धर्म्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ॥१५ ॥

इत्यर्थितोपि कलिकालवशाल्लोभाभिभूतो यः पूर्व्वदानापहारं करोति स पंचमहापातकैरुपपातकैश्च लिप्यते ।

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ॥१६ ॥

विंध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।

महाहयो हि जायंते भूमिदानापहारिणः ॥१७ ॥

सत्यं यज्ञाहुतं चैव यः कश्चिद्धर्म्मसंचयः ।

अर्द्धांगुलेन सीमायां हरणेन प्रणश्यति ॥१८ ॥

अश्वमेधसहस्त्रेण वाजपेयशतेन च ।

गवां कोटिप्रदानेन भूमिहर्त्ता न शुध्यति ॥१९ ॥

इति मुनिवचनानि मत्वा भाविभिर्नृपतिभिर्द्धर्मलोभ एव कर्त्तव्यः ॥

पुनरपि श्रीभिल्लमराजः प्रार्थयति ॥ छ ॥

मद्वंशजा वा परवंशजा वा

ये पुण्यवंतो मम धर्म्ममेनम् ।

प्रपालयिष्यंति नृपाः समग्रं

कृतांजलिः सादरमस्मि तेषाम् ॥२० ॥

वचनाद्भिल्लमनृपतेः शासनमिति रुद्रपण्डितसुतेन ।

हरिचंद्रनामविदुषा ब्राह्मणहितहेतवे रचितम् ॥ ॥२१ ॥

Summary

This inscription, engraved on a set of 3 copper plates, consists 62 lines of well-executed and well-preserved writing. The plates are numbered. They were held together by a circular ring, the ends of which were fixed to a pear-shaped mass of copper which bears, in relief, a small image of Garuḍa. This is too much worn out. Except for the opening words *Ōṁ Ōṁ namaḥ Sarvajñāya,* the inscription is in verse as far as line 14. From there, to the end, the formal part of it is in prose; with the introduction of some of the usual benedictive and imprecatory verses and the final verse recording the name of the writer of the charter. The inscription records the gift of a village by the Yādava king Bhillama III to his

Brāhmaṇa *Mahāpradhāna* (chief minister) Maṇamvanāyaka and 25 other Brāhmaṇas.

The inscription opens with an invocation of the god Śiva under the name of Sarvajña, followed by a verse in praise of Brahman, Vishṇu and Śiva, under the names of Hiraṇyagarbha, Achyuta and Chandramauli. It then gives the following genealogy of the Yādava dynasty: Sēuṇachandra (I); his son Dhāḍiyappa; his son Bhillama I; his son Rāja or perhaps Śrīrāja; his son Vaddiga; his son Bhillama II whose wife was Lakshmī; their son Vēsū (*i.e.* Vēsugi I); and his son Bhillama III, whose capital was Sindīnagara.[1]

The inscription then records that, in Śaka-Saṁvat 948, the Krōdhana *saṁvatsara,* the *Mahāsāmanta* Bhillama III, who had attained the *pañchamahāśabda;* who was born in the Vishṇuvaṁśa; and who had the *biruda* of Yādava-Nārāyaṇa, bearing in mind the precepts of great sages like Parāśara, Daksha, *etc.,* - having bathed in the river Dēvanadī,[2] which adorned the city of Sindīnagara, - having performed the usual sacred rites and worship, - gave away the village of Kalaśa[3] to *Mahāpradhāna* Maṇamvanāyaka and 25 other Brāhmaṇas. *Mahāpradhāna* Maṇamvanāyaka was the great grandson of Śrībhaṭṭa who came originally from the *bhaṭṭa* village of Ṭakkārikā in the Madhyadēśa or Middle Country and belonged to the Mādhyandina *śākhā* and the Bhāradvāja *gōtra,* grandson of Padmanābha and son of Śrīvatsanāyaka. He was discharging the duties prescribed for a householder (*gṛihasthadharma*) and holding the office of the *Mahāpradhāna.* Names of the 25 Brāhmaṇa donees who shared the gift of the village with Maṇamvanāyaka are not given. But they are said to have resembled him in merit.

Kalaśa, the village granted was bounded on the east by the village of Saṁgamikā,[4] on the south, by the

village of Tāmraprastara,[5] on the west, by the village of Thūha[6] and on the north, by the river Payōdharā.[7] Acording to the terms and conditions of the grant, given in detail, besides the taxes called *udraṅga* and *uparikara,* natural resources like trees, grass, wood, water sources like well, *etc.,* minerals, *etc.* were attached to the village granted. The gift was to be enjoyed by the sons and grandsons of the donees.

This gift was made for the religious merit of not only the donor and his parents, but also of his whole family.

Then follows an order that no obstacle shold be raised to the enjoyment of the grant by Maṇamva and the other Brāhmaṇas.

This record consists 12 usual imprecatory and benedictory verses in all, 5 at the beginning of the formal part and 7 at its end. The concluding verse records that the charter was written, at the command of Bhillama III, by Harichandra, the son of Rudrapaṇḍita.

Notes

1. Sindīnagara, the capital of the Yādava family, has been identified with the modern Sinnar, the chief town of the Sinnar Taluk of the Nasik District, Maharashtra (*IA.,* XVII, p.118).

2. Dēvanadī is the name of a small river or stream which unites with Śivanadī, close below the town of Sinnar (*ibid.*).


3. Kalaśa, the village granted, is the modern Kalas-Budrūkh, 3 miles east by south of Akōlēm, and about 21 miles south by east of Sinnar (*ibid.*).

4. Saṁgamikā, which bounded Kalaśa on the east, is evidently the modern Saṁgamnēr in the Aḥmadnagar District (*ibid.*).

5. The village Tāmraprastara, which bounded Kalaśa on the south, has now disappeared (*ibid.,* p.119).

6. Thūha, the western boundary of Kalaśa, is the modern Thūgaum-Budrūkh 2 miles to the west by north (*ibid.*).

7. Payōdharā, the river which bounded Kalaśa on the north, must be the old original name of the modern Pravarā, which flows by just to the north of Kalas-Budrūkh, and joins Mahāluṅgi or Māluṅgi at Saṁgamnēr (*ibid.*).



No.31
TWO YADAVA CHARTERS FROM DEVALALI

Location	: Dēvalāli, Ahmadnagar District, Maharashtra
Date	: Śaka 974 = 1052 A.D.
Script	: Nāgarī
Language	: Sanskrit
King	: Bhillama III and Sēuṇachandra II
Dynasty	: Yādavas of Dēvagiri
Reference	: Sankaranarayanan, S., *EI.,* XXXVII, pp.74-84

Text

Metre: Charter A - Vv. 1 *Mandākrāntā;* 2-12, 14 *Śārdūla-vikrīḍita;* 13, 15-17, 19, 21, 22, 26 *Āryā;* 18, 23-25, 27 *Anushṭubh;* 20 *Upajāti;*

Charter B – 1, 2, 6 *Anushṭubh;* 3 *Śārdūlavikrīḍita;* 4 *Vaṁśasthavila;* 5 *Upagīti*

A

सिद्धम् ॥ स्वस्ति ॥

यस्त्रैलोक्यं सृजति भगवांल्लब्धमाहात्म्यतेजा

श्चित्तागम्यः परमतपसां योगिनां ध्यायतां सः।

अप्रत्यक्षस्त्रिजगति बुधानामपि प्रायशोसौ

श्रीभिल्लम्मक्षितिपतिपतेः शंकरः शं करोतु ॥ १ ॥

आदौ जातदृढप्रहारिनृपतिः श्रीविष्णुरूपः स हि

प्रयातो निजवंशशेखरतनुर्द्वारावतीपत्तनात्।

संग्रामे रिपुहस्तिपत्तिशिरसां संछेदभेदे दृढ

श्चंद्रादित्यपुरं प्रसिद्धमकरोत्प्राक्सम्भवं यो भुवि ॥ २ ॥

श्रीमत्सेउणचंद्रनामनृवरस्तस्मादभूद्भूमिपो

नित्यं देशपदातिराजविषये स्वं नाम संपादयन्।

येनाकारि पुरं च सेउणपुरं श्रीसिंदिनेरे वरे

तत्पुत्रः कुलदीपको गुणनिधिः श्रीधाडियप्पस्ततः ॥ ३ ॥

आसीत्तद्वदशेषभूतलशशी श्रीमान्बृहद्भिल्लमः

श्रीराजस्तदनन्तरं नरपतिर्जातो महीमण्डनः।

प्राग्वत्तस्य बभूव भूतलहरिः श्रीवद्दिगाख्यो नृप

स्तस्मात्च्छ्रीवरभिल्लमः क्षितिपतिः प्रत्यक्षधर्मोभवत्॥ ४ ॥

येनाकारि पुरद्वयं समधिकं त्रैलोक्यरम्यं सदा

चैकं ग्रावमयं सुकर्म्मरचितं श्र्यावेश्वरं नामतः।

अन्यत्काष्ठमयं वरं त्वभिनवं श्रिसोमनाथाह्वयं

देवब्राह्मणपालकेन सुधिया संग्रामरामेण हि ॥ ५ ॥

भार्या यस्य च झंझराजतनया श्रीलच्छियव्वाह्वया

धर्म्मत्यागसुबुद्धिशक्तिसुगुणा श्रीराष्ट्रकूटान्वया।

या जाता ननु बालराज्यसमये यद्वन्वयाधारिका

सप्ताङ्गोद्यतराज्यभारधरणाद्रायत्रयाघ्यां ततः ॥ ६ ॥

चालुक्यान्वयमण्डलीकतिलकाच्छ्रीगोगिराजाद्वरा

दुत्पन्ना दुहिता गुणत्रयवती धर्म्म्या कुलद्योतिका।

स्त्रीरत्नं बतवेधसा प्रकटितं सामंतरत्नाय सा

श्रीनायीयलदेविनामसुभगा स्त्रीपट्टराज्ञी सदा ॥ ७ ॥

श्रीवेसूकमहीपतेः समभवद्यस्यांगश्लिष्टा ततः

श्रीभिल्लम्मधराधरः समुदितः श्रीमण्डलीकाख्यया।

त्रैलोक्यं निजकीर्त्तिनिर्मलतया संभूषयन्यादवो

दक्षोदक्षविमर्द्दनस्य चरणौ संपूजयन्भूतले ॥ ८ ॥

यस्याङ्गार्द्धनिषण्णसुंदरतनुः प्रत्यक्षलक्ष्मीगुणा

हम्म्यश्रीजयसिंहदेवदुहिता श्रयव्वल्लदेवी सती।

जातात्राहवमल्लदेवभगिनी चालुक्यवंशोद्भवा

प्रेयःकार्यविशेषकारणपदे सद्धर्म्मपत्नीक्षितौ ॥ ९ ॥

आयातो वरमध्यदेशविषयादोयारिसद्ग्रामतः

श्रीमाद्ध्यंदिनशाखविस्तृतगुणः श्रीवत्सवंशोद्भवः।

धारायां परमारसंततिभवं श्रीवैरिसिंहं नृपं

श्रीमत्सिल्लणनायको द्विजवरः संसेवितुं सर्व्वथा ॥ १० ॥

तस्मात्पव्वणनायकः समभवद्विष्णुस्ततः सद्गुणी

धन्यः श्रीधरदण्डनायकवरो जातः सुधीमांस्ततः।

श्रीमान्मालवभोजराजनियमादत्येणकैरक्षणे

दुर्ग्गं यच्छति भिल्लमस्य नियतं ख्यातैणकैनामकम् ॥ ११ ॥

दोर्दण्डप्रबलासिघातनिहता संग्रामरामेण हि

द्वेष्या आहवमल्लदेवनृपतेः प्रौढांककारेण तु ।
शश्वल्लब्धसुचक्रवर्त्तिपदवीनिर्वाहिणा राजसु
संसारस्थितिसावकेम गुणिना तेनाद्भव धर्म्मिणा ॥ १२ ॥
परमपुण्यं च हृदये दधता पुनरष्टपुरुषगुणमतिना ।
महदीषणया भक्त्या श्रीमद्भिल्लमदेवनृपेण ॥ १३ ॥
श्रीमद्भिल्लमराजसद्गुणगणैः संशुद्धसन्मानसः
पुत्रापत्यसुजीवितव्यमखिलां वृत्तिं स्थिरां कारयत् ।
तस्मै यादवशेखरेण सुधिया बह्वर्थराज्यार्थिना
संतुष्टेन हृदैकभक्तिमनसे श्रीश्रीधराय स्फुटम् ॥ १४ ॥
श्रीकोणंधाग्रामो रूयिग्रामोथ पिप्पलत्था च
श्रीमांगलजुमरहरं प्रायः सर्व्वोपि जनविदिताः ॥ १५ ॥
इति चत्वारो ग्रामाः पादौ प्रक्षाल्य विप्रमुख्याय ।
श्रीमंखसामन्तश्रीश्रीपतिसामन्तयोः पुरतः ॥ १६ ॥
श्रीबीजाख्यवरिष्ठकमाहेश्वरगुणिगुनामभरथैयैः ।
मौलैर्न्निकटैः सद्भिर्द्धर्म्मार्थं प्रेरकैः सततम् ॥ १७ ॥
ग्रामसीमानि कथ्यंते चतुर्भागेषु तत्त्वतः ।
प्रत्यक्षं देशलोकानां दातृग्राहकयोरपि ॥ १८ ॥
कोणंथा ग्रामस्य प्राचि वासिमो दक्षिणेडोभूत् ।
ढोढुम्बरमपरस्यां मेणेवेढो गिरिरुदीच्याम् ॥ १९ ॥
रूइग्रामात्पूर्व्वे सिंघग्रामोथ दाक्षिणात्ये ।
सावलविहरी पश्चादुत्तरतः कोक्कमस्थानम् ॥ २० ॥

ध्वजासंधे ग्रामः सिंघेखडको नृपस्य दधिनामा ।

गजेरहतग्रामः कथितोयं पिप्पलत्थायाः ॥ २१ ॥

जुमरहरस्य च पूर्व्वे कडेद्रहः प्रेहरा च याम्यांशे ।

पश्चात्पत्थरकाख्यः करकल्लीषोत्तरे भागे ॥ २२ ॥

शकसंवत् । ९७४ नन्दनसंवत्सरान्तर्गतपुष्यशुद्धपौर्ण्णमास्यां समस्त-ग्रासे चन्द्रपर्व्वणि । समस्तभुवनाश्रयपृथ्वीवल्लभमहाराजाधिराजश्री-चालुक्याभरणत्रैलोक्यमल्लश्रीआहवमल्लदेवराज्ये ग्रामाः प्रदत्ता अकर-वातोत्तरीया नमस्याः सवृक्षमालाकुलाः ॥

बहुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः ।

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ २३ ॥

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।

षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः ॥ २४ ॥

देवस्वानि हरंतीह नरा नरकनिर्भयाः ।

ब्रह्मस्वानि तु ये मोहात्पच्यन्ते नरकेषु वै ॥ २५ ॥

यावत्सूर्यशशांकौ यावन्महीमहीधरांबुपतयः ।

तावद्यादवकुलजैर्ग्रामाः पाल्या महीपालैः ॥ २६ ॥

कायस्थतैकतैयेन विजैयसुतेन हि ।

शासनं रचितं सम्यग्भूमावसतु गुणाढ्बुधाः ॥ २७ ॥

सोहनैयसुतेन भरथेन घटितम् ॥

B

सिद्धम् ॥ ततो हि ।

भिल्लमस्य तु वंशेभूद्राजा धर्म्म इवापरः ।

सेउणचंद्र इति विख्यातश्चंद्र इवोदितः ॥ १ ॥

निमज्जंतं स्वकं राष्ट्रं दायादैर्व्विप्रलुंपितम् ।

समुद्धृत्य स्थितो राज्ये कोलरूपीव दंष्ट्रया ॥ २ ॥

येनोद्धृत्य बलान्निमज्जनपरं चालुक्यवंशं क्षितौ

देवब्राह्मणमंडलीकसहितं साध्वन्वयं कोंकणं ।

संस्थाप्यो . . . द्वयेन पट्टुना सेऊणसंज्ञं पुरं

भुक्तं चैव सनाम्र्मदक्षितितलं दिग्मंडले दक्षिणे ॥ ३ ॥

प्रधानवर्गस्य मतानुवर्त्तिना द्विजाप्तदेवार्च्चितलोकसाक्षिणा ।

धर्म्मं परं यादववंशविष्णुना स्नेहं च कीर्त्तिं च विभूतिमिच्छुना ॥ ४ ॥

श्रीधरदंडाधिपतेग्र्ग्रामं सकच्छकं च मत्वेह ।

कुमरहरस्य च अर्थे देउलवल्यर्पिता तेन ॥ ५ ॥

सीमानः कथ्यन्ते ।

पूर्व्वे तु तकलीग्रामश्चिंचवेहर दक्षिणे ।

सोहवः पश्चिमे चैव ह्यंवी चैव तथोत्तरे ॥ ६ ॥

भद्रमस्तु ॥ सिद्धम् ॥

Summary

These two grants (A and B) are engraved on a set of 3 copper-plates, which are held by an oval ring with a seal bearing the figures of *Śaṅkha, Chakra* and *Gadā* in relief. Record A consists 40 lines of writing while record B contains 9 lines only. Writing in both of the charters is well-executed and well-preserved.

Record A contains 22 numbered verses followed by a prose passage which is again followed by 5 verses which are not numbered. This grant records the gift of 4 villages to a Brāhmaṇa general named Śrīdhara by the Yādava king Bhillama III of Dēvagiri. Record B contains 6 verses of which all but the last one are numbered. The portion in verse is preceded, followed and intervened by short prose passags. This grant records the substitution of one of the 4 villages mentioned in grant A with a different one by the Yādava king Sēuṇachandra II. Therefore this charter is more or less in the form of a continuation of charter A.

Grant A consists of three parts, of which the first starts with a *Siddham* symbol followed by an auspicious word *svasti* and a verse invoking Śaṅkara (*i.e.,* Śiva) for the prosperity of the Yādava king Bhillama III, the donor of the grant. This is followed by 8 verses (vv.2-9) which give the following list of kings and queens of the Yādava family of Sēuṇadēśa: 1. Dṛiḍhaprahāra, who left Dvārāvatī and made the already existing Chandrādityapura famous (v.2); 2. his son, Sēuṇachandra I, the builder of Sēuṇapura in Sindinēra; 3. his son, Dhāḍiyappa (v.3); 4. (his son) Bṛihad-Bhillama (or Bhillama I); 5. (his son) Rāja; 6. his son, Vaddiga; 7. his son, Bhillama II, the builder of two temples (*pura-dvaya*) the one named Āvēśvara built with stones and the other named Sōmanātha built with wood (v.5); 8. his wife, Lachchhiyavvā, the daughter of Jhañjha of the Rāshṭrakūṭa family and the supporter of the family of the Yadus at the time of the rule of a minor or a boy (*bāla-rājya-samayē*) and who, therefore deserved the respect of three kings (*rāya-tray-ārghyā*) (v.6); 9. (her daughter-in-law) Nāyīyaladēvī, the

daughter of Gōgirāja, a feudatory of the Chālukya family (v.7); 10. her husband Vēsūka; 11. his son Bhillama III, the devotee of Dakshavimardana, *i.e.,* Śiva (v.8); 12. his queen Avvalladēvī of the Chālukya family, the daughter of Jayasiṁha and the sister of Āhavamalla (v.9).

The first section is followed by the second one which consists of 5 verses and gives an account of the donee and his ancestors. Verse 10 introduces a certain Brāhmaṇa named Sillaṇa, belonging to the Śrīvatsa *gōtra.* It is said that he left his village Ōyāri, a place in the Madhyadēśa or Middle Country in order to serve under the Paramāra Vairisiṁha seated at Dhārā. Verse 11 says that to Sillaṇa was born Pavvaṇa, whose son and grandson were Vishṇu and Śrīdhara-daṇḍanāyaka respectively. It further says that the latter was appointed by Paramāra Bhōja of Mālava as a guardian of the territory lying beyond a fort called Ēṇaka and that he handed over the above fort to Bhillama III, who besieged (*niyata*) it[1]. The next 3 verses (12-14), with which the second section ends, describe this Bhillama III in high terms and tell us that being desirous of more wealth and territory and being much pleased, he caused a permanent *vṛitti* to be created in favour of the above Śrīdhara. This Daṇḍanāyaka Śrīdhara is evidently idenctical with his namesake who is referred to as *Mahāprachaṇḍadaṇḍanāyaka* in the Bassein plates (No.32 below)

The third section of the record consists of the rest of the document which describes the grant proper. Verse 15 tells us that the four villages named Kōṇaṁtha[3], Rūyi[2], Pippalatthā[2] and Jumarahara[3] were well known to the people. Verses 16-17 say that the king along with his four

officers named Śrībīja, Mahēśvara, Guṇigu and Bharathaiya gave away the gift after washing the feet of the donee in the presence of two *Sāmantas* named Śrīpati and Maṅkha. Verse 18 states that the boundaries of the villages granted are defined. Verses 19-22 mention the boundaries of these villages. As many as 15 villages and a hill marked the boundaries of the villages that were granted.

Then follows a prose passage recording the date of the grant, *viz.,* Śaka 974 Nandana, Pushya śu. 15, coinciding with a total lunar eclipse, corresponding to the 8th December 1052 A.D. It is also stated here that in the kingdom of Āhavamalla (*i.e.* Sōmēśvara I) the above four villages were granted and were exempted from all taxes. Then there are three usual imprecatory verses. Verse 26 requests the future Yādava kings to protect the granted villages. Verse 27 informs us that the record was composed by Taikataiya of the Kāyastha caste who was the son of Vijayaiya. The record ends with a short prose passage which appears to inform us that the record was engraved (*ghaṭita*) by a certain Bhratta, *i.e.* Bharatha, the son of Sōhanaiya. This Bharatha who appears to be different from his namesake mentioned in verse 17 of the present record was probably identical with the brass worker Bharatha-nāyaka whose proxy (*pratihastaka*) wrote the Bassein record referred to earlier.

Grant B starts with a *Siddham* symbol followed by the expression *tatō hi* meaning "afterwards." Then follows verse 1 introducing Sēuṇachandra II as having been born in the family of Bhillama (III), the donor of the grant A. Verse 2 states that this Sēuṇachandra II, like the

Kōlarūpī, i.e. Hari-Vishṇu in his Boar incarnation, raised his own (*svakaṁ*) sinking kingdom plundered by his kinsmen (*dāyādaiḥ*). It may be noted that the Bassein plates also describe this king simply as having been born in the family of Bhillama III and as an uplifter of the kingdom like Hari in the form of Boar on the death of Bhillama III. This description evidently shows that Sēuṇachandra II was not a direct descendant of Bhillama III and that he experienced troubles from his relatives before his accession. Verse 3 tells us that having rescued two sinking families namely the family of the Chālukyas and that of Kōṁkaṇa (*i.e.* kings of Kōṁkaṇa), Sēuṇachandra II ruled the city called Sēuṇapura and the Narmadā region in the south. The following 2 verses (4-5) record that being desirous of achieving friendship, fame and wealth, the king granted to the general Śrīdhara, a village called Dēulavalī[4] in the place of Kumarahara, probably on the ground that the latter was full of marshy lands. This Kumarahara was the same as Jumarahara, the fourth village of grant A. Then follows a short prose passage relating to the boundaries of the village newly granted, which are described in the succeeding verse (v.6). At the end of the grant is the expression *bhadram=astu.* The record is not dated, but assigned to a period after 1076 A.D. and before 1098 A.D.

These two charters are important in many respects. Grant A is the only available authority, outside the Paramāra records, referring to Bhōja's great-grandfather Vairisiṁha II. This epigraph provides indirectly 1052 A.D. as the latest known date for Bhōja's rule. The object of the grant B would suggest that the surrender of the Ēṇaka fort was, perhaps, considered to be an important

event, by the Yādava kings for a long time, in the Chālukya Paramāra war. This grant also corroborates Hēmadri's description of Sēuṇa's help to his Chālukya overlord Vikramāditya VI agaist his enemies, besides throwing some welcome light on the Yādava interference in Kōṅkaṇ politics as early as the time of Sēuṇa II.

Notes

1. This incident has been described as a story of seduction of the Paramāra general by the Yādava chief (*EI.,* XXXVII, p.77).

2. Of the four villages granted, Rūyī and Pippalatthā may be identified with the modern Rui and Piplegaon situated not far from each other in the Aurangabad District of Maharastra (*ibid.,* p.79).

3. The other two villages, *viz.,* Kōṇaṁthā and Jumarahara or Kumarahara also are to be located nearby (*ibid.*).

4. Village Dēulavalī is evidently identical with the modern Dēvalāli, the findspot of the plates under study (*ibid.*).



No.32

BASSEIN PLATES OF SEUNACHANDRA II SAKA 991

Location	: Bassein, Thana District, Maharashtra
Date	: Śaka 991 = 1069 A.D.
Script	: Nāgarī
Language	: Sanskrit
King	: Sēuṇachandra II
Dynasty	: Yādavas of Dēvagiri
Reference	: Bhagavandal Indraji, *IA.*, XII, pp. 119-126

Text

Metre: Vv. 1 *Mandākrāntā;* 2-10 *Śārdūlavikrīḍita*

ओं स्वस्ति जयोभ्युदयश्च ।

त्रैलोक्येशं सृजति भगवांल्लब्धमाहात्म्यतेजा

श्चित्ताराध्यः परमतपसां योगिनां ध्यायतां यः ।

अप्रत्यक्षं भवति विबुधानामपि प्रायशोसौ

देवः सोयं यदुपतिपतेः शंकरः शं करोतु ॥ १ ॥

आदौ ख्यातः दृढप्रहारनृपतिः श्रीविष्णुरूपः स हि

त्वा यातो निजवंशशेखरतनुर्द्वारावतीपत्तनात् ।

संग्रामे रिपुहस्तिपत्तिशिरसा संच्छेदभेदे दृढः

चंदादित्यपुरं प्रसिद्धमकरोत्प्राक्संभवं यो भुवि ॥ २ ॥

श्रीमत्सेउणचंद्रनामनृपवरस्तस्माद‌भूद्भूमिपः

नित्यं देशपदातिविषये सन्नाम संपादयन्।
येनाकारि पुरं च सेउणपुरं श्रीसिंदिनेरेवरे
तत्पुत्रः कुलदीपकोगुणनिधिः श्रीद्वाडिपय्यस्ततः ॥ ३ ॥
आसीत्सत्तदशेषभूतलशशि श्रीमान्बृहद्भिल्लमः
श्रीराजस्तदनन्तरं नरपतिर्ज्जातो महीमण्डनः।
अर्वाक्तस्य बभूव भूतलहरिः श्रीवद्दिगाख्यो नृपः
तस्माच्छ्रीवर भिल्लमक्षितिपतेः प्रत्यक्षधर्म्माभवत् ॥ ४ ॥
भार्या यस्य च झंझराजतनया श्रीलच्छियव्वाह्वया
धर्म्मत्यागविवेकबुद्धिसुगुणा श्रीराष्ट्रकूटान्वया।
या जातानवबालराजसमये यदन्वयाधारिता
सप्तांगोद्यतराज्यभारधरणाद्राज्यत्रयार्घ्या ततः ॥ ५ ॥
चालुक्यान्वयमण्डलीकतिलकाच्छ्रीगोगिराजाकरा
दुत्पन्ना दुहितात्रयाद्गुणवती धाम्ना कुलद्योतिता।
स्त्रीरत्नं बत वेधसा प्रकटितं सामन्तरत्नायसा
श्रीनाइयलदेवि नाम सुभगा श्रीपट्टराज्ञी सदा ॥ ६ ॥
श्रीतेसूकमहीपतिः समभवद्यस्यांगश्लिष्टा ततः
श्रीभिल्लमधराधरः समुदितः श्रीमण्डलीकाख्यया।
त्रैलोक्ये निजवंशकीर्त्ति निर्म्मलतया संभूषयन्यादवो
दक्षोदुष्कृतिमर्द्दनस्य चरणौ संपूजयन्भूतले ॥ ७ ॥
दोर्द्दण्डप्रबलासिघातनिहतः संग्रामरामेण भुवः
शक्रः श्राहवमल्लदेवनृपतेः प्रौढांककारेणहि।

शश्वल्लब्धसुचक्रवर्त्तिपदकालंकारिणा राजसु

संसारस्थितिद्योतकेन गुणिना तेनोद्भवद्धर्म्मिणा ॥ ८ ॥

यस्यार्धांगनिषक्तसुंदरतनुः प्रत्यक्षलक्ष्मीगुणा

हाम्मा श्रीजयसिंहदेवदुहिता श्रीअव्वलदेवी सती ।

या चात्राहवमल्लदेवभगिनी चालुक्यवंशान्वया

श्रेष्ठा कायविशेषकारणपदे सद्धर्म्मपत्नी क्षितौ ॥ ९ ॥

तद्वंशोद्भवसेउणेन्दुनृपतिर्ज्जातोत्र धर्म्माधिकः

सर्व्वान्भूवलयाश्रितान्क्षितिपतीन्निर्ज्जित्य शौर्यासिना ।

राज्यं येन समुद्धृतं सतिलकं स्वर्गं गते भिल्लमे

यद्वत्सूकररूपसाम्यहरिणा लोकत्रयं चोद्धृतम् ॥ १० ॥

गोत्रान्वये यमनियमस्वाध्यायध्यानानुष्ठानरतपरमशैव श्रीसोमदेवाचार्याः तस्य शिष्याः परमगुरुभक्तसंपन्ना अनेकशिवागमतत्त्वज्ञाः शब्दशास्त्र-विशारदाः दीक्षापरोक्षादानसमर्थाः श्रीमत्सर्व्वदेवाचार्याः राजगुरवः तेभ्यः शकसंवत् एकनवत्यधिकनवशतेषु संवत् ९९१ सौम्यसंवत्सरीय श्रावणशुदि चतुर्दश्यां गुरुदिने राजगुरोर्भीर्णित्वगुरुदक्षिणायां पादप्रक्षा-लनार्घ्यादिकं कृत्वा श्रीसेउणचन्द्रमहामण्डलेश्वरेण अतिभक्तितत्परेण महाप्रचंडदण्डनायकः श्रीधरः। महामात्य श्रीवासुदेवैय। महाप्रधान-नायकश्रीभभियाक। संधिविग्रहिश्रीनायक पातलकरणी श्रीभरवैया-नायक। राजाध्यक्षश्री आपैयाक। महत्तमश्रीआमादित्यः मौलिकृत-हस्तद्वयेन सह सद्भिः धर्म्मार्थप्रेरकैः सततं सकलपरिग्रहविदितं सिंहि-ग्रामद्वादशके चिंचुलिग्रामः प्रदत्तः तस्य च आघाटनानि पूर्वदिग्भागे

डोंगरदंत। आग्नेयां डोंगरसत्कउत्तरपानीयप्रवाहः। दक्षिणे चिंचालाना-मतडाग। नैर्ऋत्ये वडगम्बाग्राम पूर्वतोडोंगरदंत। पश्चिमे तलठेलीप-र्यन्त। वायव्यां तलाउलीच। उत्तरतो सिंसिग्रामीयडोंगरदन्त तथा वट-वृक्षश्च। ईशान्यां महुय ग्रामीयनीगुडीयालानाम तडागं तय सेंवै। इत्य-ष्टसीमोपलक्षितः सवृक्षमालाकुलः स्वसीमापर्यन्तः सकाष्ठतृणोदकः समस्तद्रव्योपायसमन्वितः स्वचक्रपरचक्रोत्थित विदुलादिद्रव्योपक्षया-द्युपद्रवादिविवर्ज्जितः अकरवातोत्तरः सर्वभोगसमन्वितः प्रतिपालनीयः

सामान्योयं धर्म्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः।
सर्वान्येतान्भाविनः पार्थिवेन्द्रान् भूयो भूयो याचते रामभद्रः॥ १॥
मद्वंशजा वा परवंशजा वा ये पुण्यवंतो मम धर्म्ममेव।
प्रपालयिष्यंति नृपास्तु सर्वे कृतांजलिः सादरमाह सर्व्वम्॥ २॥
यानीह दत्तानि पुरा नरेन्द्रैर्द्दानानि धर्म्मार्थयशस्कराणि।
निर्म्माल्यतुल्यानि भवंति तानि को नाम साधुः पुनराददीत॥ ३॥
बहुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥ ४॥
गयागोदावरीगंगा प्रयागादिषु दानतः।
यत्फलं तत्फलं सर्व्वं भवेत् भूमिप्रपालनात्॥ ५॥
परत्र संवलं दिव्यं भूमिदानात्परं नहि।
तस्मात्सवीदरेणापि भूमिदानं प्रपालयेत्॥ ६॥
रत्नान्नपानगोष्ठाद्यं सर्वं भूमौ प्रजायते।
तस्मात् भूमिप्रदानेन नरो भवति सर्व्वदः॥ ७॥

देवस्वानि हरंतीह नरानरकनिर्भयाः ।

ब्रह्मस्वानि तु ये मोहात्पच्यंते नरकेषु ते ॥ ८ ॥

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।

दिव्यं वर्षसहस्राणि विष्ठायां जायते कृमिः ॥ ९ ॥

वापीकूपतडागैश्च वाजपेयशतैरपि ।

गवां कोटिप्रदानेन भूमिहर्त्ता न शुध्यति ॥ १० ॥

भूमिं यः प्रतिगृह्णाति यस्तु भूमिं प्रयच्छति ।

द्वावेतौ पुण्यकर्म्माणौ नियतं स्वर्ग्गगामिनौ ॥ ११ ॥

चन्द्रार्कौ च तथा भूमिनभस्तापनो वानिलः ।

तारकाश्चानलश्चैव धर्म्मराजस्तथैव च ॥ १२ ॥

तिस्रः संध्यास्त्रयो वेदास्त्रयो देवास्त्रयोग्नयः ।

अहोरात्रं च दानस्य एते वै साक्षिणः स्मृताः ॥ १३ ॥

हर्त्ता देवस्य यो भूमिं ब्राह्मणस्य च यो हरेत् ।

स्वदत्तां परदत्तां वा स याति नरकं नरः ॥ १४ ॥

सर्व्वं वा भूमिहरणाद्धृतमेव न संशयः ।

भूमिहर्त्ता वसेत्तस्मान्नरके कालमक्षयम् ॥ १५ ॥

यावत्सूर्यशशांकौ च यावद्भूधरसागराः ।

तावत्पुत्रपौत्रेभ्यः ग्रामः पाल्यो नृपोत्तमैः ॥ १६ ॥

पूर्व्वलोकैः प्रदत्त देव ब्राह्मण सहितं पालनीयः राज्ञातुष्टेन निरन्तरम् ॥ इति शासनं समाप्तम् ॥ पातलकरणीभरथनायकप्रतिहस्तक प्रेकरयेण लिखितम् । स्तंब्बुसुतः सेकारेयानायकेन घटितम् ॥ मंगलं महाश्रीः ॥

Summary

This inscription, engraved on a set of 3 copper-plates, consists 55 lines of well-preserved writing. The plates are held together by a ring at the top. The ring has a Garuḍa sitting with folded palms, and on either side of him are two conch shells, emblematic of Vishṇu. The language of this record, which is a mixture of verse and prose, is incorrect Sanskrit containing many grammatical inaccuracies. Besides, there are several mistakes committed by the engraver of the record. The inscription records the gift of a village by the Yādava king Sēuṇachandra II, made in favor of the royal priest.


The record opens with the auspicious words *Ōṁ svasti jayābhyudayaścha* followed by a verse invoking the blessings of Śaṁkara (Śiva), which is also met with in the Dēvalāli charter of Bhillama III (No.31 above). Then follow verses 1-9 giving the list of kings and queens of the Yādava family of Sēuṇadēśa, beginning with Dṛiḍhaprahāra and ending with Avvaladēvī, queen of Bhillama III. All these verses also occur in the Dēvalāli charter referred to above. Verse 10 introduces Sēuṇachandra (II), who was born in the family of Bhillama III and who, after the death of Bhillama (IV), subdued all kings on the circle of the earth and raised the kingdom with its royal dignity just as the three worlds were raised by Hari in the form of a boar. This introduction of Sēuṇachandra II corresponds with the contents of verses 1 and 2 of his Dēvalāli charter mentioned above.

The prose passage that follows introduces the royal priest Sarvadēvāchārya, the donee of the present

grant, who was devoted to his preceptor, who knew well the tenets of Śaivism and grammar, who was capable of initiation and who was a disciple of Sōmadēvāchārya, a great Śaiva devoted to the control of the outer and the inner senses (*yama-niyama*), *etc.* Then it is stated that on Thursday the 14th of the bright half of Śrāvaṇa, in the cyclic year Saumya, and Śaka year 991, *Mahāmaṇḍalēśvara* Sēuṇachandra (II) gave away the village of Chinchauli in the Sinhi division of twelve villages to Sarvadēvāchārya as a maintenance and as a perceptorial donation. This village was bounded on the east by a hill slope, on the south-east by a stream flowing to the north and belonging to the hill, on the south by the Chiṁchālā pond, on the south-west by the hill slopes to the east of the village of Vaḍagambhā, on the west by the borders of the hill plain, on the north by the hill slopes belonging to Sindi village and a banyan tree and on the north-east by the Nigudiyālā pond of the Mahuya village. Here, there is an appeal that the village granted, marked with the above boundaries, together with its trees, grass, *etc.,* should be protected. It is also stated that the donor, while giving away the village, was accompanied by *Mahāprachaṇḍadaṇḍanāyaka* Śrīdhara, *Mahāmātya* Vāsudēvaiya, *Mahāpradhānanāyaka* Bhabhiyāka, *Sāṁdhivigrahi* Śrīnāyaka, *Pātālakaraṇī* Bharavaiyanāyaka, *Rājādhyaksha* Āpaiyāka and *Mahattama* Āmāditya and other good men inciting to charitable purposes (*dharmārthaprērakaiḥ*); and that the donation was made in the presence of the whole retinue (family).

The above grant portion is followed by usual imprecatory and benedictive stanzas. Unusually as many

as 16 stanzas occur here. The record concludes with a statement that kings should always feel pleased to protect grants made by bygone people to Brāhmaṇas and gods. After this the names of writer and the engraver of the grant, *viz.,* Prēkaraya, representative (*pratihastaka*) of *Pātalakaraṇī* Bharathanāyaka and Sēkārēyānāyaka, son of Stambu respectively. The charter actually concludes here with the auspicious words *maṅgalaṁ mahāśrī.*



No.33
STONE INSCRIPTIONS AT VAGHLI IN KHANDES

Location : Vāghlī, Khandesh District, Maharastra

Date : Śaka 991=1069 A.D.

Script : Nāgarī

Language : Sanskrit

King : Sēuṇachandra II

Dynasty : Yādavas of Dēvagiri

Reference : Kielhorn, F., *EI.,* II, pp. 221-228

Text

Metre: Vv. 1-3, 32-34 *Sragdharā;* 4, 5, 7, 8, 10, 13, 27-31, 35, *Vasantatilakā;* 6, 9, 12, *Śārdūlavikrīḍita;* 11 *Indravajra;* II part of inscription C 1-13 *Anushṭubh;* 14 *Śārdūlavikrīḍita;* 15 *Vasantatilakā*

Text of the Inscription A

ओं । . . . . ल्लसितरत्नमरीचि . . . ताः ।

चरणयुग्मसरोरुहरेणवो गणपतेर्व्विजयाय भवंतु वः ॥ ⊖

आदावव्यक्तमासीत्तदनुकमलजस्तत्सुतः कश्यपोभू

. . . . तदनुमनुरभूत्तत्सुतात्सूर्यवंशः ।

विख्यातः सर्वलोकेष्वमलनृपगुणैरन्वितः कीर्त्तिधर्म्मै

र्म्मान्धातुर्भूमिपालात्सकलगुणनिधेर्म्मौर्यवंशोबभूव ॥ १ ॥

आसीत्कैलासशृंगे रुचिरशशिसुधाशुभ्रगंगाप्रवाहे

दिव्यारामोपभोगातुरसुरनिकरोद्दुष्टकाम्यप्रलापे ।

सोमः सोमार्द्धभूषः सकलसुरनुतः कामचित्तप्रदोषः

सर्व्वेषां लौकिकानामशुभविहतये सोवतीर्ण्णः सुराष्ट्रम् ॥ २ ॥

तस्मिन्देशेस्ति रम्या विबुधसुरवराकीर्ण्णदेवालयाढ्या

मौर्याणां राजधानी वलभिरिति . . मण्डनं मण्डलानाम् ।

यस्यान्निःशेषविद्यासुनिशितमतयो ब्राह्मणा ब्रह्मतुल्याः

पौरा धर्म्मार्थकामत्रितयफलभुजः सन्ति मौर्यप्रसादात् ॥ ३ ॥

खड्गप्रहारदृढपाटितकुंभिकुंभमुक्ताफलप्रकरतारकितां दिनार्द्धे ।

रात्रिं चकार रुचिरां रुचिरप्रतापः श्रीकोकटः प्रवरमौर्यकुलप्रसूतः ॥ ४ ॥

श्रीतक्षकस्तदनु यस्य पराक्रमाग्नि

दंदह्यमा . . . . भग्नाः ।

गंगाजलेष्वभिलषंति ननु प्रपातं

शैत्याभिलाषिण इव द्विषतां समूहाः ॥ ५ ॥

भीमो भीमपराक्रमस्तदनु यो दृष्ट्वा बलं विद्विषां

सद्यो वैरि . . . . स्वर्ग्गे स्थित . . . न् ।

कालक्षेपकरं रिपुव्रजमिव क्रोधान्वितः सत्वरः

स्रष्टारं कृतसंस्तुती रणरसात्पक्षोद्गमं प्रार्थयत् ॥ ६ ॥

ओकेषु वाजिगजपत्ति . . . नेषु

. . . . सत्सु ।

शौर्यं करोति सकलोरिषु तस्य शौर्यं

सर्व्वेष्विति प्रगदितः स हि सर्व्वशूरः ॥ ७ ॥

गोविंदराज इति च प्रथितः पृथिव्या

मासीन्नृपस्तदनु यस्य . . . . . ।

गोविंदवत्सपदि चिंतितमात्रसिद्धा

स्तेनेति नाम स दधौ चरितार्थमुच्चैः ॥ ८ ॥

राजासाध्वसिकस्ततः परमभूद्यस्माद्रणे युध्यत

स्तस्यासी रिपुदंति . . . . ।

साधुः साधुरयंतवासिरमरैः स्वस्थैरिति श्लाघित

शत्रून्साध्वसिनः करोति यदि वा तेनेतिनामा नृपः ॥ ९ ॥

झंझाभिधाननृपतिः प्रथितो धरित्र्यां . . . . ।

संग्रामभूष्वभिमुखो रभसात्प्रधाव

न्धर्त्तुं न शक्य इति नामबभार सार्द्धम् ॥ १० ॥

श्रीदेवहस्तीति ततः क्षितीशो जज्ञे धरामंडलशीतरश्मिः ।

समस्तलो . . . . ॥ ११ ॥

श्रीमान्मुंजनरेन्श्वरः समभवत्तस्मान्नृपग्रामणी

र्यः सौभाग्यसुधासरित्परिवृढो रूपावधौतस्मरः ।

दुर्वारप्रमदाविलो . . . .

. . . . मुहुर्म्मंत्रवत् ॥ १२ ॥

पद्माकरो नरपतिः प्रबभूव तस्माद्युक्तः पदातिगजवाजिरथैरनेकैः ।

दानानि योभ्युदयधर्म्म

Text of the inscription C

गोदानभूमितिलदानहिरण्यवेश्म

वस्त्रान्नरत्नवरधान्यधनादि सर्व्वम् ।

संपूज्य यः प्रवरविप्रगणं प्रहर्षा

च्छश्वद्ददावमलमौर्यकुलप्रदीपः ॥ २७ ॥

यस्मिन्प्रशासति महीं महनीयकीर्त्तौ

पंग्वंधदीनविकला न जना बभूवुः ।

शश्वन्महोत्सवपरंपरया जनानां

धर्म्मार्थकामफलसिद्धिरखंडिताभूत् ॥ २८ ॥

यः प्रीणयत्यमृतगंधसुगंधमाला

धूपाक्षतप्रचुरदीपविचित्रभक्षैः ।

देवग्रहद्विजगुरून्पितृगोग्निमुख्या

न्गोविंदराजनृपतिः स सुखी सदा स्तात् ॥ २९ ॥

कर्पूरकुंकुमधनाधिपकर्द्दमेन

कस्तूरिकाजलविमिश्रितचंदनेन ।

आदौ विलिप्य शिवविप्रगुरूनुदारः

पश्चाद्विलेपनविधिं स्वयमन्वतिष्ठत् ॥ ३० ॥

यः पांथसार्थगुणिविप्रभुजिक्रियार्थं

दीनान्धवृद्धविकलस्य च तृप्तिहेतोः ।

सत्त्रं चकार नृपतिर्ब्बहुविद्यशिष्यै

र्व्विद्याविनोदनिरतैः परितोतिपूर्ण्णम् ॥ ३१ ॥

यद्भूपैरप्यशक्यं प्रवरवसुमतीदेशभोगाधिरूढै

र्न्निष्पत्त्यै यस्य तुच्छो धनदधनभृतः शेवधिः पद्मनामा ।

अत्युच्चं दिव्यभूषं सुरसदनसमं मंदिरं चंद्रमौलेः

कोन्यो गोविंदराजान्नरपतिरमलो मर्त्यलोके चकार ॥ ३२ ॥

ब्रह्मज्ञानामृतांतर्न्निभृतवरसरोराजहंसोमलांगो

राजश्रीचारुकान्तादयिततरतनुःपुण्यवृक्षस्य मूलम् ।

धात्रा सृष्टोयमेको जगति नरपतिः सज्जनानन्दकारो

शैवध्यानासिभिन्नस्वहृदयजतमोवृत्तिगोविन्दराजः ॥ ३३ ॥

अंतर्मीनावताराद्यभिनवतनुभिर्व्विष्णुरूपैरुपेतं

चक्रे सिद्धेशनाथावसथमतिमहत्सर्व्वभोगोपपन्नम् ।

सर्व्वेषां पार्थिवानां त्रिदिवपतिपुरारोहनिश्रेणिभूतं

गोविन्दो भूमिपालस्त्वमलनृपगुणैरन्वितःकीर्त्तिकामः ॥ ३४ ॥

वापीं चकार सुविमलोपलगाढबद्ध

सोपानपङ्क्तिसुरवेश्मनिविष्टदेवाम् ।

शश्वज्जलोर्म्मिबहुशुभ्रजलप्रवाह

संस्नापिताभिशपनामघनाशदक्षाम् ॥ ३५ ॥

रूपनंदांकतुल्ये तु ९९१ शककालस्य भूपतौ ।

सौम्यसंवत्सराषाढरविग्रहणपर्व्वणि ॥ १ ॥

महामंडलनाथस्तु श्रीमान्सेउणभूपतिः ।

सिद्धेश्वराय प्रददौ ग्रामद्वयमुदारधीः ॥ २ ॥

निजेन राजभोगेन संगमीं मधुवाटिकाम् ॥ ३ ॥

गोविंदराजोपि ददौ ग्रामयोर्मान्यभोगकम् ।

मेलकं देवपूजार्थं ग्राणकं दीपसिद्धये ॥ ४ ॥

पाटकं गीतनृत्यार्थं विलासिणिसमन्वितम् ।

तृष्कालं देवभोगार्थं गछकानां च भूमि . ॥ ५॥

विप्राणां भोजनार्थाय सत्त्रमुद्दिश्य शाश्वतम्।

विद्याभ्यासरतानां च छात्राणां भोजनाय च॥ ६॥

क्षेत्राणि यानि भूपालो ददौ तानि लिखाम्यतः।

वगलूकम्मतभूमेः पूर्व्वसीमा तु भंभि . ॥ ७॥

दक्षिणे देवलक्षेत्रं पश्चिमे जानिनस्तथा।

उत्तरे कारकग्राम आघाटा खलु नो मताः॥ ८॥

वखुलीक्षेत्रसीमास्तु पूर्व्वदक्षिणपश्चिमाः।

मार्गकंमतसिद्धेशभूमयस्तूत्तरो वहः॥ ९॥

वनकूटकभूमेश्च नदी पूर्व्वोत्तरोवधिः।

दक्षिणे च वहः सीमा पश्चिमे ग्रामभूरपि॥ १०॥

वटयक्षिणिवाटे तु पूर्व्वा कार्पटिकस्य भूः।

दक्षिणे देवलक्षेत्रं पश्चिमे गोपथोवधिः॥ ११॥

उत्तरे वटकूपौ च आघाटाः परिकीर्त्तिताः॥ १२॥

षोडशैव ददौ राजा विद्याव्याख्यानकारिणे।

निवर्त्तनानि भूमेस्तु पुण्यव्याख्यानकारिणे॥ १३॥

क्षत्राचारविचारवाक्पटुरभूद्गोविन्दनामा नृप

स्तद्राज्ञी किल नायकी भवभयाद्भक्ता सदा या हरे।

ताभ्यां शंकरमंदिरं सुरुचिरं निष्पाद्य विस्तारिता

कीर्त्तिर्द्धर्म्मयशः कुलं च विमलं प्रद्योतितं चात्मनः॥ १४॥

ये पालयन्ति पृथिवीपतिदानमेत

त्ते प्राप्नुवन्त्यमरलोकसमस्तभोगान् ।

राज्यं च शश्व . . . .

. . . हस्तितुरगाढ्यबलैरुपेताः ॥१५॥

ये लोपयन्ति नृपदानम . . लोभात्ते प्राप्नुवन्ति . . . .

Summary

Three large stones in the Mānbhāva temple at Vāghalī bear damaged Sanskrit inscriptions. Though damaged they are not altogether illegible. All the three inscriptions form part of a single inscription, which records that a Chief Gōvindarāja of the Maurya clan, a feudatory of the Yādava king Sēuṇa II, built the temple at which the inscription was put up, and made various donations in favour of it.

The three parts of the inscription contained on the three stones are denoted by the letters A, B and C.

A.-This inscription contains 14 lines of writing. On the proper right side the writing is much damaged and partly altogether illegible, but everything of importance may be read with certainty.

The inscription opens with a verse invoking the blessing of Gaṇapati. Verse 1 describes the origin of the solar race, and tells that from Māndhātṛi, a prince of that race, sprang the Maurya family. Verse 2 relates how the god Śiva came for the welfare of the people to settle in the country of Surāshṭra; verse 3 mentions the city of Valabhi, the capital of the Mauryas, the Brāhmaṇa citizens of which enjoy all the blessings of life through the favour of Mauryas. Verses 4-13 then record the names of a series of princes or chiefs, the first of whom is stated to have been

born in the Maurya family, and each of whom has a verse, eulogizing his valour, allotted to him. This list is as follows:-

1. Kīkaṭa, born in the Maurya family (v.4)

2. After him came Takshaka (v.5).

3. After him, Bhīma (v.6).

4. Sarvaśūra (v.7)

5. After him came the prince Gōvindarāja (v.8).

6. After him the prince Sādhvasika (v.9)

7. The prince Jhañjha (v.10).

8. From him was born the prince Dēvahastin (v.11).

9. From him, the prince Muñja (v.12).

10. From him, the prince Padmākara (v.13).

B:- This inscription contains fragments of 16 lines of writing. It is stated that owing to the damaged state of the stone a text of this inscription cannot be furnished, but there is no doubt that the inscription is in continuation of the preceding inscription A. This inscription contains verses 14-26. It is stated further that exactly like the verses 4-13 of the inscription A, each of the verses 14-24 gave the name of one prince, and that the eleven verses together therefore record the names of eleven princes, who one after another succeeded the prince Padmākara, spoken of in verse 13. The names of two immediate successors of Padmākara (the 11th and 12th members of the family), which must have been contained in verse 14 and 15, are broken away or no longer legible. Further on the following are mentioned:-

13. Vappaiya (v.16).

14. Vappaiya's son (v.17).

15. Vālaparāja (v.18).

16. Sādhvasika (v.19).

17. Śāntirāja (v.20).

18. Pravarasūkara (v.21).

19. Bhāilēka (v. 22).

20. Bhīmarāja (v.23).

21. Gōvinda (v. 24).

No further names seem to occur in the short passages which remain of the verses 25 and 26.

C:- This inscription contains 18 lines of writing of which lines 1-16 are well-preserved. The inscription commences with a verse which is numbered 27, and which thus at once shows it to be the continuation of the inscription B, which ends with verse 26. The inscription divides itself into two portions, the first of which, extending to nearly the end of line 9, comprises the nine verses 27-35. This part eulogizes the piety of a prince Gōvinda or Gōvindarāja, who in line 27 is styled *Mauryakula-pradīpa* and who evidently is Gōvinda spoken of in verse 24 of the inscription B; and in particular it records the foundation by this prince of a *sattra* or hall of charity for travellers and for the learned and indigent, and the erection of a temple of Śiva, under the name of Siddhēśanātha or Siddhēśvara, with a tank or well attached to it. Probably the temple is the same at which the inscription is still preserved.

The second part of the inscription, the verses of which are numbered separately, opens with the date, Śaka year 991, Saumya, Āshāḍha (*amāvāsyā*) coinciding with a solar eclipse, on which *mahāmaṇḍalanātha,* the king Sēuṇa, *i.e.* Yādava king Sēuṇachandra II granted to the temple of Siddhēśvara the two villages of Saṁgamī and Madhuvāṭikā, together with the income due from them to the king himself (*nijēnarājabhōgēna*) (vv. 1-3).


Gōvindarāja's donations are enumerated in the verses 4-13. He provided for the worship of the god in the temple founded by him (vv. 4-5); for the support of the learned men and their pupils who resorted to his *sattra*, he gave four fields which are described as *Vagalūkammata-bhūmi, Vakhulīkshētra, Vanakūṭakabhūmi* and *Vaṭayakshiṇivāṭa* (vv.6-12); and he besides granted sixteen *nivartanas* of land to certain secular and religious teachers (v.13).

The concluding lines of the inscription once more state that the temple, referred to in the preceding, was founded by the prince Gōvindarāja and his wife, the *rājñī* Nāyakī (v. 14), and contain the usual admonition to future rulers to watch over, and not to resume, the donations here recorded.

As Gōvindarāja himself is indirectly described as a feudatory of a Yādava king, it may be assumed that his ancestors or at least some of them owed allegiance to the same family, and that these Mauryas came from Kāṭhiāvāḍ to Khāndeś together with the Yādavas, 'the lords of Dvārāvatī'[1]

Note

1. It has been observed that nowhere any trace of Yādavas is found in Saurastra where Dvārakā is situated. Further, the Karnataka origin of the Yādavas has been established beyond doubt (*A History of Karnataka*, pp. 225-226).



No.34
ASVI PLATES OF YADAVA AIRAMADEVA
SAKA 1020

Location	: Āśvī, Ahmadnagar District, Maharashtra
Date	: Śaka 1020=1098 A.D.
Script	: Nāgarī
Lauguage	: Sanskrit
King	: Āiramadēva
Dynasty	: Yādavas of Dēvagiri
Reference	: G.S. Gai, *El.,* XXXVI, pp. 249-256

Text

Metre: Vv. 1 *Mandākrāntā;* 2-8 *Śārdūlavikrīḍita;* 9, 10, 14-22 *Anushṭubh;* 11 *Śālinī;* 12, 13 *Indravajrā*

सिद्धम् ॥ स्वस्ति जयोभ्युदयश्च ॥

त्रैलोक्यं संसृजति भगवाल्लब्धमाहात्म्यतेजः

चिन्तागम्यः परमतपसां योगिनां ध्यायतां यः ।

अप्रत्यक्षं भवति विबुधानामपि प्रायशोसौ

देवः सोयं यदुपतिपतेः शंकरः शं करोतु ॥ १ ॥

आदौ ख्यातदृढप्रहारनृपतिः श्रीविष्णुरूपः स हि
प्रायातो निजवंशशेखरतनुर्द्वारावतीपत्तनात्।
संग्रामे रिपुहस्तिपत्तिशिरसां संच्छेदभेदे दृढः
चंद्रादित्यपुरं प्रसिद्धमकरोत् प्राक्संभवं यो भुवि ॥ २॥
श्रीमत्सेवुणचन्द्रनाम नृवरस्तस्मादभूद्भूमिपः
नित्यं देशपदातिराजविषये स्वन्नाम संपादयन्।
येनाकारि पुरं च सेउणपुरं श्रीसिंहिनेरे वरे
तत्पुत्रः कुलदीपको गुणनिधिः श्रीधाडियप्पस्ततः ॥ ३॥
आसीत्तद्वदशेषभूतलशशीश्रीमान्बृहद्भिल्लमः
श्रीराजस्तदनंतरं नरपतिर्ज्जातो महीमंडनः।
अर्व्वाक्तस्य बभूव भूतलहरिः श्रीवद्दिगाख्यो नृपः
तस्मात् श्रीवरभिल्लमः क्षितिपतिः प्रत्यक्षधर्म्मोभवत् ॥ ४॥
भार्या यस्य च झंझराजतनया श्रीलच्छियव्वाह्वया
धर्म्मत्यागविवेकबुद्धिसगुणा श्रीराष्ट्रकूटान्वया।
या जाता नवबालराजसमये यस्यान्वयाद्धारिता
सप्तांगोद्यतराज्यभारधरणात् राज्यत्रयाध्यर्या ततः ॥ ५॥
श्रीवेसूकमहीपतिः समभवत् यस्यांगश्लिष्टस्ततः
श्रीभिल्लमधराधरः समुदितः श्रीमंडलीकाख्यया।
त्रैलोक्ये निजवंशकीर्त्तिनिर्म्मलतया संभूषयन् यादवः
दक्षो दक्षविमर्द्दनस्य चरणौ संपूजयन् यो भुवि ॥ ६॥
तद्वंशोद्भवसेउणेंदुनृपतिर्ज्जातोत्र धर्म्माधिकः

सर्व्वान्भूवलयाश्रितान् क्षितिपतीन् निर्ज्जित्य शौर्य्यासिना।
राज्यं येन समुद्धृतं सविकलं स्वर्ग्गं गते भिल्लमे
यद्वत्सूकररूपसाम्यहरिणा लोकत्रयं चोद्धृतम्॥ ७॥
तत्पुत्रो नृपतित्रयैकतिलको वैरीभकंठीरवो
वीरः शूरविपक्षपक्षदलनो राजाइरम्मोभवत्।
येन श्रीभुवनैकमल्लमजितं निर्जित्य सप्तांगकं
राज्यं श्रीपरमर्द्दिने क्षितिभृते दत्तं स्वसेवाक्रमात्॥ ८॥
भार्या यस्याभवद्देवी लक्ष्मीरिव भुवि स्वयम्।
श्रीयोगल्लेति यन्नाम्ना रंजितं भुवनत्रयम्॥ ९॥
शकनृपकालातीतसंवत्सरसहस्रैके विंशत्यधिके

अंकतोपि। संवत् १०२० बहुधान्यसंवत्सरान्तर्ग्गत वैशाखमासे सोमदिने अमावास्यायां नर्म्मदायां नर्म्मदापुरे श्रीसिद्धेश्वरक्षेत्रे ब्रह्मतीर्थे कपितीर्थे च वैशाखवदि १५ सोमे। अद्येह श्रीनर्म्मदापुरे। समस्तभुवनाश्रय-श्रीपृथ्वीवल्लभमहाराजाधिराजपरमेश्वरपरमभट्टारकसत्याश्रयकुलतिलक-चालुक्याभरणश्रीमत्त्रिभुवनमल्लपेर्माडिदेवविजयराज्ये। सेउणदेशे। समस्तराजावलीविराजितमहामंडलेश्वरश्र्याइरमदेवेन पंचप्रधानानुम-तेन॥ करहाटविनिर्ग्गतकाश्यपगोत्रान्वय शाकलशाखाप्रसूताय। तस्य च पूर्व्वपुरुषाः। नागणक्रमवित् तत्पुत्रः सूदनभट्टः। तस्मात्गोपति-भट्टः। तत्पुत्राय कूकलपंडिताय। यमनियमस्वाध्यायध्यानानुष्ठानरताय। त्रिंशद्ब्राह्मणसहिताय। सेउणदेशे श्रीनगरसार्द्धसहस्रद्वयसंबद्धसंगमनेर-चतुराशीतिमध्ये कोंकणेग्रामः पादप्रक्षालनं कृत्वा मौलिकृतहस्तद्वयेन

परमश्रेयोर्थं शासनयुक्तो दत्तः॥ सवृक्षमालाकुलः सकाष्ठतृणोदकः। निधिनिक्षेपगिरिनदनदीसहित एतद्ग्रामसीमायां पूर्व्वतः दुंदूदेवः आग्नेय्यां कोनचीग्रामः दक्षिणतः मणियवलिग्रामः नैर्ऋत्यां जुंयरवेग्रामः। पश्चिमतः वडगवग्रामः वायव्यां संगंवीग्रामः उत्तरतः कपथकग्रामः ऐशान्यां मेषीपानीयं। एवं अष्टाघाटोपलक्षितः ग्रामोयं शासनेन दत्तः॥

परत्र सबलं दिव्यं भूमिदानात्परं नहि
तस्मात्सर्व्वप्रयत्नेन भूमिदानं प्रपालयेत्॥ १०॥

सामान्योयं धर्म्मसेतुर्नृपाणां
काले काले पालनीयो भवद्भिः।
सर्व्वानेतान् भाविनः पार्थिवेन्द्रान्
भूयो भूयो याचते रामभद्रः॥ ११॥

मद्वंशजाताः परवंशजा वा
ये पुण्यवंतो मम धर्म्ममेतम्।
प्रपालयिष्यंति नृपास्तु सर्व्वे
कृतांजलिस्तेभ्य इदं ब्रवीमि॥ १२॥

यानीह दत्तानि पुरा नरेन्द्रैः
दानानि धर्म्मार्थयशस्कराणि।
निर्म्माल्यतुल्यानि भवंति तानि
को नाम साधुः पुनराददीत॥ १३॥

गयागोदावरीगंगाप्रयागादिषु दानतः।
यत्पुण्यं तत्फलं सर्वं भवेद्भूदायपालनात्॥ १४॥

बहुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः ।

यस्य यस्य यदा भूमिः तस्य तस्य तदा फलम् ॥ १५ ॥

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।

षष्टिवर्षसहस्त्राणि विष्ठायां जायते कृमिः ॥ १६ ॥

भूमिं यः प्रतिगृह्णाति यस्तु भूमिं प्रयच्छति ।

उभौ तौ पुण्यकर्म्माणौ नियतं स्वर्ग्ग गामिनौ ॥ १७ ॥

न विषं विषमित्याहुः ब्रह्मस्वं विषमुच्यते ।

विषमेकाकिनं हंति ब्रह्मस्वं पुत्रपौत्रिकम् ॥ १८ ॥

विंध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।

कृष्णसर्पा हि जायंते ब्रह्मदेयापहारकाः ॥ १९ ॥

अहो राघवराजेन्द्र सप्त कल्पं हि वेद्म्यहम् ।

न श्रुतो न मया दृष्टः स्वयं दत्तापहारकः ॥ २० ॥

चंद्रार्क्कौ च तथा भूमिर्नभश्चापस्तथानिलः ।

तारकाश्चानलश्चैव धर्म्मराजस्तथैव च ॥ २१ ॥

तिस्त्रः संध्यास्त्रयो वेदा अग्नयश्च त्रयस्तथा ।

अहोरात्रं च दानस्य एते वै साक्षिणः स्मृताः ॥ २२ ॥

यादवान्वयेन श्रयाइरमदेवेन कोंकणे ग्राशासनं दत्तम् ॥

पुत्रपौत्रादिभिः पालनीयम् ॥ श्रोत्रद्रम्माश्च ॥ सुवर्ण्णवट्टकेन तांबूलं दातव्यम् ॥ लिखितं पावलकरणि श्रीहरिश्चन्द्रेण ॥ मंगलं महाश्रीः ॥

Summary

This inscription, engraved on a set of 3 copper-plates, consists 85 lines of well-executed and well-preserved writing. The plates are strung together with an elliptical ring, the ends of which are secured to a circular seal bearing the figure of a seated Garuḍa, facing full front. The composition of this record is a mixture of prose and verse and faulty in some places. The engraver has also committed several mistakes.

The inscription belongs to the time of the king Tribhuvanamalla-Permāḍidēva (*i.e.* Vikramāditya VI) of the Western Chālukya dynasty of Kalyāṇa and his feudatory *Mahāmaṇḍalēśvara* Āiramadēva of the early Yādava dynasty of Sēuṇadēśa. It records the gift of a village by the latter, made in favour of a certain Kūkala-paṇḍita and 30 other Brāhmaṇas.

The importance of the inscription lies in the fact that it is the only known record of the Yādava chief Āiramadēva discovered so far. The record opens with the *Siddham* symbol followed by a verse invoking Śaṅkara (v.1) for the welfare of the Yādava king (*Yadupati-pati*) *i.e* Āiramadēva. Verses 2-7 are devoted to the introduction of the predecessors of the ruling chief Āiramadēva, from Dṛiḍhaprahāra to Sēuṇachandra II. All these 7 verses are found in the Bassien plates of Sēuṇachandra II, the father and predecessor of Āirama (No.32 above), and the two Yādava charters from Dēvalāli. Here it is to be remarked that verse 7 of the Āśvī plates is exactly the same as verse 10 of the Bassien plates, whereas its purport is contained in verses 1 and 2 of the Dēvalāli charter of Sēuṇachandra II (No.32 above). Verse 8 introduces Āirama, son of

Sēuṇachandra II, who is also stated to have defeated Bhuvanaikamalla, *i.e.* Sōmēśvara II and to have offered the kingdom to Paramardin, *i.e.* Vikramāditya VI. Sēuṇachandra II is known from his Dēvalāli epigraph and Hēmadri to have sided and helped Vikramāditya VI in his fight against Sōmēśvara II and placed the former on the Kalyāṇa throne. Thus, both the father and the son, *viz.*, Sēuṇachandra II and Āirama helped Vikramāditya VI in his struggle for Kalyāṇa thorne. Yōgallā, wife of Āirama is introduced in verse 9.

This is followed by the date of the grant, *viz.*, Śaka 1020, Bahudhānya, Vaiśākha amāvāsyā, Monday, regularly corresponding to the 3rd May 1098. It is stated then that on this date *Mahāmaṇḍalēśvara* Āiramadēva made a grant, with the consent of the *pañcha-pradhāna,* while Tribhuvanamall Permāḍidēva, *i.e.* Vikramāditya VI was the supreme king. At the time of the grant Āirama was at Narmadāpura on the banks of the river Narmadā. We are further informed that the gift was made to Kūkala-paṇḍita and 30 other Brāhmaṇas. Kūkala-paṇḍita was the son of Gōpati-bhaṭṭa, grandson of Sūdana-bhaṭṭa and great-grandson of Nāgaṇa-kramavit who belonged to the Kāśyapa-*gōtra* and Śākala-*śākhā* and who had emigrated from Karahāṭa[1]. The gift consisted of the village Kōṁkaṇē[2] in Saṁgamanēra[3]-84, situated in Śrīnagara[4]-2500 in Sēuṇadēśa[5]. The boundaries of the gift-village mentioned are: to the east Dundūdēva[6]; to the south-east, the village Kōnachī[7]; to the south, Maṇiyavali[8] village; to the south-west, Juṁyaravē[9] village; to the west, Vaḍagava[10] village; to the north-west Saṁgaṁvī village, to the north Kapathaka[11] village; and to the north-east,

Mēshī-pānīya[12]. The privileges of the gift included trees, grass, water, treasure trove, hills and rivers.

The above grant portion is followed by the usual imprecatory and benedictory stanzas which are 13 in number. Then the information that Āiramadēva of the Yādava family granted the village Kōṁkaṇē is repeated. This is followed by the statement that the gift should be protected by the sons and grandsons of the donor. The sentence that follows appears to stipulate that the donee should pay some *drammas* as taxes (*śrōtra*) to the king. Thus the present grant seems to be a *karaśāsana*. The charter ends with the statement that it was written by Hariśchandra.

Notes

1. Karahāṭa is modern Karhad in Satara District of Maharashtra (*El.*, XXXVI, p.251).

2. The gift-village Kōṁkaṇē-grāma is represented by modern Komkangaon, 7 ½ miles to the east of Saṅgamnēr (*ibid.*).

3. Saṁgamanēra, the headquarters of the territorial division Saṁgamanēra-84, is modern Saṅgamnēr, 50 miles to the north-west of Ahmadnagar (*ibid.*)

4. Śrīnagara, the headquters of the division Śrīnagara-2500 is represented by modern Sinnar, 17 miles south-east of Nasik. It is also called Simhinēra (*ibid.*).

5. Sēuṇadēśa is the area round about the Nasik District of Maharashtra (*ibid.*)

6. Dundūdēva may be modern Dudhēśvara temple and hill, about 10 miles east of Saṅgamnēr (*ibid.*).

7. Kōnachī-grāma is modern Konchi, 10 miles east of Saṅgamnēr on the slope of the Dudhēśvara hill (*ibid.*).

8. Maṇiyavali-grāma is Manoli, 8 miles to the east of Saṅgamnēr (*ibid.*).

9. Juṁyaravē-grāma is represented by modern Jorve, a small village on the north bank of the Pravarā river, 5 miles east of Saṅgamnēr (*ibid.*).

10. Vaḍagava-grāma is modern Wadgaon, 5 miles east of Saṅgamnēr (*ibid.*).

11. Kapathaka-grāma may be modern Kavathe-Kamalēśvar, 10 miles north of Saṅgamnēr (*ibid.*).

12. Mēshī-pānīya appears to be the name of a stream (*ibid.*).



No.35

ANDHRA SAHITYA PARISHAD PLATES OF SAKTIVARMAN

Location : Andhra Sahitya Parishat

Date : 999-1011 A.D.

Script : Telugu-Kannaḍa

Language : Sanskrit

King : Śaktivarman

Dynasty : Eastern Chālukya

Reference : Krishna Rao, B.V., *EI.*, XXXVI, pp. 191-198

Text

Metre: Vv. 1, 3, 6 *Sragdharā;* 2 *Praharshiṇī;* 4-5, 9-11, 25, 28 *Anushṭubh;* 7, 12, 21-23, 29 *Śārdūlavikrīḍita;* 8, 13-16 *Vasantatilakā;* 17-20 *Āryā-gīti;* 24, 26-27 *Āryā*

स्वस्ति श्रीमताम् सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारितीपुत्राणां कौशिकीवरप्रसादलब्धराज्यानां मातृगणपरिपालितानां स्वामिमहासेन-पादानुध्यातानां भगवन्नारायणप्रसादसमासादितवरवराहलांछनेक्षण-क्षणवशीकृताराातिमण्डलानामश्वमेधावभृथस्नानपवित्रीकृतवपुषां चलि-क्यानां कुलमलंकरिष्णोः सत्याश्रयवल्लभेन्द्रस्य भ्राता कुब्जविष्णुवर्द्ध-नोष्टादशवर्षाणि वेंगीदेशमपालयत्॥ तदात्मजो जयसिंहस्त्रयस्त्रिंशतम्। तदनुजेन्द्रराजनन्दनो विष्णुवर्द्धनो नव। तत्सूनुर्म्मंगियुवराजः पंच-विंशतिम्। तत्पुत्रो जयसिंहस्त्रयोदश। तदवरजः कोक्किलिः षण्मासान्। तस्य ज्येष्ठो भ्राता विष्णुवर्द्धनमुच्चाट्य सप्तत्रिंशतम्। तत्पुत्रो विजयादि-

त्यभट्टारकोष्टादश । तत्सुतो विष्णुवर्द्धनष्षट्त्रिंशतम् ।

तत्सूनुर्भानुभासो रणविगणनया नीलकण्ठालयानां

सग्रामारामकानां सललितरमणीसंपदां सत्पदानाम् ।

कृत्वा प्रोत्तुंगमष्टोत्तरशतमभुनग्वीरधीरोष्ट्युक्ता

श्चत्वारिंशत्समाः क्ष्मां जननुतविजयादित्यनामानरेन्द्रः ॥ १ ॥

तत्सूनुस्सततमनूनवृष्टिंदीनांधद्विजगणिकार्त्थिसार्थसस्याम् ।

सन्तोषं सकलमवापयनपाद्गामत्यर्द्धं किल कलिविष्णुवर्द्धनोब्दम् ॥ २ ॥

तत्प्रियतनयः ॥

अङ्गात्संग्रामरंगे निजलसदसिनामंगिराजोत्तमांगं

तुंगाद्रेः श्रृंगमुर्व्यामशनिरिव मुदापातयत्कन्नरांकम् ।

निश्शंकं शंकिलेन प्रथितजनपदाद्दुर्ग्गमान्निर्ग्गमय्य

द्राग्धावन्यत्प्रवेश्य प्रभुरभयमनाः प्रत्यपाद्वद्देगांकम् ॥ ३ ॥

सश्रीमान्विजयादित्यश्चतुर्भिर्भ्रातृभिस्सह ।

चत्वारिंशत्समासार्द्धं चतुर्भिरभुनग्भुवम् ॥ ४ ॥

तद्भ्रातुर्विक्रमादित्य भूपतेस्सच्चमूपतेः ।

विलसत्कण्ठिकोद्दामकण्ठस्य तनयो नयी ॥ ५ ॥

दीनानाथातुराणां द्विजवरसमितेर्य्याचकानां यतीनाम्

नानादेशागतानां पटुवटुनटसद्गायकानां कवीनाम् ।

बन्धूनामान्धकानामभिलषितफलश्राणनाद्रक्षणाद्यो

मातेव त्रिंशदब्दान् सममभुनगसौ चारु चालुक्यभीमः ॥ ६ ॥

तत्पुत्रः स्वभुजासिखण्डित . . . . द्वलाद्वासवीं

जित्वाशां विरजे प्रतिष्ठितजयस्तंभः प्रसिद्धो रणे।
स्वर्णारूढ तुलोत्र बाढमतुलो धात्रीतलेक्षत्रिये
मित्राभाः परिरक्षति स्म विजयादित्यः समार्द्धां धराम्॥ ७॥
तस्यात्मजः प्रणतवैरिशिरोविलग्न
रत्नद्विरेफपरिचुंबितपादपद्मः।
मेरुं हसंस्तुलितहाटकराशिभासा
वर्षाणि सप्त समपाद्भुवमम्मराजः॥ ८॥
तत्सुतं विजयादित्यं बालमुच्चाट्य लीलया।
ताळाधिपतिराक्रम्य मासमेकमपाद्भुवम्॥ ९॥
तं जित्वा युधि चालुक्यभीमभूमिपतेस्सुतः।
विक्रमादित्यभूपोपान्मासानेकादश क्षितिम्॥ १०॥
ततस्ताळपराजस्य सूनुस्सूनृतवाक्प्रभुः।
युद्धमल्लधराधीशसप्त वर्षाण्यपाद्भुवम्॥ ११॥
सन्नद्धं युधि युद्धमल्लमवनेर्न्निर्द्धाट्य धाट्याहर
त्कृत्वा भिन्नरथानपि पराञ्शिष्टांश्च शिष्टेतरान्।
श्रीमत्कोल्लभिगण्डनामाविजयादित्यात्मजस्सादरं
भीमो भीमपराक्रमस्समभुनग्धात्रीं समा द्वादश॥ १२॥
तस्याम्मराज इति सूनुरथापि गर्भे
यः कण्ठिकारचितकण्ठयुजात्तवृत्त्या।
बद्ध्वा समस्तजनपार्थिकराज्यपट्टं
भूदेवदेवहितमेव ततान शश्वत्॥ १३॥

आधोरणाधिकविरोधिगजावसादा

न्मध्येरणम् त्रिभिवनांकुशनाम यस्य

आ .. तासु चिरमाप गजप्रियत्वं

सिंहस्य शौर्य्यविजयाच्च कृतात्र्थभावम् ॥ १४ ॥

. . . . जन्मा यः पंचविंशतिसमास्समरक्षदुर्व्वी ।

द्वैमातुर . . . . . दरातिवर्ग्गश्रीराजभीमतनयो नयनाभिरामः ॥ १५ ॥

श्रीराजनारायण . . . ।

दानार्ण्णवस्समधरीकृतकर्ण्णदानः

क्षोणीशमौलिमणिरंजितपादपीठः ।

विद्यानिधिर्ब्बुधनिधिः प्रथनप्रधान

स्तिस्त्रसमास्समभुनक्सकलां धरित्रीम् ॥ १६ ॥

दानार्ण्णवभूमिपतेरनु दैवकृतेन सप्तविंशत्यब्दान् ।

आसीदराजिकेयं बहुलनिशेवान्ध्रभूमिरन्धम् ॥ १७ ॥ अत्रावसरे ॥

आर्य्यादेव्यास्तस्य च दाननरेन्द्रस्य शक्तिवर्म्मेति ।

शक्तित्रयसंयुक्तस्तनयो नयविनयशौर्य्यसम्पन्नः ॥ १८ ॥

यस्येन्दुधवलभावात्कीर्त्तिर्ब्रह्माण्डमण्डपस्य सुधेव ।

तन्मध्ये दीप इव यत्तेजःप्रसरो विभासते शश्वत् ॥ १९ ॥

अरिकरटिघटीकुंभस्थलदलनस्थगितमौक्तिकावलिराजौ ।

पुष्पावलिरिवराजति खड्गलताया स्फुटतरम्यदीयायाः ॥ २० ॥

बाल्ये कीर्त्तिरलाभि चौलिकरणे येन व्रणोद्भासिना

येनात्युद्धतवद्येमाधिपमहाराजादयो विद्रुताः ।

यस्तीक्ष्णानुरसा परिक्षतचरो हत्वा रिपुप्रेषितान्

लोकेदर्शयदात्मसारमसमः श्रीशक्तिवर्म्माधिपः ॥ २१ ॥

स्वंरूपं परिहृत्य दैत्यनिकरान्मत्स्याद्यलीकात्मतां

प्राप्य प्राग्जितवान्किलेति हसता नारायणं चेतसा ॥

ईशस्संयति रावणप्रतिनिधिश्चालुक्यनारायणे

नापास्तद्विषतापि येन निधनं श्रीचोडभीमाधिपः ॥ २२ ॥

माद्यद्दारुणवारणेभमकरं वीरावलीनक्रकं

कीलालांबुविलोलमश्वलहरीमालासहस्राकुलम् ।

निर्म्मर्थ्योत्कलिकाधिनाथरथिनीवार्द्धिं स्वबाहूबलात्

तत्रत्यां श्रियमाददाति युधि यश्चालुक्यनारायणः ॥ २३ ॥

स सर्व्वलोकाश्रयश्रीविष्णुवर्द्धनमहाराजाधिराजपरमेश्वरपरमभट्टारकपर-

मब्रह्मण्यपरममाहेश्वरः वरनाण्डुविषयनिवासिनो राष्ट्रकूटप्रमुखान् कुटुंबि-

नस्सर्व्वान्समाहूय मन्त्रिपुरोहितसेनापतियु .... रिकाद्ध्यक्षा ....

.... प्य . ये वरीयाः भारद्वाजाब्धिरपार ....

कलशास्त्रो जातः ॥ २४ ॥

आसीत्तस्य सुतस्सत्यकामवा ... चार्य्याह्वयः ।

सत्य ..... कर्म्मनिरतो योर्त्थैर्दानचोदितः ॥ २५ ॥

.... लितन्नयवतां सार्द्धमाश्रवण

प्रत्याश्रवणयाष्ट .... महायज्ञीयः ॥ २६ ॥

अथ वेन्नमय्यनाम्नस्तस्य सू .....

..... मादित्योजनि द्विजकुलोत्तमः ॥ २७ ॥

जात . . . . म . . . . . तत्त्वश्च व . . . . . . व्याकरण

. . . . . . प्रक्षालनवारिणातिशी . . प्रक्षालितपापमलः ॥ २८ ॥

यश्शश्वद्बुधबन्धुदीनविततेर्ण्णत्याहितार्त्थप्रदो

यस्साहाय्यापते . न्निजपतेः कार्य्यस्य खड्गस्य च ।

भारद्वाजमुनेर्म्मुनिस्तुतमतेः म . मातॄणां हि

स्वगोत्रपरिवर्त्तमानममनो . . . युधि स्थिरधीः ॥ २९ ॥

तस्मादभ्यधिकोभवन्गुणवीर्य्यवसक

Summary

This incomplete inscription was originally engraved on 5 or 6 copper-plates. The ornamental seal which bears in relief the usual Chālukyan emblem and the well-known legend *Śrī-Tribhuvanāṁkuśa* in bold characters, now carries only 4 of these plates of the set. The remaining 1or 2 plates are missing. Even plates extant are so badly damaged that their contents could not be read entirely.

Notwithstanding the serious nature of the damage to the plates, the matter in the first two plates can be pieced together and re-constructed with the help of the published copper-plate inscriptions of the dynasty. But much of the important information about the donor and the donee and their ancestors is lost. The date portion of the record, if it existed in the original, is lost. Nevertheless from verses 22 *etc.* it is obivious that the present charter belonged to the reign of Śaktivarman I of the Eastern Chālukya dynasty. The text of the record is written in an admixture of prose and verse. The inscription records some grant made by the king Śaktivarman I.

The inscrption begins with the auspious word *svasti* followed by the usual introduction of the Chālukya

family, *viz., Śrīmatām sakala-bhuvana-saṁstūyamāna, etc.* Then follows the usual genealogical list of the Eastern Chālukya kings, giving the names and duration of reign in each case, starting from Vishṇuvardhana I, the founder of the dynasty, downwards to Śaktivarman, the donor of the present grant.

The prose passage following introduction gives the following genealogy: Kubja Vishṇuvardhana (*i.e* Vishṇuvardhana I), the brother of Satyāśraya Vallabhēndra (18 years); his son Jayasiṁha I (33 years); Vishṇuvardhana II, the son of his younger brother Indrarāja (9 years); his son Maṁgiyuvarāja (25years); his son Jayasiṁha II (13 years); Kōkkili, his younger brother (6 months); his eldest brother Vishṇuvardhana III (37 years); his son Vijayāditya I (18 years); his son Vishṇuvardhana IV (36 years). The charter then describes in verse, Vijayāditya II *alias* Narēndra as the establisher of a hundred and eight temples of Nīlakaṇṭha (Śiva) to reckon as many victorious battles that he had fought and states that he reigned for 48 years (verse 1). The next verse praises the rule of his son and successor Kali Vishṇuvardhana (V) who reigned for an year and a half. Verses 3-4 describe Kali Vishnuvardhana's son and successor, Vijayāditya III as one who severed with his glittering sharp sword, the head of Maṅgi[1] in the battlefield, chased Kannara[1] and Śaṅkila[1] into the impregnable country, protected Baddega[1] from fear and ruled the kingdom along with his four brothers for 44 years. His brother was commander Vikramāditya, whose victorious son Chālukya Bhīma I, well-versed in polity and generous, ruled for 30 years (verses 5 and 6). Chālukya Bhīma I's son was Vijayāditya IV, who having conquered the eastern region and having set up a pillar of victory at Viraja,[2] ruled for six months (verse 7). His (Vijayāditya's) son Ammarāja I ruled for 7 years (verse 8). Tāḷa I having overthrown the boy–king Vijayāditya V,

the son of Amma (I), ruled the earth for a month; defeating Tāḷa in battle, Vikramāditya II, son of Chālukya Bhīma I, ruled for eleven months; thereafter Yuddhamalla II, son of Tālapa (I) ruled for 7 years (verses 9-11). Bhīma II, son of Kollabhigaṇḍa Vijayāditya IV, protected and ruled the earth for 12 years having attacked, defeated and expelled Yuddhamalla (II) from the country (verse 12). Bhīma (II)'s son Ammarāja II earned the title *Tribhuvanāṁkuśa* by destroying the powerful elephant corps of the enemies and ruled the earth for 25 years. Then Dānārṇava who was the son of Bhīma (*i.e.* Chālukya Bhīma II) and step-brother of Amma (II) and who bore the epithet *Rājanārāyaṇa,* ruled the kingdom for three years (verses 13-16). On Dānārṇava's death there was anarchy for 27 years (verse 17). Dānārṇava's son by Āryādēvī was Śaktivarman who, while yet a boy exhibited his unequelled might to the entire world in his battle for the Chōḷas (*Chaulika-raṇa)* and routed the haughty princes Baddema and Mahārāja. He (*i.e.,* Chālukya–Nārāyaṇa) laughing within himself at god Nārāyaṇa who had to assume different forms to destroy his enemies, killed, in his own form the wicked Rāvaṇa–like Chōḍa Bhīma and seized the goddess of fortune on the battlefield after destroying thousands of horses and the vast sea of chariots of the lord of Utkala (verses 18-23).

Eventhough the prose passage following this containing details of the grant is badly damaged, from the extant portion of the writing, it can be made out that the king Vishṇuvardhana, having assembled the farmers and officials of Vaṟanāḍu-vishaya[3] made a grant in their immediate presence to the Brāhmaṇa Vennama. The object of the grant cannot be made out.[4] The available portion of the text has no date.

The importance of this record lies in the fact that barring the Canjeevaram inscription of Jaṭāchōḍa Bhīma, it is the earliest document which gives an account of the

interregnum, while the records of this dynasty of the post-restoration period are silent on this point.

Notes

1. This Maṅgi and Baddega have been identified respectively with the Noḷamba and Lēmulavāḍa chiefs of the same name and Śaṅkila and Kannara with the Haihaya Śaṅkaragaṇa and his brother-in-law Rāshṭrakūṭa Kṛishṇa II respectively (*EI.,* XXXVI, p.192,*n.*1).

2. Viraja may probably be identified with Viraja on the bank of the Vaitaraṇī(*ibid.,n,*2). *cf., USVAE.,* VII, p.126, *n.* 2.

3. Vaṟañāḍu-vishaya may be identified with the region lying between Ēlūru and Vijayavāḍa, forming part of the former Nuzvid Zamindari (*ibid.,* p.194).

4. The manner in which the address is recorded appears to suggest that the object of the charter was a grant of land (*EI.,* XXXVI, p.192, *n.* 4).



No.36

RANASTIPUNDI GRANT OF VIMALADITYA YEAR 8

Location	: A field in Amalapuram Taluk, Godvari District, Andhra Pradesh
Date	: Regnal year 8 = 1018 A.D.
Script	: Telugu–Kannaḍa
Language	: Sanskrit
King	: Vimalāditya
Dynasty	: Eastern Chālukya
Reference	: Venkayya, V., *EI.,* VI, pp.347-361

Text

Metre: Vv. 1, 5, 19, 21, 22, 27, 28, 29 *Śārdūlvikrīḍita;* 2, 6, 8, 10, 25, 26, 35, 36 *Anushṭubh;* 3, 16, 37 *Āryāgīti;* 4 *Upagīti;* 7, 11, 33 *Indravajrā;* 12, 31 *Udgīti;* 9, 13, 14 *Gīti;* 15, 23, 24, 30 *Upajāti of Āryāgīti +Gīti;* 17, 18, 34 *Vasantatilakā;* 20 *Sragdharā;* 32 *Vaṁśastha*

श्रीधाम्नःपुरुषोत्तमस्य महतो नारायणस्य प्रभो

र्न्नाभीपंकरुहाद्बभूव जगतस्स्रष्टा स्वयंभूस्ततः।

जज्ञे मानससूनुरत्रिरिति यस्तस्मान्मुनेरत्रित

स्सोमो वंशकरस्सुधांशुरुदितः श्रीकण्ठचूडामणिः ॥ १ ॥

तस्मादासीत्सुधासूतेर्ब्बुधो बुधनुतस्ततः।

जातः पुरूरवा नाम चक्रवर्त्ती सविक्रमः ॥ २ ॥

गद्यम्।

तस्मादायुरायुषो नहुषः नहुषाद्ययातिश्चक्रवर्त्ती वंशकर्त्ता ततःपुरुरिति

चक्रवर्त्ती ततो जनमेजयोश्वमेधत्रितयस्य कर्ता। ततः प्राचीशःप्राचीशात्सैन्ययातिस्सैन्ययातेर्हयपतिर्हयपतेस्सार्व्वभौमस्सार्व्वभौमाज्जयसेनः जयसेनान्महाभौमः महाभौमादैशानकः ऐशानकात्क्रोधाननः क्रोधाननाद्देवकिः देवकेर्ऋभुकः ऋभुकादृक्षकः ऋक्षकान्मतिवरस्सत्रयागयाजी सरस्वतीनदीनाथः ततः कात्यायनः कात्यायनान्नीलः नीलादुष्यन्तस्तत्सुतः। आर्या।

गंगायमुनातीरे यदविच्छिन्नं निखाय यूपान्क्रमशः।
कृत्वा तथाश्वमेधान्नाम महाकर्म्मभरत इति योलभत॥ ३॥

ततो भरताद्भूमन्युर्भूमन्योस्सुहोत्रस्सुहोत्राद्धस्ती हस्तिनो विरोचनः विरोचनादजमीलः अजमीलात्संवरणः संवरणस्य तपनसुतायास्तपत्याश्च सुधन्वा सुधन्वनःपरिक्षित्परिक्षितो भीमसेनः भीमसेनात्प्रदीपनःप्रदीपनाच्छन्तनुश्शन्तनोर्व्विचित्रवीर्य्यः विचित्रवीर्य्यात्पाण्डुराजः। आर्या।

पुत्रास्तस्य च धर्म्मजभीमार्जुननकुलसहदेवाः।
पंचेन्द्रियवत्पंचस्युर्व्विषयग्ग्राहिणस्तत्र॥ ४॥

वृत्तं।

येनादाहि विजित्य खाण्डवमथो गाण्डीविना वज्रिणं
युद्धे पाशुपतास्त्रमन्धकरिपोश्चालाभि दैत्यान्बहून्।
इन्द्रार्द्धासनमध्यरोहि जयिना यत्कालिकेयादिका
न्हत्वास्वैरमकारि वंशविपिनच्छेदः कुरूणां विभोः॥ ५॥

ततोर्जुनादभिमन्युरभिमन्योःपरिक्षित् परिक्षितो जनमेजयः जनमेजयात्क्षेमुकः क्षेमुकन्नरवाहनः नरवाहनाच्छतानीकः शतानीकादुदयनः ततः-

परं तत्प्रभृतिष्वविच्छिन्नसन्तानेष्वयोध्यासिंहासनासीनेष्वेकान्नषष्टिचक्रवर्त्तिषु गतेषु तद्वंश्यो विजयादित्यो नाम राजा विजिगीषया दक्षिणापथं गत्वा त्रिलोचनपल्लवमधिक्षिप्य दैवदुरीहया लोकान्तरमगमत्। तस्मिन्संकुले पुरोहितेन सार्द्धमन्तर्व्वत्नी तस्य महादेवी मुडिवेमुनामाग्रहारमुपगम्य तद्वास्तव्येन विष्णुभट्टसोमयाजिना दुहितृनिर्व्विशेषमभिरक्षिता सती विष्णुवर्द्धनमसूत। सा तस्य च कुमारकस्य मानव्यसगोत्रहारितीपुत्रादिस्वक्षत्रगोत्रक्रमोचितानि कर्म्माणि कारयित्वा तमवर्द्धयत्। स च मात्रा विदितवृत्तांतस्सन्निर्ग्गत्य चलुक्यगिरौ नन्दां भगवतीं गौरीमाराध्य कुमारनारायणमातृगणांश्च संतर्प्य श्वेतातपत्रैकशंखपंचमहाशब्दपालिकेतनप्रतिढक्कावराहलांच्छनपिंछकंतसिंहासनमकरतोरणकनकदण्डगंग्गायमुनादीनि स्वकुलक्रमागतानि निक्षिप्तानीव साम्राज्यचिह्नानि समादायकडंबगंगादिभूमिपान्निर्जित्य सेतुनर्म्मदामध्यं सार्द्धसप्तलक्षं दक्षिणापथं पालयामास। श्लोक।

तस्यासीद्विजयादित्यो विष्णुवर्द्धनभूपतेः।
पल्लवान्वयजाताया महादेव्याश्च नन्दनः॥ ६॥

तस्सुतः पोलकेशिवल्लभः तत्पुत्रः कीर्त्तिवर्म्मा तस्य तनयः। स्वस्ति श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारितीपुत्राणां कौशिकीवरप्रसादलब्धराज्यानां मातृगणपरिपालितानां स्वामिमहासेनपादानुध्यातानां भगवन्नारायणप्रसादसमासादितवरवराहलांछनेक्षणक्षणवशीकृताराातिमण्डलानामश्वमेधावभृथस्नानपवित्रीकृतवपुषां चालुक्यानां कुलमलंकरिष्णोस्सत्याश्रयवल्लभेन्द्रस्य भ्राता कुब्जविष्णुवर्द्धनोष्टादश

वर्षाणि वेंगीदेशमपालयत्। तदात्मजो जयसिंहवल्लभस्त्रयस्त्रिंशतम्। तदनुजेन्द्रराजस्सप्त दिनानि। तत्सुतो विष्णुवर्द्धनो नव। तत्सूनुर्म्मंगि-युवराजः पंचविंशतिम्। तत्पुत्रो जयसिंहस्त्रयोदश। तदवरजः कोक्किलि-ष्षण्मासान्। तस्य ज्येष्ठो भ्राता विष्णुवर्द्धनस्तमुच्चाटय स्सप्तविंशतम्। तत्पुत्रो विजयादित्यभट्टारकोष्टादश। तत्तनुजो विष्णुवर्द्धनष्षट्त्रिंशतम्। तत्सूनुर्व्विजयादित्यनरेन्द्रमृगराजश्चाष्टचत्वारिंशतम्। तत्सुतः कलि-विष्णुवर्द्धनोध्यर्द्धवर्षम्। तत्सुतो गुणगविजयादित्यश्चत्वारिंशतम्। तद्भ्रातुर्व्विक्रमादित्यभूपतेस्तनयश्चालुक्यभीमस्त्रिंशतम्। तत्सुतः कोल्लबिगण्डविजयादित्यष्षण्मासान्। तत्सूनुरम्मराजस्सप्त वर्षाणि। तत्सुतं विजयादित्यबालमुच्छाटय ताडपो मासमेकम्। तं जित्वा चालुक्यभीमतनयो विक्रमादित्य एकादश मासान्। तत्ताडपराजसुतो युद्धमल्लस्सप्त वर्षाणि।

तं युद्धमल्लं परिहृत्य देशात् पिष्ट्वेतरेषामपि शात्रवाणां।
क्ष्मामम्मराजानुजराजभीमो भीमस्समा द्वादश रक्षति स्म ॥ ७ ॥
तत्सूनुरानताराातिरम्मराजो नृपाग्रणीः।
पंचविंशतिवर्षाणि वेंगीभुवमपालयत् ॥ ८ ॥
द्वैमातुरोम्मनृपतेर्द्दान नृपो राजभीमनृपतनयः।
विद्याकलापचतुरश्चतुरंतधरामपात्समास्तिस्त्रः ॥ ९ ॥
अनुदानदानाण्णर्वादासीद्दैवदुश्चेष्टया ततः।
सप्तविंशतिवर्षाणि वेंगीमहिरनायका ॥ १० ॥
अत्रान्तरे दाननरेन्द्रसूनुः श्रीशक्तिवर्म्मा सुरराट्सधर्म्मा।

यश्शौर्य्यशक्त्या विनिहत्य शत्रून्स द्वादशाब्दान्समरक्षदुर्व्वीम् ॥ ११ ॥

तस्यैव दाननृपतेसाध्व्याश्चार्यामहादेव्याः ।

सूनुर्व्विमलादित्यस्सत्याश्रयवंशवर्द्धनो देवः ॥ १२ ॥

अनलानलरन्ध्रगते शकवर्षे वृषभमासिसितपक्षे ।

यष्षष्ठ्यां गुरुपुष्ये सिंहे लग्ने प्रसिद्धमभिषिक्तः ॥ १३ ॥

शशिविशदयशोव्याप्त्या स्वशरीर विबोधनार्त्थमवत्कण्ठे ।

शशलक्ष्मलक्ष्मलक्ष्मीं शंभुर्ब्बिरुदंकभीमनृपतेर्य्यस्य ॥ १४ ॥

अरिकरटिकुंभविदलनमुक्तसमामुक्तरुचिरमुक्तानिकरः ।

हार इव यस्य दोरसिरध्यासितजयश्रियो भाति चिरम् ॥ १५ ॥

यत्तेजःप्रपलायितरिपुपुरगृहशालभंजिकामुखरोधो ।

लूतापटस्तु परजनविलोकनासहनबद्धपट इव भाति ॥ १६ ॥

दुस्साधनाधिकविरोधिगजेन्द्रसंघ

निर्ब्भेदतस्त्रिभुवनांकुशनाम युद्धे ।

अन्वर्त्थतान्निजमजीगमदुद्धतं यो

बंहिष्ठसिंहपरिहासिपराक्रमश्रीः ॥ १७ ॥

यस्सार्व्वभौमधरणीश्वरनीतकल्प

प्राघूर्णकेभमदसिक्तमहीविभागः ।

यस्तर्ज्जितानिलजवाश्वसहस्रसंघ

धाट्याहताहितशिरोंकित शूलकोटिः ॥ १८ ॥

आदौ शंभुशिरोमणिस्स च सुधासूतिस्सुधांशुस्तत

स्तद्वंश्यो भरतस्ततश्च विजयादित्यश्चलुक्यांकितः ।

श्रीसत्याश्रयवल्लभस्तदपि च श्रीसर्व्वलोकाश्रयो
देवो मुम्मुडिभीमनामनृपतिर्य्यो वंशकर्त्ताभवत् ॥ १९ ॥
सौराष्ट्रान्दारयन्ती निशितपरशुधारायमाना शकानां
लाटानां गुर्ज्जराणामथ भवति मनोहारिणी वल्लभा वा ।
शूरान्स्वःस्थान्विधत्ते सुकृतिवदखिलान्स्वैरमन्यान्विभीतान्
काष्ठान्तन्तत्तपः श्रीरिव नयति रणे शौर्य्यसम्पद्यदीया ॥ २० ॥

स वीरमकरध्वजः मकरध्वज इव ध्वस्तविग्रहः ग्रहपतिरिवाहितान्धतमसापहरः हर इव राजकलाधरः धरणीधर इव रमारामाभिरामः राम इव परशुक्रियासहः सहदेव इव देवाध्वर्य्युनन्दनः नन्दनविशेष इवाभिलषितफलसमुक्तविसहस्रः सहस्राक्षोपमानः मानव्यसगोत्रः गोत्रनिस्तारकः तारकाधिपान्वयवर्द्धी वृद्धिनिशाकरः करदीकृतारातिपरम्परः परनरपतिनिकरमुकुटतटघटितमणिगणकिरणपरिकरितसमरुणितचरणेन्दीवरः वरवराहलांच्छनालोकनमात्रवित्रासिताखिलधराधीशचक्रः चक्रवर्त्तिपदवीसमुचितानेकधवलच्छत्रच्छायाच्छादितसर्व्वलोकस्सर्व्वलोकाश्रयश्रीविष्णुवर्द्धनमहाराजाधिराजपरमेश्वरपरमभट्टारकपरमब्रह्मण्यपरममाहेश्वरः । गुद्दवादिविषयनिवासिनो राष्ट्रकूटप्रमुखान् कुटुंबिनस्सर्वान्समाहूय मन्त्रिपुरोहितसेनापतियुवराजदौवारिकाध्यक्षमित्थमाज्ञापयति यथा ।

आद्यो यः स्वयमुद्बभूव परमब्रह्मा निसृज्यान्वपो
वीर्य्यन्तास्ववसृष्टमण्डमभवद्धैमम्महत्तेन यत् ।
तस्माल्लोकपितामहो विधिरभूत्तस्मान्मरीच्यादयः
पुत्रा ये दश जज्ञिरे श्रुतिमया वर्च्चस्विनो मानसाः ॥ २१ ॥

तेषां श्रेष्ठतमो वसिष्ठ इति यस्मारुन्धतीको मुनि

स्तस्मात्कुण्डिन इत्यभूदथ च तत्कौण्डिन्यगोत्रे क्रमात् ।

यो विद्वानुदितोदितद्विजवरो द्रोणः प्रमाणीभव

द्वृत्तस्तुल्ययमतिर्न्नित्योदयस्सत्यवाक् ॥ २२ ॥

दत्ताभिधानसचिवो हरदत्तवरप्रसाद इव तस्य सुतः ।

शुभकृत्प्रभावमहितः प्रभुमन्त्रोत्साहशक्तिसंयुक्तः ॥ २३ ॥

तस्य च सद्गुणधाम्नः पतिव्रतायाथ चीडमांबायाः ।

वज्राभिधान इति यस्सूनुस्सूनृतवचास्सुमेधास्सुमनाः ॥ २४ ॥

नित्याकर्ण्णनया शश्वद्वटुभिःपटुभिर्गृहे ।

वेदशास्त्राणि यद्धाम्नि पठन्ति शुकशारिकाः ॥ २५ ॥

भीमेश्वरसमो देवो वेंगीश्वरसमो नृपः ।

वज्रामात्यसमोमात्यो न भूतो न भविष्यति ॥ २६ ॥

नागेन्द्रैर्द्दिग्गिभिश्च षोडशनृपैराद्यैर्धृतां क्ष्माधुरां

वीरैरप्यतिशूद्रकप्रभृतिभिश्चाजेर्द्धुरं दुस्सहाम् ।

बिभ्रद्यःप्रथितं क्रमान्नयबलाद्बाहाबलात्प्राप्तवा

न्साहाय्यं बिरुदंक भीमनृपतेः कार्य्येण खड्गेन च ॥ २७ ॥

गोत्रच्छेत्तुररिक्षमाधरकुलोद्भेदान्महेन्द्रात्क्षमः

श्रीमान्भूपमहेन्द्र एव नितरां गोत्रैकनिस्तारकः ।

तद्वज्रादतिरिच्यते लघुतराद्वज्राभिधोयं गुरु

र्य्यन्नाथोपि च यद्भटश्च विबुधव्रातैरिति स्तूयते ॥ २८ ॥

यत्त्रेधानलधूम्रधूमघटितैरभ्रैर्न्निजेहाहित

क्षोणीभृत्पुरदाहधूमजनितांभोभृत्सहस्रैस्समम् ।

व्याप्तं व्योम तदीयशत्रुललनाद्दक्पाथसा मा क्षमा

सिक्ता यत्परिपावनातिथिपदप्रक्षालनाच्छांभसा ॥ २९ ॥

यः श्रीवज्रामात्यो धनसन्तर्प्पितजगज्जनस्तुत्यः ।

भूसुरवंशादित्यश्शुचिरतिचतुरो वचोनिरत्ययसत्यः ॥ ३० ॥

बुधवज्रप्राकारो गृहनियमितारिसैनिकचक्रः ।

चक्रभृदुद्धश्रीकः श्रीकण्ठपदारविन्दषट्चरणः ॥ ३१ ॥

सदा स्ववाचा मनसा च कर्म्मणान्वकारि येनाधिगुणेन कुण्डिनः ।

प्रवृत्तवैतानिकधर्म्मसंग्गतिर्द्विजाधिनाथोयमुदारतानिधिः ॥ ३२ ॥

चालुक्यचूडामणिपादभक्तो भक्तैकचूडामणिरीशमूर्त्तिः ।

कीर्त्यान्वितोमात्यशिखामणिःश्रीसौजन्यरत्नाकरनामधेयः ॥ ३३ ॥

सप्तांगके नृपपदे प्रभुता प्रधाना

ताद्दश्यमात्यपदवी खलु तद्दितीया ।

श्रीद्वारपिंछकरकातपवारणादि

स्तस्यां विशेषमहिमा मदलाभि येन ॥ ३४ ॥

तस्मै मद्भक्ताय कृतक्लेशाय कारमचेडुवास्तव्याय कौण्डिन्यगोत्रया-मात्यशिखामणये बुधवज्रप्राकाराय सौजन्यरत्नाकराय वज्जियपेग्गड इति प्रसिद्धाभिधानाय भवद्विषये। पारुवळनामग्रामेण सार्द्धं रणस्तिपूण्डि-नामग्रामोग्रहारीकृत्य मत्संवर्द्धितत्वनिमित्ते मया दत्त इति विदितमस्तु वः . . . . [Here follows description of boundaries in a mixture of Sanskrit and Telugu prose.]

उत्तरतः सिरिपोदिपूण्डिसिमैव सीमा। अस्योपरि न केनचिद्बाधा कर्त्तव्या। यः करोति स पंचमहापातको भवति। तथा चोक्तं भगवता व्यासभट्टारकेणापि।

बहुभिर्व्वसुधा दत्ता बहुभिश्चानुपालिता।

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥ ३५॥

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम्।

षष्टिं वर्षसहस्राणि विष्ठायां जायते क्रिमिः॥ ३६॥

अष्टमवर्षवर्द्धने सिंहमासे दत्तस्यास्य

शासनस्य श्रीदण्डनायक इति द्विजाधिनायकः।

आज्ञप्तिर्नृपकामो राचियपेद्देरितनयभीमभट्टः

कर्त्तैषां काव्यनामथ शासनलेखकश्च जोन्ताचार्यः॥ ३७॥

Summary

This inscription, engraved on a set of 5 copper-plates, consists 98 lines of well-executed and well-preserved writing. The plates were strung on a ring whose ends are secured in a four-petalled flower, which forms the base of a circular seal. The seal bears, in relief on a countersunk surface, the legend *Śrī-Tribhuvanāṅkuśa.* Below the legend is the figure of a running boar facing the proper left. An eight–petalled flower, an elephant–goad, *etc.,* are also depicted on the seal. This inscription is composed in a mixture of verse and prose. The description of the boundaries of the village granted is in a mixture of Sanskrit and Telugu prose.

The inscription opens with the Puraṇic genealogy of the Eastern Chālukya kings and with a legendary account of their ancestors. Then follows the historical genealogy of the donor Vimalāditya. The date of his coronation is given in verse 13. He is praised in general terms in vv.14-20 and in the subsequent prose passage. Then follow king's titles. Vv.21-34 describe the donee and his ancestors. Then follows the grant itself, the description of the boundaries of the village granted, and of a field which belonged to it. The inscription closes with the date of the grant, and the names of the executor, the composer and the writer.

The inscription commences with a Purāṇic genealogy, from Nārāyaṇa or Vishṇu down to Udayana. Then comes a long passage, which however, is nothig but a mere jumble of vague tradition and Purāṇic myths, of no authority, based on the undoubted facts that the Chālukyas did come originally from the north, and did find the Pallavas in possession of the territories afterwards acquired by themselves, and on a tradition of the later Kadambas that the founder of their family was named Trilōchana or Trinētra. Contents of the said long passage may be summarised thus: passing away of 59 emperors beginning with Udayana after having occupied the throne of Ayōdhyā in an uninterrupted succession; king Vijayāditya of this race went to Dakshiṇāpatha, attacked Trilōchana-Pallava, but died in the battle; his pregnant queen was protected by Vishṇubhaṭṭa-Sōmayājin at Muḍivēmu-*agrahāra* where her son Vishṇuvardhana was born; she brought him up, having arranged for the performance of suitable rites for the prince; the prince, having heard from his mother, the events that took place

before his birth, worshipped Nandā and Gaurī on the Chalukya mountain, appeased Kumāra (Skanda), Nārāyaṇa (Vishṇu) and the divine Mothers; and having assumed the emblems of universal sovereignty, *viz.,* the white parasol, the single conch, the five *mahāśabdas,* the flags in rows *(pālikētana),* the *pratiḍhakkā* (drum), the sign of the boar, the peacock's tail, the spear, the throne, the arch in the shape of a *makara (makara-tōraṇa),* the golden sceptre, the signs of the Gaṅgā and Yamunā, *etc;* and having conquered the Kaḍambas and the Gaṅgas and other kings he ruled over the region of the south, lying between the Bridge of Rāma and the river Narmadā and containing seven and a half lakh of villages.

The son of this king Vishṇuvardhana and of his great queen, who was born from the Pallava race, was Vijayāditya. His son was Pōlakēśivallabha. His son was Kīrttivarman.

Then follows the usual introduction of the Chālukya family, *viz., Śrīmatāṁ sakala-bhuvana-saṁstū-yamāna, etc.,* to which Kubja-Vishṇuvardhana, son of Kīrttivarman and younger brother of Satyāśraya-Vallabhēndra belonged and ruled the Vēṅgī country for 18 years.

We next have the usual succession of Eastern Chālukya kings, down to Vimalāditya. This genealogical account, up to the end of Dānārṇava, tallies with the one given in the Andhra Sāhitya Parishat plates of Śaktivarman (No.35 above).

Dānārṇava's son Śaktivarman ruled over the earth for 12 years. Another son of Dānārṇava and his queen

Āryā, Vimalāditya, was publicly anointed in the Śaka year 933 (1011 A.D.).

This king Vimalāditya, the donor of the present grant, is praised in general terms in vv. 14-20 and in the subsequent prose passage. This part of the text is noteworthy for its poetic excellnces and it is here that we come across the king's titles Sarvalōkāśraya, Vishṇu-vardhana, *etc.* Birudaṅka-Bhīma, Tribhuvanāṅkuśa, Mummaḍi-Bhīma and Bhūpa-Mahēndra are the surnames attributed the king in this record. The concluding part of this prose passage states that king Vimalāditya called together the *Rāshṭrakūṭas* and all other ryots residing in the district (*vishaya*) of Guddavāḍi and issued order in respect of the proposed grant of a village to his Brāhmaṇa minister Vajra. The order was issued in the presence of the ministers (*Mantri*), the family priest (*Purōhita*), the commander of the army (*Sēnāpati*), the heir-apparent (*Yuvarāja*) and the door-keepers (*Dauvārika*).

Vv.23-24 describe the donee and his ancestors. This genealogical account of the donee, given in vv.21-24 is a mixture of mythology and history. It runs thus: The primeval supreme Brahman; from him the Creator (*Lōkapitāmaha*); from him ten sons of the mind (*mānasa-putrāḥ*), commencing with Marīchi; from Vasishṭha, the best of the mind-born sons, Kuṇḍina; in the Kauṇḍinya-*gōtra* Brāhmaṇa Drōṇa; from him the minister called Datta; from him and his wife Chīḍamāmbā Vajra.

Vv.25-34 contain nothing but conventional praise of king Vimalāditya and his minister Vajra, the donee, and mention surnames borne by them. V.26 describes god Bhīmēśvara,[1] the lord of Vēṅgi (*i.e.* Vimalāditya) and the

minister Vajra as the best of their kinds.

Then follows the grant portion wherein it is stated that the king Vimalāditya, for the sake of his prosperity, granted the village named Raṇastipūṇḍi in the district of Guddavāḍi, having made it an *agrahāra,* together with the village named Pāṟuvaḷa, to his minister Vajra also known as Vajjiya-peggaḍa, who was devoted to him (*i.e.,* Vimalā-ditya), had taken pains in his service, resided at Kārama-chēḍu[2] and belonged to the Kauṇḍinya-*gōtra.* The donee is said to have borne the surnames Amātya-śikhāmaṇi, Budhavajraprākāra and Saujanya-ratnākara.

In the description of the boundaries of the village granted, about 10 villages, 2 tanks, 2 ponds and a road are mentioned. This portion is in a mixture of Sanskrit and Telugu prose. Then comes the donor's instruction that none should cause any trouble to the grant, followed by two of the usual imprecatory and benedictory stanzas.

The charter concludes with the statement that the grant mentioned above was given in the 8th regnal year of the king Vimalāditya; that *Daṇḍanāyaka* Nṛipakāma, the lord of Brāhmaṇas, was the executor of the grant (*ājñapti*); and that the author of the text of the grant was Bhīmanabhaṭṭa, son of Rāchiya-Peddēri and its writer Jōntāchārya.

Notes

1. Evidently the temple at Drākshārāma is meant (*EI.,* VI, p.360, *n.*1).

2. Kāramachēḍu-As regards the identification it has been mentioned that there is a village named Kārim̐chēḍu, 9 miles west of Bāpaṭḷa in the Kistna District (*ibid.,* p.351).



No.37

KORUMELLI PLATES OF RAJARAJA I

Location	: Korumelli, Rajamahendri District, Andra pradesh
Date	: Śaka 944=1022-23 A.D.
Script	: Telugu-Kannaḍa
Language	: Sanskrit
King	: Rājarāja I
Dynasty	: Eastern Chālukya
Reference	: Fleet, J.F., *IA.*, XIV, pp. 48-55

Text

Metre: Vv. 1, 5, 12, 15, 25, 28, 29 *Śārdūlavikrīḍita;* 2, 6-11, 17, 20, 30, 31 *Anushṭubh;* 3 *Āryāgīti;* 4 *Upagīti;* 13, 14, 19, 27 *Vasantatilakā;* 16 *Āryā;* 18, 22-24 *Sragdharā;* 21, 26 *Upajāti*

ओं ॥

श्रीधाम्नः पुरुषोत्तमस्य महतो नारायणस्य प्रभो

र्न्नाभीपंकरुहाद्बभूव जगतस्स्रष्टा स्वयंभूस्ततः ।

जज्ञे मानससूनुरत्रिरिति यः तस्मान्मुनेरत्रित

स्सोमो वंशकरस्सुधांशुरुदितः श्रीकण्ठचूडामणिः ॥ १ ॥

तस्मादासीत्सुधासूतेर्ब्बुधो बुधनुतस्ततः ।

जातः पुरूरवा नाम चक्रवर्त्ती सविक्रमः ॥ २ ॥

तस्मादायुरायुषो नहुषः ततो ययातिश्चक्रवर्त्ती वंशकर्त्ता ततः पुरुरिति चक्रवर्त्ती । ततो जनमेजयोश्वमेधत्रितयस्य कर्त्ता ततः प्राचीशः

तस्मात्सैन्ययातिः ततो हयपतिः ततस्सार्व्वभौमः ततो जयसेनः ततो महाभौमः तस्माद्देशानकः। ततः क्रोधाननः। ततो देवकिः देवकेरृभुकः तस्माद्दक्षकः। ततो मतिवरस्सत्रयागयाजि सरस्वतीनदीनाथः ततः कात्यायनः कत्यायनान्नीलः ततो दुष्यन्तः तत आर्य्यो

गंगायमुनातीरे यदविच्छिन्नान्निखाय यूपान्क्रमशः

कृत्वा तथाश्वमेधन्नाम महाकर्म्म भरत इति योलभत ॥ ३ ॥

ततो भरताद्भूमन्युः तस्मात्सुहोत्रः ततो हस्ती। ततो विरोचनः तस्मादजमीलः ततस्संवरणः तस्य च तपनसुतायास्तपत्याश्च सुधन्वा। ततः परिक्षित्। ततो भीमसेनः। ततः प्रदीपनः। तस्माच्छन्तनुः ततो विचित्रवीर्य्यः ततः पाण्डुराजः ततः आर्य्या

पुत्रास्तस्य च धर्म्मजभीमार्ज्जुननकुलसहदेवाः।

पंचेन्द्रियवत् पंच स्युर्व्विषयग्रहिणस्तत्र ॥ ४ ॥

येनादाहि विजित्य खाण्डवमठे गाण्डीविना वज्रिणं

युद्धे पाशुपतास्त्रमंधकरिपोश्चालाभि दैत्यान्बहून्

इन्द्रार्द्धासनमध्यरोहि जयिना यत्कालिकेयादिका

न्हत्वा स्वैरमकारि वंशविपिनच्छेदः कुरूणां विभोः ॥ ५ ॥

ततोर्ज्जुनादभिमन्युः ततः परीक्षित्ततो जनमेजयः ततः क्षेमुकः ततो नरवाहनः ततश्शतानीकः तस्मादुदयनः॥ ततः परं तत्प्रभृतिष्ववि-च्छिन्नसन्तानेष्वयोध्यासिंहासनासीनेष्वेकाद्न षष्टिचक्रवर्त्तिषु तद्वंश्यो विजयादित्यो नाम राजा विजिगीषया दक्षिणापथं गत्वा त्रिलोचन-

पल्लवमधिक्षिप्य दैवदुरीहया लोकान्तरमगमत्। तस्मिन्संकुले पुरोहितेन सार्द्धमन्तर्व्वत्नी तस्य महादेवी मुडिवेमुनामाग्रहारं कतिपयाभिरन्तःपुर-कान्ताभिः कंचुकिभिश्च सहोपगम्य तद्वास्तव्येन विष्णुभट्टसोमयाजिना दुहितृनिर्व्विश्शेषमभिरक्षिता सती विष्णुवर्द्धनन्नन्दनमसूत। सा तस्य च कुमारकस्य मानव्यसगोत्रहारीतिपुत्रद्विपक्षगोत्रक्रमोचितानि कर्म्माणि कारयित्वा तमवर्द्धयत्। स च मात्रा विदितवृत्तान्तस्सन्निर्ग्गत्य चलुक्य-गिरौ नन्दां भगवतीं गौरीमाराध्य कुमारनारायणमातृगणांश्च संतर्प्य श्वेतातपत्रैकशंखपंचमहाशब्दपालिकेतनप्रतिढक्कावराहलांछनपिच्छकुन्त-सिंहासनमकरतोरणकनकदण्डगंगायमुनादीनि स्वकुलक्रमागतानि निक्षिप्तानिव साम्राज्यचिह्नानि समादाय कडंबगंगादिभूमिपान्निर्ज्जित्य सेतुनर्म्मदामध्यं सार्द्धसप्तलक्षं दक्षिणापथं पालयामास॥ श्लोकः।

तस्यासीद्विजयादित्यो विष्णुवर्द्धनभूपतेः।
पल्लवान्वयजाताया महादेव्याश्च नन्दनः॥ ६॥

तत्सुतः पोलकेशिवल्लभः॥ तत्पुत्रः कीर्त्तिवर्म्मा॥ तस्य तनयः स्वस्ति श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतीपुत्राणां कौशि-कीवरप्रसादलब्धराज्यानाम्मातृगणपरिपालितानां स्वामिमहासेनपादा-नुध्यातानां भगवन्नारायणप्रसादसमासादितवरवराहलांछनेक्षणक्षणवशी-कृताराातिमण्डलानामश्वमेधावभृथस्नानपवित्रीकृतवपुषां चालुक्यानां कुलमलंकरिष्णोस्सत्याश्रयवल्लभेन्द्रस्य भ्राता कुब्जविष्णुवर्द्धनोष्टादश वर्षाणि वेंगीदेशमपालयत्॥ तदात्मजो जयसिंहवल्लभस्त्रयस्त्रिंशतम्॥ तदनुजेन्द्रराजनन्दनस्सप्त दिनानि॥ तत्सुतो विष्णुवर्द्धनो नव वर्षाणि॥

तत्सूनुर्म्मांगियुवराजः पंचविंशतिम् ॥ तत्पुत्रो जयसिंहस्त्रयोदश ॥ तद-वरजः कोक्किलिष्षणमासान् ॥ तस्य ज्येष्ठो भ्राता विष्णुवर्द्धनस्तमुच्चाट्य सप्तत्रिंशतमब्दान् ॥ तत्पुत्रो विजयादित्यभट्टारकोष्टादश ॥ तत्तनुजो विष्णुवर्द्धनष्षट्त्रिंशतम् ॥ तत्सूनुर्व्विजयादित्यनरेन्द्रमृगराजश्चाष्टाचत्वा-रिंशतम् ॥ तत्सुतः कलिविष्णुवर्द्धनोध्यर्द्धवर्षम् ॥ तत्सुतो गुणगविज-यादित्यश्चतुश्चत्वारिंशतम् ॥ तद्भ्रातुर्व्विक्रमादित्यभूपतेस्तनयश्चालुक्य-भीमस्त्रिंशतम् ॥ तत्सुतः कोल्लबिगण्डविजयादित्यष्षणमासान् ॥ तत्सू-नुरम्मराजस्सप्तवर्षाणि ॥ तत्सुतं विजयादित्यं बालमुच्चाट्य ताडपो मासमेकम् ॥ तं जित्वा चालुक्यभीमतनयो विक्रमादित्य एकादश मा-सान् ॥ तत्ताडपराजसुतो युद्धमल्लस्सप्त वर्षाणि ॥ अम्मराजानुजो राज-भीमोब्दान् द्वादशाभुनक् ॥ युद्धे युद्धमल्लन्तं धाट्या निर्घात्य धरणिरसु-ताम्मभूपः क्ष्मां पंचविंशतिं वर्षाण्यपात ॥ द्वैमातुरोम्मराजस्य दानाण्र्णव इति स्मृतः चतुष्षष्टिकलाभिज्ञस्समास्तिस्त्रोभुनग्भुवम् ॥७॥ ततः परं पतिं लब्ध्विमनुरूपमनायिकां सप्तविंशतिवर्षाणि चच्छावेव तपः क्षमाम् ॥८॥ अथ दानाण्र्णवाज्जातः कलावान् मृदुभिः करैः राजा चालु-क्यचन्द्रो यः क्ष्मातापमपाकरोत् ॥९॥ सत्ये प्रतिष्ठिता लोका इति सत्यं वचो यतः। सर्व्वलोकाश्रये यस्मिन्सत्यराजे स्थितं जगत् ॥१०॥

निर्व्वक्रं वसुधाचक्रमरक्षत् क्षपिताहितः।
न्याय्ये पथि नृपैराद्यैस्स द्वादश समास्समः ॥११॥
विमलादित्यदेवाख्यस्ततस्तस्यानुजोदधात्
महिमण्डलसांराज्यं विजित्य विजयी रिपून् ॥

यस्य प्रज्वलितप्रतापदहनं सोढुन्न शक्ता भया

द्रुत्वा काननमंबुधिं च तरसा विद्वेषिणो विह्वलाः

दावौर्व्वाग्निपदेन तत्र च पुनस्तेनैव संतापिताः

श्रीपादामरपादपस्य महतीं छायां समशिश्रियन् ॥१२॥ अपि च ॥

सूर्य्यान्वये सुरपतिप्रतिमः प्रभावैः श्रीराजराज इति यो जगति व्यराजत्

नाथस्समस्तनरनाथकिरीटकोटिरत्नप्रभापटलपाटलपादपीठः ॥१३॥

जातस्ततस्ततयशोजितराजतेजा राजेंद्रचोडनृपतिर्नृपचक्रवर्त्ती दंबं प्रचंडमददन्तिकपोलनिर्य्यद्दानाविलामरसरित्सलिलप्रवाहः ॥१४॥

सद्वीपां च पयोंबुरा-शिपरिखां विश्वंभरा लीलया दण्डेनैव विजित्य च प्रतिदिशंयोतिष्ठिपत्सर्व्वतः स्वैरोद्भ्रांतिनिवारणाय विजयस्तंभान्स्वनामांकितानालानानिव बद्धुमन्धमनसो दर्प्पेण दिग्दन्तिनः ॥१५॥ तस्यानुजां सुरूपामनुरूपां कूंदवांमहादेवीं स उपायत कृतकृत्यो विमलादित्यो जनस्तुत्यः ॥१६॥ समुद्ररशनां पृथ्वीं पृथ्वीं स भुजविक्रमात् समरक्षत्समास्सप्तसप्तसप्तिसमस्समः ॥१७॥ तस्माच्चालुक्यचूडामणिरथ विमलादित्यदेवान्महीशाच्चोडक्ष्मापाललक्ष्म्या इव रचिततनोः कूंदवायाश्च देव्याः। जातश्रीराजराजो रजनिकरकुलश्रीमदंबोधिराजो राजद्राजन्यसेव्यामभृत भुजबलाद्राजलक्ष्मीं पृथिव्याः ॥१८॥ यो रक्षितुं वसुमतीं शकवत्सरेषु वेदांबुराशिनिधिवर्त्तिषु सिंहगेर्क्के कृष्णद्वितीयदिवसोत्तरभद्रकायां वारे गुरोर्व्वणिजि लग्नवरेभिषिक्तः ॥१९॥ यस्योत्तमांगं पट्टेन समबंधि महीयसा भर्त्तुं विश्वंभराभारं जनैरारोपितं चिरम् ॥२०॥ पृथ्वीमिमां यत्र पृथुप्रभावे रक्षत्यवर्ग्गं क्षपितारिवर्ग्गे दूरीकृतावग्रहचोर-

रोगाः प्रजा लभंते सफलं त्रिवर्ग्गम् ॥२१॥ शौर्य्यौदार्य्याभिमानाद्यगणि-
तगुणजन्मानुरक्ता महिम्ना प्रख्यातेनातिकृष्णा शशधरधवला सज्जनानां
गणेन पीता प्रीतेन कर्ण्णांजलिभिरभिनवा भाति दिग्देवतानान्नानावर्ण्णां
वितानश्रियमतनुतरा तन्वती यस्य कीर्त्तिः ॥२२॥ पित्रोर्व्वंशगुरू बभूव-
तुरलं यस्य स्फुरत्तेजसौ सूर्य्यचंद्रमसौ निरस्ततमसौ देवौ जगच्चक्षुषी
दंष्ट्राकोटिसमुद्धृताखिलमहीचक्रम्महत् क्रीडया विष्णोरादिवराहरूपमभ-
वद्यच्छासने लांच्छनम् ॥२३॥ स सर्व्वलोकाश्रयश्रीविष्णुवर्द्धनमहारा-
जाधिराजपरमेश्वरपरमभट्टारकपरमब्रह्मण्यः मातपितृपादानुध्यातः त्या-
गसिंहासनासीनः चण्डिकाप्रसादपरिलब्धसांराज्यचिह्नः गुद्दवाडिविषय-
निवासिनो राष्ट्रकूटप्रमुखान् कुटुंबिनस्सर्व्वान् समाहूय मंत्रिपुरोहितसेना-
पतियुवराजदौवारिकप्रधानाध्यक्षानित्यादिशति । आद्यंतायंतदूरात्सम-
जनि जगतां ज्योतिषो जन्महेतुर्ब्रह्मा धामप्रजानामभवदथ ततः कश्यपो
नाम वेधाः भारद्वाजस्ततोभून्मुनिरधिकतपास्तस्य गोत्रे पवित्रे तत्राप-
स्तंबसूत्रे श्रुतिनिधिरुदगाच्चीडमार्य्यः क्रमेण ॥२४॥ राज्ञामर्च्चितवर्च्चस-
स्समुदितैर्य्यज्ञैर्व्विधौतांघसो यज्ञो नाम सुतस्ततः कृतधियो जज्ञे कृतज्ञः
कृती विज्ञाताखिलवेदशास्त्रसमयः प्राज्ञस्सदा पोषितज्ञातिर्ज्ञाननिधि-
र्गुरुज्ञसदृशो नीतिज्ञतायां भुवि ॥२५॥ यथा वसिष्ठो विदुषां वरिष्ठो
निरुन्धतीं दोषमरुन्धतीं स तथानुरूपामभिरूपरूपस्सतीमुपायच्छ-
तमाकयाख्याम् ॥२६॥ पुत्रस्तयोरदितिकश्यपयोरिवाभूद्भास्वानपाकृत-
तमाः खलु चीडमार्य्यः यो वेदशास्त्रसकलश्रुतिरश्मिजातैश्शिष्याननांबु-
रुहबोधकरो गरीयान् ॥२७॥ नित्याभीष्टफलप्रदानरुचिरं लक्ष्मीनिवासा-

स्पदं बिभ्राणं गुरुतां प्रबुद्धसुमनः संपूर्णशखान्वितं च्छायासंतति-
माश्रितैश्च विबुधैः संस्तूयमानं सदा सेवित्वा सुखमास्यते द्विजवरैर्य्यं
विप्रकल्पद्रुमम् ॥२८॥ यद्गेहं सुचिरं विभाति परतां पुण्यैर्व्वटूनां पटुव्यवृ-
त्त्याविरतं क्रमात्क्षमपदे सामर्थ्यजुघ्घोषणैस्सायंप्रातरुपाहितं हुतिहुत-
स्वाहाप्रियप्रोच्चलद्दामैश्चापि समन्ततः कलिमलं प्रोत्सारयद्दूरतः ॥२९॥
तस्मै समस्तजनताविशेषणाय रैसुतर्प्पितमहीदेवदेवगणाय। विप्रान्व-
याब्धिशशभृत्प्रतिचन्द्राय विद्वज्जनांगीकृतविश्रुतानन्दाय। जन्मप्रभृति-
गीतवेदार्थतत्त्वाय। सन्मनोवसतिवास्तव्यात्मसत्त्वाय। लंभितसरल-
त्वपरिलालितचरित्राय। शुंभितमतिस्वसितजीवभृशपुत्राय। सिद्धनिज-
नाथकृतिसेवितमनीषाय। शुद्धमतिदूषितसमस्तजनदोषाय। सन्तताारा-
धितनिजस्वामिपादाय। चिन्तितमनस्थसुखदाभूतसुपादाय। होमधूम-
विनिर्ग्गतामितकलंकाय। धीमत्प्रगीतरुचिरस्थिरस्वनामांकाय। सकल-
मुनिगणनुतापस्तंबसूत्राय। तत्रसंगीतभारद्वाजगोत्राय। सप्ततन्तुकृत-
यूपस्तंभशोभाय। सप्ताश्वरूपसदृशात्मतनुलाभाय। नित्यजनतोचितसु-
सत्यसणयुक्ताय। पत्यभिलाषितकार्य्यनिःपत्तिसक्ताय। परमपुरुषार्त्थ-
संपादनपटिष्ठाय। परमेश्वरस्मरणपालनवरिष्ठाय। सकलार्त्थशास्त्रपरि-
निश्चितविनोदाय। सुकुमारताधिकसरोजनिभपादाय। धाराकरेणाग्रहा-
रीकृतः कोरुमेल्लिनामा ग्राम इंदूपरागे दत्तो मयाचन्द्रतारकं हि तिष्ठेत्त-
स्यावधिर्व्यक्तिरेषोच्यतेद्य। पूर्व्वतः कूडकुनिय्यूरि किमट्टिकालिय सीमा।
आग्नेयतः मुण्डकालिय सीमा। दक्षिणतः वानपल्लियु संपतनिययु
मामण्डेटियु सीमैव सीमा। नैर्ऋत्यतः गोदावरिय सीमा। पश्चिमतः

बूरुवुडोग्गु सीमा। वायव्यतः वेनेटियु मासरयु सीमैव सीमा। उत्तरतः मासरपोन्बड्डुवयु खल्मेण्डिकालियु सीमा। ईशानतः एरुवंकयुत्तरमुन कडलिचाटि सीमा॥ अस्योपरि न केनचिद्बाधाकरणीया यः करोति स पंचमहापातकैर्य्युक्तो भवति॥ तथा चोक्तं भगवता व्यासादिमहर्षि-प्रकरेणापि।

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम्।

षष्टिं वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥३० ॥

बहुभिर्व्वसुधा दत्ता बहुभिश्चानुपालित।

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥३१ ॥

आज्ञप्तिः कटकेशोराचियपेद्देरिभीमनामतनूजः कर्त्ता चेतनभट्टः काव्यानां लेखकोस्य गण्डाचार्य्यः॥ अस्मिन्ग्रामे प्रतिवर्षं भूपसिद्धायग्रहणं पंचविंशतिनिष्काणि शतद्वयसहितानि पंचाशद्धान्यखण्डकानि च॥

Summary

This inscription, engraved on a set of 5 copper-plates, consists 116 lines of well-executed and well-preserved writing. The circular seal on the ring , on which the plates are strung, has, in relief on a counter-sunk surface, across the centre, the legend *śrī-Tribhuva-nāṁkuśa.* Above the legend there is a boar, recumbent to the proper left, and objects like *chauris,* conch shell, *etc.,* are depicted in different parts of the seal. This inscription is composed in verse and prose and records the grant made by the king Rājarāja I of the Eastern Chālukya dynasty.

The inscription commences with a Purāṇic genealogy, from Nārāyaṇa or Vishṇu down to Udayana. Then comes a long passage, which however, is nothing but a mere jumble of vague tradition and Purāṇic myths, of no authority, based on certain undoubted facts. Then follows the usual introduction of the Chālukya family, *viz., Srīmatamī sakala-bhuvana-saṁstūyamāna, etc.,* to which Kubja-Vishṇuvardhana, son of Kīrttivarman and younger brother of Satyāśraya-Vallabhēndra belonged and ruled the Vēṅgī country for 18 years. We next have the usual sucession of the Eastern Chālukya kings down to Vimalāditya. This genealogical account up to the end of Dānārṇava tallies with the one given in the Ranastipundi grant of Vimalāditya (No.36 above). In fact text lines 1-49 of the grant under discussion correspond to lines 1-40 of the said Ranastipundi grant of Vimalāditya, of course, with some changes of words here and there.

Reverting to the subsequent contents of the present grant, commencing from the second half of line 49, Dānārṇava's son Śaktivarman, who is referred to by his epithet Chālukyachandra and convetionally praised in 3 verses, is said to have ruled for 12 years. Śaktivarman was followed by his younger brother Vimalāditya. The inscription then mentions Rājarāja, of Sūryānvaya or lineage of the Sun. His son was Rājēndra-Chōḍa, whose younger sister was Kūndavāmahādēvī. Vimalāditya married Kūndavā and reigned for 7 years. Their son was Rājarāja I also called Vishṇuvardhana, who ascended the throne in Śaka 944.

Having furnished the above information, the inscription proceeds to record the grant, made by-

Rājarāja I, on the occasion of an eclips of the moon, of the village of Korumelli, in the Guddavāḍi *vishaya,* to a Brāhmaṇa named Chīḍamārya of the Bhāradvāja *gōtra* and Āpastamba *sūtra.* He was the son of Yajña and his wife Chatamākavā and grandson of Chīḍamārya. Lines 85-102 contain 3 stanzas and a long prose passage in praise of the donee. This praise is partly conventional and partly descriptive of the virtures and achievements of the donee. Thus Chīḍamārya was a well-versed Vedic scholar and a great teacher. He used to perform sacrifices including the Sapta-tantu sacrifice. He was also devoted to Brāhmaṇas and served them in every possible way. He is described as *Vipra-kalpadruma.*

Several villages are mentioned among the boundaries of the village granted. This is followed by the order that no objection should be raised on (the enjoyment of) this grant, and two of the usual imprceatory and benedictory stanzas.

The executor of the grant (*Ājñapti*) was the Superintendent of the royal camp (*Kaṭakēśa*), Rāchiya-peddēri by name, who seems to be the son of Bhīma. The composer of the grant was Chētanabhaṭṭa and the writer Gaṇḍāchārya.

The grant concludes with the statement that a fixed annual income of 225 *nishkas* and 50 *khaṇḍakas* of grain may be drawn towards *bhūpa-siddhāya* from the village granted. Therefore, this charter recording a grant of a village for which payment of a revenue was fixed may be termed *kara-śāsana.*

♣♣♣♣♣♣

No.38

NANDAMPUNDI GRANT OF RAJARAJA I

Regnal year 32

Location	: Madras, Tamilnadu
Date	: Regnal year 32=1053 A.D.
Script	: Southern alphabet
Language	: Sanskrit
King	: Rājarāja I
Dynasty	: Eastern Chālukya
Reference	: Kielhorn, F., *EI.*, IV, pp.300-309

Text

Metre: Vv. 1, 5, 6, 10, 12, 18-20, 27, 28 *Śārdūlavikrīḍita;* 2, 8 *Anushṭubh;* 3 *Āryāgīti;* 4 *Upagīti;* 7, 11 *Indravajrā;* 9, 14 *Gīti;* 13, 15-17 *Vasantatilakā;* 21, 26 *Upajāti;* 22 *Mandākrāntā;* 23-25 *Āryā*

श्रीधाम्नः पुरुषोत्तमस्य महतो नारायणस्य प्रभो

र्न्नाभीपंकरुहाद्बभूव जगतस्स्त्रष्टा स्वयंभूस्ततः ।

जज्ञे मानससूनुरत्रिरिति यस्तस्मान्मुनेरत्रित

स्सोमो वंशकरस्सुधांशुरुदित श्रीकंठचूडामणिः ॥ १ ॥

तस्मादासीत्सुधासूतेर्ब्बुधो बुधनुतस्ततः ।

जातः पुरूरवा नाम चक्रवर्त्ती सविक्रमः ॥ २ ॥

तस्मादायुरायुषो नहुषः । नहुषाद्ययातिचक्रवर्त्ती वंशकर्त्ता । ततः प्राचीशः । प्राचीशात्सैन्ययातिः । सैन्यायातेर्हयपतिः । हयपतेस्सार्व्व-भौमः । सार्व्वभौमाज्जयसेनः । जयसेनान्महाभौमः । महाभौमादैशा-

नकः। ऐशानकात्क्रोधाननः। क्रोधाननाद्देवकिः। देवकेर्ऋभुकः। ऋभुकाद्दक्षकः। ऋक्षकान्मतिवरः। सत्रयागयाजी सरस्वतीनदीनाथः। ततः कात्यायनः। कात्यायनान्नीलः। नीलाद्दुष्यन्तः। तत्सुतः। आर्य्या।

गंगायमुनातीरे यदविच्छिन्नं निखाय यूपान्क्रमशः।

कृत्वा तथाश्वमेधान्नाम महाकर्म्मभरत इति योलभत ॥ ३ ॥

ततो भरताद्भूमन्युः। भूमन्योस्सुहोत्रः। सुहोत्राद्धस्ती। हस्तिनो विरोचनः। विरोचनादजमीलः। अजमीलात्संवरणः। संवरणस्य तपनसुतायास्तपत्याश्च सुधन्वा। सुधन्वनः परिक्षित्। परिक्षितो भीमसेनः। भीमसेनात्प्रदीपनः। प्रदीपनाच्छन्तनुः। शंतनोर्व्विचित्रवीर्य्यः। विचित्रवीर्यात्पाण्डुराजः

पुत्रास्तस्य च धर्म्मजभीमार्ज्जुननकुलसहदेवाः।

पंचेन्द्रियवत् पंच स्युर्व्विषयग्राहिणस्तत्र ॥ ४ ॥ वृत्तम्।

येनादाहि विजित्य खाण्डवमठो गाण्डीविना वज्रिणं

युद्धे पाशुपतास्त्रमंधकरिपोश्चालाभि दैत्यान्बहून्।

इन्द्रार्द्धासनमध्यरोहि जयिना यत्कालिकेयादिका

न्हत्वा स्वैरमकारिवंशविपिनच्छेदः कुरूणां विभोः ॥ ५ ॥

ततोर्ज्जुनादभिमन्युः। अभिमन्योः परिक्षित्। परिक्षितो जनमेजयः। जनमेजयात्क्षेमुकः। क्षेमुकान्नरवाहनः। नरवाहनाच्छतानीकः। शतानीकादुदयनः॥ ततः परं तत्प्रभृतिष्वविच्छिन्नसन्तानेष्वयोध्यासिंहासनासीनेष्वेकान्नषष्टिचक्रवर्त्तिषु गतेषु तद्वंश्यो विजयादित्यो नामा राजा विजिगीषया दक्षिणापथम् गत्वा त्रिलोचनपल्लवमधिक्षिप्य दैवदुरीहया

लोकान्तरमगमत्। तस्मिन्संकुले पुरोहितेन सार्द्धमन्तर्व्वत्त्नी तस्य महादेवी मुडिवेमुनामाग्रहारमुपगम्य तद्वास्तव्येन विष्णुभट्टसोमयाजिना दुहितृनिर्व्विशेषमभिरक्षिता सती विष्णुवर्द्धनन्नाम प्रसूय तस्य च कुमारकस्य मानव्यसगोत्रहारीतीपुत्रद्विपक्षगोत्रक्रमोचितानि कर्म्माणि कारयित्वा तमवर्द्धयत्। स च मात्रा विदितवृत्तान्तस्सन्निर्ग्गत्य चलुक्य-गिरौ नन्दां भगवतीं गौरीमाराध्य कुमारनारायणमातृगणान्संत्तर्प्य श्वेतातपत्रैकशंखपंचमहाशब्दपालिकेतनप्रतिढक्कावराहलांछनपिंछकुन्त-सिंहासनमकरतोरणकनकदण्डगंगायमुनादीनि स्वकुलक्रमागतानि क्षिप्तानीव तत्साम्राज्यचिह्नानि समादाय कडंबगंगादिभूमिपान्निर्जित्य सेतुनर्म्मदामध्यं सार्द्धसप्तलक्षं दक्षिणापथं पालयामास ॥ श्लोकः।

तस्यासीद्विजयादित्यो विष्णुवर्द्धनभूपतेः।

पल्लवान्वयजाताया महादेव्याश्च नन्दनः ॥ ६ ॥

तत्सुतः पोलकेशिवल्लभः। तत्पुत्रः कीर्त्तिवर्म्मा। तस्य तनयः। स्वस्ति श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतीपुत्राणां कौशिकीवरप्रसादलब्धराज्यानां मातृगणपरिपालितानां स्वामिमहासेन-पादानुध्यातानां भगवन्नारायणप्रसादसमासादितवरवराहलांछनेक्षण-क्षणवशीकृतारातिमण्डलानामश्वमेधावभृथस्नानपवित्रीकृतवपुषां चालुक्यानां कुलमलंकरिष्णोस्सत्याश्रयवल्लभेन्द्रस्य भ्राता कुब्जविष्णु-वर्द्धनोष्टादश वर्षाणि वेंगीदेशमपालयत्। तदात्मजो जयसिंहवल्लभः त्रयस्त्रिंशतम्। तदनुजेन्द्रराजस्सप्त दिनानि। तत्सुतो विष्णुवर्द्धनो नव ॥ तत्सूनुर्म्मंगियुवराजः पंचविंशतिम्। तत्पुत्रो जयसिंहवल्लभस्त्रयोदश।

तदवरजः कोक्किलिष्षण्मासान्। तस्य ज्येष्ठो भ्राता विष्णुवर्द्धन-स्तमुच्चाट्य सप्तत्रिंशतम्। तत्पुत्रो विजयादित्यभट्टारकोष्टादश। तत्तनुजो विष्णुवर्द्धनष्षट्त्रिंशतम्। तत्सूनुर्व्विजयादित्यनरेन्द्रमृगराजश्चाष्टा-चत्वारिंशतम्। तत्सुतः कलिविष्णुवर्द्धनोध्यर्द्धवर्षं तत्सुतो गुणग-विजयादित्यश्चतुश्चत्वारिंशतम्। तद्भ्रातुर्व्विक्रमादित्यभूपतेस्तनय-श्चालुक्यभीमस्त्रिंशतम्। तत्सुतः कोल्लबिगण्डविजयादित्यः षण्मासान्। तत्सूनुरम्मराजस्सप्त वर्षाणि। तत्सुतं विजयादित्यं बालमुच्चाट्य ताडपो मासमेकम्। तं जित्वा युधि चालुक्यभीमतनयो विक्रमादित्य एकादश मासान्। ततस्ताडपराजसुतो युद्धमल्लः सप्त वर्षाणि।

तं युद्धमल्लं परिहृत्य देशात्पिष्ट्वेतरेषामपि शात्रवानाम्।
क्ष्मामम्मराजानुजराजभीमो भीमस्समा द्वादश रक्षति स्म ॥७॥

तत्सूनुर्व्विनताराातिरम्मराजो नृपाग्रणीः।
पंचविंशतिवर्षाणि वेंगीभुवमपालयत्॥ ८॥
द्वैमातुरोम्मनृपतेर्द्दाननृपो राजभीमनृपतनयः।
विद्याकलापचतुरश्चतुरन्तधरामशात्समास्तिस्त्रः॥ ९॥
अनु दानार्ण्णवादासीद्दैवदुश्चेष्ट्या ततः।
सप्तविंशतिवर्षाणि वेंगीमहिरनायका॥ १०॥
अत्रान्तरे दाननरेन्द्रसूनु श्रीशक्तिवर्म्मा सुरराट्सधर्म्मा।
यश्शौर्य्यशक्त्या विनिहत्य शत्रून् सद्वादशाब्दान्समरक्षदुर्व्वीम्॥ ११॥
ततस्तदनुजो वीरो विमलादित्यभूपतिः।
महीमण्डलसाम्राज्यप्राज्यलक्ष्मीं मुदादधात्॥ १२॥

तेजो यदीयमखिलक्षितिपालमौलि

मालास्वभादमलरत्नरुचिच्छलेन।

पाति स्म सप्त स समास्सकलान्धरित्रीं

भीमप्रतापमहितो बिरुदांकभीमः ॥ १३ ॥

तस्माद्विमलादित्याद्रविकुललक्ष्म्याश्च कुंदवा देव्याः।

निजगुणवशीकृताखिलराजन्यो राजराजविभुरजनि ॥ १४ ॥

यस्सोमवंशतिलकः शकवत्सरेषु

वेदांबुराशिनिधिवर्त्तिषु सिंहगेर्क्के।

कृष्णद्वितीयदिवसोत्तरभद्रिकायां

वारे गुरोर्व्वणिजी लग्नवरेभिषिक्तः ॥ १५ ॥

इंद्रो यथा दिवमुदारयशास्तथोर्व्वीं

शौर्य्येण शश्वदखिलामभिरक्षितुम् यः।

श्रीविष्णुवर्द्धननृपो मकुटं पराद्ध्र्यं

मूर्ध्नादधान्मणिमयूखविभासिताशम् ॥ १६ ॥

संरक्षति क्षितितलं क्षपितारिवर्ग्गे

मार्ग्गेण यत्र नयशालिनि मानवेन।

प्रीताः प्रजा निजपवित्रचरित्रतोयैः

प्रक्षालयन्ति कलिकालकलंकपंकम् ॥ १७ ॥

सन्मार्ग्गेण कुलं कलागमपरिज्ञानेन कुर्व्वन्धियं

दीनानाथजनार्त्थितार्त्थनिवहत्यागेन लक्ष्मीं स्थिराम्।

संपूर्णामलचंद्रिकाविशदया कीर्त्या जगद्गीतया

यो दिक्चक्रमलंकरोति सुतरां चालुक्यचूडामणिः ॥ १८ ॥

यस्य स्फारभुजाकृपाणदलितारातीभकुंभस्थल

प्रोन्मुक्तामलवृत्तमौक्तिकचयस्संग्रामरंगांतरे ।

धत्ते वीररसक्रियाभिनयनप्रस्तावनालक्षितां

वीरश्रीरहितांजलिप्रविसरत्पुष्पोपहारश्रियम् ॥ १९ ॥

पित्रोर्व्वंशगुरू बभूवतुरलं यस्य स्फुरत्तेजसौ

सूर्य्याचन्द्रमसौ निरस्ततमसौ देवौ जगच्चक्षुषी ।

दंष्ट्राकोटिसमुद्धृताखिलमहीचक्रं महत् क्रीडया

विष्णोरादिवराहरूपमभवद्यच्छासने लांछनम् ॥ २० ॥

स सर्व्वलोकाश्रय श्रीविष्णुवर्द्धनमहाराजाधिराजो राजपरमेश्वरः परमभट्टारकः ॥ परममाहेश्वरः परमब्रह्मण्यः श्रीराजराजदेवो रेण्डेरुलुन-डिमिविषयनिवासिनो राष्ट्रकूटप्रमुखान् कुटुंबिनः समाहूय मंत्रिपुरोहित-सेनापतियुवराजदौवारिकप्रधानसमक्षमित्थमाज्ञापयति यथा ॥

हारीतगोत्रे हरिमूर्त्तिरापस्तंबद्विजश्रेष्ठविभुर्व्विनीतः ।

सदा पुरोडाशपवित्रवक्त्रो विद्वानभूत्कंचेनसोमयाजी ॥ २१ ॥

तस्य श्रीमान् हिमकरकरप्रस्फुरत्कीर्त्तिराशे

रासीत्सूनुः सकलविदुषामंचितः कंचेनार्य्यः ।

यं मन्यंते यममरिगणाः कामधेनुं कवींद्राः

क्रीडारामं परमसुहृदो जीवितं बंधुवर्ग्गः ॥ २२ ॥

तस्यात्मजो महात्मा समजनि शौचांजनेय इति विदितः ।

प्रज्ञाजितवाचस्पतिरकलंकाशंकनामात्यः ॥ २३ ॥

तस्य च सुधर्म्मपत्न्या गुणशालिन्याश्च सामेकांबायाः।

अभवदनुष्ठितजगदुपकर्णो नारायणस्तनयः ॥ २४ ॥

यः संस्कृतकर्ण्णाटप्राकृतपैशाचिकांध्रभाषासु ।

कविराजशेखर इति प्रथितः सुकवित्वविभवेन ॥ २५ ॥

कवीन्मनीषालवदुर्व्विदग्धान्मनोहराभिर्न्निजसूक्तिभिर्य्यः ।

कुर्व्वन्नगर्व्वान्पटुभिर्ब्बिभर्त्ति कवीभवज्रांकुशनाम सार्त्थम् ॥ २६ ॥

तस्मै सकलजगदभिनुतगुणशालिने सरस्वतीकर्ण्णावतंसायाष्टादशाव-

धारणचक्रवर्त्तिने नन्निनारायणाय भवद्विषये नन्दमपूण्डिनामग्रामोग्रहारी-

कृत्य सोमग्रहणनिमित्ते धारापूर्व्वकमस्माभिस्सर्व्वकरपरिहारेण दत्त इति

विदितमस्तु वः ॥ अस्य सीमानः ॥

[Here follow the boundaries of the village granted, narrated in Telugu language in ll.80-88]

अस्योपरि न केनचिद्बाधा करणीया ।

यः करोति स पंचमहापातकयुक्तो भवति ॥

तथा चोक्तं भगवता व्यासेन ।

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।

षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः ॥ २७ ॥

बहुभिर्व्वसुधा दत्ता बहुभिश्चानुपालिता ।

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ २८ ॥

इति ॥ आज्ञप्तिरस्य कटकाधिराजः काव्यानां कर्त्ता नन्नियभट्टो लेखको

गण्डाचार्य्यः ॥ द्वात्रिंशत्तमे विजयराज्यवर्षे वर्द्धमाने कृतमिदं

शासनम् ॥

Summary

This inscription, engraved on a set of five copper-plates, consists 93 lines of well-executed and well-preserved writing, which exhibits two successive stages of the Southern alphabet. Text of the grant is in a mixture of verse and prose. There are 28 verses and two imprecatory stanzas in this composition. Of the verses 1-20, seven (*viz.,* verses 1-6 and verse 20) occur in exactly the same, and one (verse 15) in a slightly different form, also in the Korumelli plates of Rājarāja I (No.37 above); and some of the remaining verses show that their reputed author, Nanniyabhaṭṭa, knew other verses of the Korumelli plates, or verses of which those of the Korumelli plates were themselves copies or imitations.

The inscription records a grant by the king Rājarājadēva I, otherwise called Vishṇuvardhana, of the Eastern Chālukya family. Excepting the details of this grant in lines 65-93, it contains nothing whatever that is new to us. Up to the end of line 52 the information furnished by it, mythical, legendary and historical, is in every particular the same as that contained in lines 1-55 of the Korumelli plates of the same king, and in lines 1-46 of the Chellūr plates of Vīrachōḍadēva (No.41 below). And lines 53-65 also, only relate, what is more fully stated in lines 55-74 of the Korumelli plates, that Rājarāja-Vishṇuvardhana, 'the crest-jewel of the Chālukyas' was the son of his immediate predecessor Vimalāditya and his wife Kundavādēvī, 'the goddess of the fortune of the family of the Sun' (meaning the Chōḍa family), and record the date of his coronation, which is given in identical terms in the Korumelli plates, and has been

shown to correspond to Thursday, the 16th August A.D. 1022.

Lines 65 ff., formally introduce the donor of the present grant, king Rājarāja I. Here he is called Sarvvalōkāśraya (the asylum of the whole world), Vishṇuvardhana *Mahārājādhirāja, Rājaparamēśvara, Paramabhaṭṭāraka, Paramamaēśvara* and *Pramabrahmaṇya,* who having called together the cultivators, headed by the *Rāshṭrakūṭas,* dwelling in the Reṇḍēṟulunaḍimi-*vishaya*[1], issued a command in the presence of the *Mantrin, Purōhita, Sēnāpati, Yuvarāja, Dauvārika* and *Pradhāna* (councillor). This order states that Rājarāja I gave away, on the occasion of a lunar eclipse, free from all taxes, the village named Nandamapūṇḍi included in the said Reṇḍēṟulunaḍimi-*vishaya,* having constituted it an *agrahāra,* to the Brāhmaṇa Nanni-Nārāyaṇa.

The donee's ancestry and achievements are given at length in verses 21-26. In the Hārita *gōtra* there was a distinguished Āpastamba Brāhmaṇa, Kañchena, a Sōma-yāga sacrificer. His son was Kañchenārya[2], honoured by all the learned. His son, again, was the minister (*Amātya*) Akalaṅkāśaṅkana, known by the name of Śauchāñjanēya, 'a Hanumat in purity'. To him his wife Sāmekāmbā bore a son, Nārāyaṇa, who, on account of his skill in composing poetry in the Saṁskrita, Karṇāṭa, Prākṛita, Paiśāchika and Āndhra languages, was renowned as Kavirājaśēkhara, 'the crest of the kings of poets', and who, because by his clever verses he put to shame would-be poets, was rightly called Kavībhavajrāṅkuśa, ' the admantine elephant-goad of poets'. It is to this Nanni-Narāyaṇa, who was endowed with qualities that are extolled by the whole world, and

was an ear-ornament of (the goddess of eloquence) Sarasvatī, and an *ashṭādaś-āvadhāraṇa-chakravartin,*[3] that Rājarāja I gave away the village Nandamapūṇḍi.

Four villages, a tank and some trees are mentioned among the boundaries of the village granted. Then there is the usual exhortation that no obstruction should be caused to the grant, followed by two of the customary imprecatory and benedictive stanzas.

The executor (*Ājñapti*) of the grant is Kaṭakādhirāja; the author of the verses is Nanniyabhaṭṭa; and writer is Gaṇḍāchārya.

This charter was issued in the 32nd regnal year of the king Rājarāja I. The grant was made probably on Sunday, the 28th November A.D. 1053.

Notes

1. Reṇḍ-ēṟulu-naḍimi-vishaya means 'the two-rivers-middle-district', and is thus the Telugu equivalent of Sindhuyugmāntara-dēśa, which is mentioned in lines 66-67 of the Piṭhāpuram inscription of Pṛithvīśvara (*EI.,* IV, p.303).

2. It is quite unusual that both father and son bore the same name.

3. *Ashṭādaś-āvadhāraṇa* has been compared with the phrases *aṭṭhārasa vijjaṭṭhāndni,* 'the eighteen branches of knowledge', and *aṭṭhārasa sippāni,* 'the eighteen attainments', so frequently met with in the Pāli *Jātakas* (*ibid.,* p.302, *n.*1).



No.39

KALIDINDI GRANT OF EASTERN CHALUKYA RAJARAJA I

Location	: Kalidiṁḍi, Krishna District, Andhra Pradesh
Date	: 1019-1060 A.D.
Script	: Telugu-Kannaḍa
Language	: Snaskrti
King	: Rājarāja I
Dynasty	: Eastern Chālukya
Referecne	: Venkataramanayya, N., *EI.,* XXIX, pp.57-71

Text

Metre: Vv. 1, 5, 14, 16, 20, 21, 23, 24, 25, 28 *Śārdūla-vikrīḍita;* 2, 3, 6, 7, 10, 11, 17, 27, 31, 32, 33 *Anushṭubh;* 4 *Udgīti;* 8, 18 *Vasantatilakā;* 9, 19 *Mandākrāntā;* 12 *Upajāti;* 13 *Mālinī;* 15 *Āryā;* 22 *Gīti;* 26, 29, 30, 36 *Āryāgīti;* 34, 35 *Svāgatā;* 37 *Vaṁśastha;* 38 *Pushpitāgrā.*

श्रीधाम्नः पुरुषोत्तमस्य महतो नारायणस्य प्रभो

र्न्नाभीपंकरुहाद्बभूव जगतस्स्रष्टा स्वयंभूस्ततः ।

जज्ञे मानससूनुरत्रिरिति यस्तस्मान्मुनेरत्रित

स्सोमो वंशकरस्सुधांशुरुदितः श्रीकंठचूडामणिः ॥ १ ॥

तस्मादभूत्सुधासूतेर्ब्बुधो बुधनुतस्ततः ।

जातः पुरूरवा नाम चक्रवर्त्ती सविक्रमः ॥ २ ॥

तस्मादायुस्ततो नहुषः ततो ययातिः चक्रवर्त्ती वंशकर्त्ता ततः पुरुरिति

चक्रवर्त्ती ततो जनमेजयोश्वमेधत्रितयस्य कर्त्ता ततः प्राचीशः तस्मात् सैन्ययातिः ततो हयपतिः ततस्सार्व्वभौमः ततो जयसेनः ततो महाभौमः तस्मादैशानकः ततः क्रोधाननः ततो देवकीः तस्मादृचुकः तस्मादृक्षकः ततो मतिवरः सत्रयागयाजी सरस्वतीनदीनाथः ततः कात्यायनः ततो नीलः ततो दुष्यन्तः तत्सुतः।

चक्रवर्त्ती महातेजा भरतो यूपकाननं।

कृत्वाश्वमेधानकरोद्गंगायमुनयोस्तटे ॥ ३ ॥

ततो भरताद्भूमन्युः। ततस्सुहोत्रः। ततो हस्ती। ततो वीरोचनः। तस्मादजमीलः। ततस्संवरणः। संवरणस्य तपनसुतायास्तपत्याश्च सुधन्वा। ततः परीक्षित्। ततो भीमसेनः। ततः प्रदीपनः। ततः शन्तनुः। ततो विचित्रवीर्य्यः। ततः पाण्डुराजः ॥

पुत्रास्तस्य युधिष्ठिरभीमार्जुननकुलसहदेवाः।

पंचेंद्रियवत्पंचस्वर्व्विषयग्राहिणस्तत्र ॥ ४ ॥

जित्वा येन पुरंदरं हुतवहे हव्यीकृतं खाण्डवं

यश्शंभोर्ल्लभते स्म संयति बहून्यस्त्राणि दिव्यानि च।

येनाध्यासितमासनं मघवतश्चार्द्धं सुरद्वेषिणः

संपिष्यागमयत्कृतान्तनगरीं यः कौरवान्विद्विषः ॥ ५ ॥

ततोर्जुनादभिमन्युः। ततः परीक्षित्। ततो जनमेजयः। ततः क्षेमुकः। ततो नरवाहनः। ततः शतानीकः। तस्मादुदयनः। ततः परं तत्प्रभृतिष्वविच्छिन्नसन्तानेष्वयोध्यासिंहासनासीनेष्वेकान्नषष्टिचक्रवर्त्तिषु गतेषु तद्वंश्यो विजयादित्यो नाम राजा विजिगीषया दक्षिणापथं गत्वा

त्रिलोचनपल्लवमधिक्षिप्य कालवशाल्लोकान्तरमगमत्। तस्मिन्संकुले तस्य महादेवी गर्भभारालसान्तःपुराधिकृतवनिताकंचुकिभिस्सार्द्धं वृद्धामात्यैः पुरोहितेन चानीयमाना कथंचिन्मुडिवेमुनामाग्रहारमुपगम्य तद्वास्तव्येन विष्णुभट्टसोमयाजिना दुहितृनिर्व्विशेषमभिरक्षिता सती नन्दनं विष्णुवर्द्धनमसूत सा तस्य च कुमारस्य मानव्यसगोत्रहारिति-पुत्रादिस्वक्षत्रगोत्रक्रमोचितानि कर्म्माणि कारयित्वा तमवर्द्धयत्॥ स च मात्रा विदितवृत्तान्तस्सन्निर्ग्गत्य चालुक्यगिरौ नंदां भगवतीं गौरीमाराध्य कुमारनारायणमातृगणांश्च संतर्प्य श्वेतातपत्रैकशंखपंच-महाशब्दपालिकेतनप्रतिढक्कावराहलांछनपिंच्छकुंतसिंहासनमकरतोरणक नकदण्डगंगायमुनादीनि स्वकुलक्रमागतानि निक्षिप्तानीव साम्राज्य-चिह्नानि समासाद्य त्रिलोचनपल्लवं जित्वा तत्सुतामुत्तमदानीमुपयम्य कदंबगंगादिभूमिपान्निर्ज्जित्य सेतुनर्म्मदामध्यं सार्द्धसप्तलक्षं दक्षिणापथं पालयामास ॥

तस्यासीद्विजयादित्यो विष्णुवर्द्धनभूपतेः।
पल्लवान्वयजाताया महादेव्याश्च नंदनः ॥ ६ ॥

तत्सूनुः पुलकेशि वल्लभः। तत्पुत्रः कीर्त्तिवर्म्मा। तस्य तनयः। श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतिपुत्राणां कौशिकीवर-प्रसादलब्धराज्यानां मातृगणपरिपालितानां स्वामिमहासेनपादानु-ध्यातानां भगवन्नारायणप्रसादसमासादितवरवराहलांछनेक्षणक्षणवशी-कृतारातिमण्डलानामश्वमेधावभृथस्नानपवित्रीकृतवपुषां चालुक्यानां कुलमलंकरिष्णोस्सत्याश्रयवल्लभेंद्रस्य भ्राता कुब्जविष्णुवर्द्धनोष्टादश

वर्षाणि वेंगीदेशमपालयत्तत्सूनुः जयसिंहवल्लभस्त्रयस्त्रिंशतम्। तदनुजेन्द्रराजनंदनस्सप्त दिनानि तत्पुत्रो विष्णुवर्द्धनो नव वर्षाणि। तत्सूनुर्म्मंगियुवराजः पंचविंशतिम्। तत्तनयो जयसिंहस्त्रयोदश। तदनुजः कोकिलिः षण्मासान्। तस्य ज्येष्ठो भ्राता विष्णुवर्द्धनस्तमुच्चाट्य सप्तत्रिंशतमब्दान्। तत्सुतो विजयादित्यभट्टारकोष्टादश। तत्पुत्रो विष्णुवर्द्धनः षट्त्रिंशतम्। तत्सूनुर्न्नरेंद्रमृगराजोष्टचत्वारिंशतम्। तत्सुतः कलिविष्णुवर्द्धनोध्यर्द्धवर्षम्। तत्तनयो गुणगविजयादित्यश्चतुश्चत्वारिंशतम्। तद्भ्रातुर्व्विक्रमादित्यभूपतेस्सुतश्चालुक्यभीमस्त्रिंशतम्। तत्पुत्रो विजयादित्यषण्मासान्। तत्सूनुरम्मराजस्सप्त वर्षाणि। तत्सुतः विजयादित्यं बालमुच्चाट्य ताडपराजो मासमेकं। तं जित्वा चालुक्यभीमतनयो विक्रमादित्य एकादश मासान्। तत्ताडपराजसुतो युद्धमल्लस्सप्त वर्षाणि। ततः॥

अम्मराजानुजो राजाभीमो भीमपराक्रमः।
विजित्य युद्धमल्लं तं द्वादशाब्दान् ध.... ॥ ७॥

सत्पुत्रयोर्द्दशरथप्रतिमस्य तस्य
भीमस्य रामभरतोपमयोःकनीयान्।
दानार्ण्णवाम्मनृपयोः खलु पंचविंश
त्यब्दानरक्षदवनीतलमम्मराजः॥ ८॥

तस्य ज्येष्ठो नृपतिषु चतुष्षष्टिविद्याप्रवीणो
यः कर्ण्णादीन्सुरतरुनिभो भूरिदानेन जित्वा।
लोकेन्वर्त्थं सुचिरमदधान्नाम दानार्ण्णवाख्य

स्स त्रीनब्दानवहदवनीमर्ण्णवक्षौमकान्ताम् ॥ ९ ॥

ततः परं पतिं लब्धुमनुरूपमनायिका ।

सप्तविंशतिवर्षाणि चचारेव तपः क्षमा ॥ १० ॥

अथ दानार्ण्णवाज्जातः कलावान् द्विट्तमोहरः ।

राजा चालुक्यचंद्रो यः क्षमातापमपाकरोत् ॥ ११ ॥

बलाद्गृहीत्वा बलितो धरित्रीं गीर्व्वाणशत्रोरिव शत्रुवर्ग्गात् ।

श्रीशक्तिवर्म्मा स समाश्चलुक्यनारायणो द्वादश रक्षति स्म ॥ १२ ॥

तदनुतदनुजन्मा राजमार्त्तण्डभूपो

विशदरुचिररातिध्वान्तविध्वंसदक्षः ।

स्म वहति भुवमब्दान्सप्त सप्ताश्वतेजा

स्सकलवसुमतीभृन्मस्तकन्यस्तपादः ॥ १३ ॥

लक्ष्मीभर्तृनिभस्य तस्य विमलादित्यस्य चोडान्वय

क्षीरांभोनिधिजन्मनः श्रिय इव श्रीराजराजाधिपः ।

देव्याश्चाजनि राजराजदुहितुः कुंदांबिकायास्सुतो

यः कंदर्प्प इवापरः प्रतिवसन् लोकत्रये स्त्रीहृदि ॥ १४ ॥

बाल्ये भूषणमभवद्रत्नमयी यस्य कंठिका कंठे ।

गुणलुब्धयेव माला धरया दत्ता पतिंवरया ॥ १५ ॥

वेदांभोधिनिधिप्रमाणगणिते शाकाब्दसंघे रवौ

सिंहस्थे बहुलद्वितीय दिवसे वारे गुरोश्शीतगौ ।

युक्ते भोत्तरभद्रयाप्यतिवणिज्यामे तु सर्व्वक्षमां

त्रातुं पट्टमधत्त यो गुणनिधिः श्रीराजराजोनृपः ॥ १६ ॥

यस्योत्तमांगमाबद्धमाभात्पट्टेन भूयसा ।

भर्त्तुं विश्वंभराभारं जनैरारोपितं यथा ॥ १७ ॥ अपि च ॥

ख्यातस्समस्तनरनाथकिरीटकोटि

रत्नप्रभापटलपाटलपादपीठः ।

यस्त्यागवर्षपरिहर्षितसत्समाजो

राजेंद्रचोड इति चोडकुलैकरत्नम् ॥ १८ ॥

एकस्यासीदपि स हिमवानीश्वरस्यापतद्भि

र्म्मूर्द्ध्नोगंगाविमलसलिलैस्सिच्यमानः पवित्रः ।

राजेंद्रोयं किमुत नमतामीश्वराणां बहूनां

रत्नालोकप्रकटितजगत्प्रांगणे भ्यश्शिरोभ्यः ॥ १९ ॥

सद्वीपां चतुरंबुराशिपरिखां विश्वंभरां लीलया

दण्डेनैव विजित्य यो दशदिशि प्रातिष्ठिपत्सर्व्वतः ।

स्वैरोद्भ्रान्तिनिवारणाय विजयस्तंभान्स्वनामांकिता

नालानानिव बद्धुमंधमनसो दर्प्पेण दिग्दन्तिनः ॥ २० ॥

स श्रुत्वा परितुष्य वंशविनयत्यागाभिमानोन्नतिं

प्रज्ञाविक्रमसत्यशौचपटुताशौर्य्यक्षमादीन्गुणान् ।

चोडेशो मधुरान्तकः स्वतनयामम्मंगनामां सतीं

चाळुक्याभरणस्य चाग्रमहिषीं स्नेहेन यस्याकरोत् ॥ २१ ॥

यस्मिन्राजनि रक्षति भूचक्रमवक्रमुचितमार्ग्गेण ।

अभवदबाधमकल्मषमदूषितममत्सरं प्रजाभरितम् ॥ २२ ॥

राज्ञो राजचलुक्यवंशलतिकालंबस्य यस्य स्वयं

शश्वत्कीर्त्तिरलंकरोति नितरां लोकत्रयीकामिनीम्।

हारालीव सुगन्धिचन्दनमयी . . . ललामकी

मालेवामलजातिजालकलिता दौकूललक्ष्मीरिव ॥ २३ ॥

यस्य श्रीपरगण्डभैरवविभोर्द्दोर्द्दण्डकौक्ष्येयक

प्रोद्भिन्नाहितहस्तिमस्तकगलन्मस्तिष्कखादाशया।

गृध्राः पक्षपुटान्विसार्य्य वियति व्याबद्धचक्राश्चलत्

पिच्छापत्रचयश्रियं विदधते वीरश्रियस्संयति ॥ २४ ॥

एकेनैव हयी हयेन बहुशोवाहासहस्रन्तथा

को वा वीरभटो जयेत् प्रतिभटं चास्त्राभिवर्षैस्तथा।

कस्सिंचेदिति विद्रुता रणमुखास्वाश्चर्य्यपर्य्याकुला

यस्यारातय एव शौर्य्यमनिशं स्तुन्वन्ति तन्वन्ति च ॥ २५ ॥

स्वस्ति। सर्वलोकाश्रयश्रीविष्णुवर्द्धनमहाराधिराजपरमेश्वरपरमभट्टारकः परममाहेश्वरः परमब्रह्मण्यः मातापितृपादानुध्यातः त्यागसिंहासनासीनः गाडेवलुनामविषयसहितां पल्लपुगुद्रवारविषयमधिवसतः राष्ट्रकूटप्रमुखान्कुटुम्बिनः सर्व्वान्समाहूय मन्त्रिपुरोहितसेनापतियुवराजदौवारिकप्रधानादिसमक्षमित्थमाज्ञापयति। यथा।

ख्यातोस्ति राजराजब्रह्ममहाराज इति महादण्डपतिः।

यो मधुरान्तकभूभृत्करुणारससिक्तवर्द्धितयशोलतिकः ॥ २६ ॥

राजेन्द्रचोडभूपालराज्यलक्ष्मीमहानिधेः।

रक्षणक्षमदक्षोग्रमहाभुजभुजंगमः ॥ २७ ॥

दिक्तोदक्षिणतः पुरस्कृतबृहद्दण्डः प्रचण्डस्स यो

विद्विट्छोणितपानगृध्नुरपरः कालो न वेतीक्षितः ।
राजेन्द्रक्षितिपालकस्य महतो मन्मातुलस्यातुल
स्यादेशं प्रतिपद्य तत्क्षणत एवांध्रक्षमां प्रागमत् ॥ २८ ॥
अन्योपि दण्डनाथो भक्तिक्लेशप्रहृष्टनिजनाथः ।
अमुनैवागतवानुत्तमशोडच्चोडगोनिति व्यपदिष्टः ॥ २९ ॥
उत्तमचोडमिलाडुडयानित्यन्योपि चागतः पुरुषः ।
यः पतिरथ सेनायाः पतिव्रतायाः परेक्षणासहनायाः ॥ ३० ॥
कर्ण्णाटिकबलारण्यं दग्धुकाममशेषतः ।
दण्डनाथत्रयं दृष्टमग्नित्रयमिवोज्वलम् ॥ ३१ ॥
कर्न्नाटद्रमिलाधीशदण्डेशामभवद्रणम् ।
परस्परचतुर्द्दन्तप्रतिघट्टनभीकरम् ॥ ३२ ॥
मुष्टामुष्टि क्वचिद्दृष्टं केशाकेश्यभवत्क्षणम् ।
दण्डादण्डि क्वचित्प्रोक्तं कुन्ताकुन्ति निरन्तरम् ॥ ३३ ॥
जघ्निरे निजशरैरपि केचिद्धन्विनो युधि समर्द्धितशौर्य्याः ।
सेनयोरपि परस्परबाणापातजातजववातविवृत्तैः ॥ ३४ ॥
खड्गिखड्गदृढघट्टनजाते विस्फुलिंगनिवहे सुलभाः स्युः ।
सद्भटा भयभृतश्चलचित्ताः पंचष ..... पदात्योः ॥ ३५ ॥
नृत्यन्ति गजकबन्धास्तुरगकबन्धाश्च नरकबन्धप्रमुखाः ।
ऋणमद्यैव विमुक्तं निजनाथावंध्यपोषणस्येति मुदा ॥ ३६ ॥
गजैर्ग्गजा वाजिभिरेव वाजिनो नरैर्न्नरास्तत्र समं विनाकृताः ।
द्विपक्षयोः कालवशेन संयुगे समानयुद्धं सममेव नश्यति ॥ ३७ ॥

भृशमवसर एष नः प्रगन्तुं दिवमनुचिंत्य पदातियुग्ममुख्याः।
दिविजयुवतिसंगकांक्षयेयुः सममथ दैवदुरीहया च भूमेः॥ ३८॥

एतद्रमिलदण्डनाथानां राजराजब्रह्ममहाराजनामधेयो स्वमातुलस्य मधुरान्तकदेवस्यातुलस्यादेशं प्राप्य कर्न्नाटकदण्डनाथैर्य्युद्ध्वा तैरेवसार्द्धं दिवं गतवानश्विकेन हस्तिकेन च बलेन बाहाबलेन च समबलत्वाच्च। तमुद्दिश्य कलिदिण्डिग्रामे राजराजेश्वरमिति शिवायतनमकरवम्। उत्त-मशोडच्चोडगोनित्युत्तमचोडमिलाडुडयानिति प्रसिद्धावन्यावपि चोद्दिश्य शिवायतनद्वयं करोमि ...... मंगलोत्तुंगसंगीतकखण्डस्फुटितनवक-र्म्मबल्युपहाराद्यर्थं पंचाशच्छात्राणां शास्त्रस्य श्रोतृणां सत्रार्थं च द्वया-धिकपंचाशद्वेश्याभिः। ब्राह्मणशतेन ब्रह्मवेदिना हुतजातवेदसा वैश्यश-तेन च धनदोपमेन शूद्रशतेन ब्रह्मपादकमलसंभूतेन च सार्द्धं मधुरान्त-कनल्लूरिनाम्ना प्रसिद्धः कलिदिण्डिनामग्रामः मागडवरुग्रामटिकया दत्तः तस्यावधयः। पूर्व्वतः कोन्नेकी सीमैव सीमा आग्नेयतः .. लिदोर्रुसीमैव सीमा। दक्षिणतः कोण्ठमसीमा। नैर्ऋत्यतः वेवाकसीमैव सीमा। प-श्चिमतः कड......सीमैव सीमा। वायव्यतः दाडिनाण्टि सीमैव सीमा। उत्तरतः। पोतुंबर्तिसीमैव सीमा। ईशानतः पोतूंबर्तिसीमैव सीमा। पल्लपुगुद्रवारे कडपर्रुनामग्रामः दुग्गियपूण्डि ..... ग्रामस्य पूर्व्वतः। कलुदिण्डिसीमैव सीमा। अग्नेयतः एषैव दक्षिणतः। वेवा-कसीमैव सीमा। नैर्ऋत्यतः एषैव। पश्चिमतः। आवकूरुसीमैव सीमा। वायव्यतः तामरकोलनि क्रोव्विण्ड्लेटंबासिनतल्लिक्रोय्यनामा नदी। उत्तरतः। कल्वसण्डसीमैव सीमा। ईशानतः। ताडिनाण्टिसीमैव

सीमा। पल्लपुगुद्रवारे आवकू .... तः कडपर्तिसीमैव सीमा। आग्ने........... मतः कोण्डिकमुंजलूरसीमैव .... र्तिसीमैव सीमा। ईशानतः कड .... स पंचमहापातकैर्युक्तो भ .... वा यो हरेत वसुन्ध .... बहुभिश्वानुपालि .... म्र्मसेतुर्नृपां का .... भूयो याचते रामभद्र .... भूपा ये पालयन्ति मम .... पामाधिकत्वविधिना श्रीराजरा .... स्ताद्रेरपरात्सदास्तविधिना .... शो राचियपेद्देरिभी ....

Summary

This inscription, engraved on a set of 5 copper-plates, consists 122 lines of neatly executed writing. The last plate is a broken fragment. The plates are strung on a circular ring the ends of which are soldered into the bottom of a circular seal. This is a very fine specimen of the seals of the Eastern Chālukya kings. Its base is moulded into the shape of a four petalled flower. It bears the legend *Śrī-Tribhuvanāṁkuśaṁ* in relief across the middle. Above the legend are represented in relief the crest of the Eastern Chālukya royal family, *viz.,* the boar in a running posture facing the proper left, and other symbols of royalty. Below the legend are seen certain objects, a four-legged stool, *etc.* The composition of the inscription is in prose and verse. There are 41 stanzas in different metres and 8 prose passages of varying length interspersed among them.

The date of the inscription is either not given or lost in the missing portion.

The text of the genealogy including the *praśasti* embodied in this inscription presents close textual affinities, with slight variations here and there with the other Chālukya charters of the period especially the Kōrumelli plates and the Nandampūṇḍi grant of Rājarāja I himself and the Raṇastipūṇḍi grant of his father, Vimalāditya (No.36 above).

The inscription begins with the genealogical account of the Eastern Chālukyas up to Rājarāja I. The legendary genealogy opens with Nārāyaṇa, Brahmā, Atri, Chandra, *etc.,* and proceeds without a break up to Udayana, the son of Śatānīka. Then comes a hiatus which the composer of the genealogy bridges up with 59 nameless kings who are said to have ruled at Ayōdhyā. The sixtieth, Vijayāditya by name, migrated to Dakshiṇāpatha, where, in an encouter with Trilōchana-Pallava, he perished. His posthumous son, Vishṇuvardhana, however, restored the fortunes of his family and established his authority over the country between the Narmadā and the Sētu.

This long Puranic or mythical genealogy was introduced to the Eastern Chālukyan grants from the time of accession of Vimalāditya, probably due to the Chōḷa influnce on the Eastern Chālukya kings. Historicity of Vijayāditya as the founder of the Eastern Chālukya dynasty has not been established.

Then the history of the Eastern Chālukyas is traced from Kubja-Vishṇuvardhana to Rājarāja I. It is practically identical with similar accounts found elswhere. This genealogical account discloses certain facts about Rājarāja's reign, unknown from other sources. It refers,

no doubt, like the Kōrumelli and the Nandampūṇḍi grants to Vimalāditya's marriage with Kundavvai and the birth of a son to them called Rājarāja as well as the coronation of the latter in Śaka 944. The new information found is that Rājarāja, when still a boy, was invested with the necklace (*kaṇṭhikā*), the insignia of the office of *Yuvarāja;* and that his uncle, the Chōḷa emperor Rājēndra-Chōḍa Madhurāntaka, having heard of his great qualities, bestowed on him with affection the hand of his daughter, the princess Ammaṅgā, who became his chief queen. In this connection occurs an elaborate description of the greatness of the Chōḍa emperor, his supremacy over the kings on the earth, and the exent of the dominion subject to his authority. Two of the stanzas occurring here (19-20) seem to allude to Rājēndra-Chōḷa's Gangetic expedition and his transmarine conquests.

After the *praśasti* portion the donor, king Rājarāja I is formally introduced as Sarvalōkāśraya Vishṇu-vardhana-*Mahārājādhirāja-Paramēśvara-Paramabhaṭṭā-raka-Paramamāhēśvara,* who was devoted to Brāhmaṇas and his parents, and who was highly munificent. The king is stated to have addressed his ministers, priests, generals and others stationed in the Gāḍevalu-*vishaya* and Pallapu-Gudravāra-*vishaya* regarding the donations made through the present grant.

Then follows a long passage which narrates the cirumstances in which the present grant was made. It states (line 77-85) that the gęneral Rājarāja Brahma-Mahārāja rose to eminence by grace of the king Rājēndra-Chōḷa Madhurāntaka and guarded his kingdom. On the orders of the king he marched into the Āndhra country at

the head of a vast army, accompanied by two other generals, Uttama Chōḷa Chōḍakōn and Uttama Chōḷa Milaḍuḍaiyān. The three Tamil commanders became engaged in a fierce battle with the commanders of the king of Karṇāṭa. The battle between the two armies is described vividly (lines 85-93). The engagement seems to have ended indecisively; for it is said that the commanders of both the sides who participated in the fight perished with their foces (lines 93-96). It was in these circumstance that king Rājarāja I set up in memory of Rājarāja Brahma-Mahārāja, a temple dedicated to God Śiva called Rājarājēśvaram in the village of Kalidiṇḍi. Two other Śiva temples were also built in memory of Uttama-Chōḷa Chōḷakōn and Uttamachōḷa Milāḍuḍaiyān respectively. For conducting worship in these temples, and for the maintenance of a choultry for feeding fifty students, *etc.,* the village of Kalidiṁḍi[1] renamed Madhurāntakanallūr, together with two other villages called Kaḍapaṟṟu[2] and Āvakūru[1], was granted by the king (lines 96-103). All the three villages were situated in the lower (*Pallapu*) Gudravāra-*vishaya.* Boundaries of these gift villages are given.

The last line in the broken fragment of 5^{th} plate which begins with *śō Rāchiya-Peddēri-Bhī. . .* is found to form part of a verse that occurs in the Kōrumelli grant of Rājarāja I (No.37 above). This verse gives the names of the executor, the composer and the scribe of that grant. It is suggested that the present grant ended with this same verse and that the remaining part of it was lost with the missing part of the plate. Thus it is held that the *ājñapti* of the present grant was Kaṭakēśa, the composer Bētana-

bhaṭṭa, son of Rāchiya-Peddēri-Bhīma, and the scribe, Gaṇḍāchārya.

Notes

1. These villages retain their names to the present day and are situated on the eastern fringe of the Colair Lake in the Kaikalur Taluk of the Krishna District (*EI.,* XXIX, p.64).

2. The third village Kadaparṟu must be looked for in the same locality as in No.1 above, as it is said to have been situated between Kalidiṁḍi and Āvakūru (*ibid.*).



No.40

TEKI PLATES OF RAJARAJA-CHODAGANGA

Location : Tēki, Godavari District, Andhra Pradesh

Date : Regnal year17 (of Kulōttuṅga I.) =1086-87 A.D

Script : Telugu-Kannaḍa

Language : Sanskrit

King : Rājarāja –Chōḍagaṅga

Dynasty : Eastern Chālukya

Reference : Hultzsch, E., *EI.,* VI, pp.334-347

Text

Metre: Vv. 1, 7, 32 *Vasantatilakā;* 2, 3, 14-16, 18, 21-29, 37-48 *Anushṭubh;* 4 *Āryāgīti;* 5, 6, 9, 19, 33-35 *Śārdūlavikrīḍita;* 8, 13 *Gīti;* 10, 31, 36 *Sragdharā;* 11, 12, 17, 20 *Upajāti;* 30 *Śālinī*

श्रीमाञ्जगत्त्रयमिदं हरिरादिदेवः

स्रष्टुं विरिंचिमसृजन्निजनाभिपद्मात्।

तस्मादभूत् किल महामुनिरत्रिरस्मा

चूडामणिः पुररिपोरुदितस्सुधांशुः ॥ १ ॥


तस्माद्बुधः ततश्चक्रवर्त्ती पुरूरवाः तस्मादायुस्ततो नहुषः ततो ययातिः ततः पूरुः ततो जनमेजयः ततः प्राचीशः ततस्सैन्ययातिः ततो हयपतिः ततस्सार्वभौमः ततो जयसेनस्ततो महाभौमः तस्मादैशानकः ततः क्रोधाननः ततो देवकिः तस्माद्दभुकः तस्माद्दक्षकः ततो मतिवरः ततः कात्यायनः ततो नीलः ततो दुष्यंतः ततो भरतस्ततो भूमन्युस्ततो हस्ती


ततो विरोचनः तस्मादजमीलस्ततस्संवरणस्ततस्सुधन्वा ततः परिक्षित् ततो भीमसेनः ततः प्रदीपनः ततश्शंतनुः ततो विचित्रवीर्यः ततः पाण्डुराजः ततः पाण्डवाः तेषु वंशकरादर्ज्जुनादभिमन्युः ततः परिक्षित् ततो जनमेजयः ततः क्षेमुकः ततो नरवाहनस्ततश्शतानीकः तस्मादुदयनः। ततः प्रभृत्यविच्छिन्नसंतानेष्वयोध्यासिंहासनासीनेष्वेकान्नषष्टिचक्रवर्त्तिषु गतेषु तद्वंश्यो विजयादित्यो नाम राजा विजिगीषया दक्षिणापथं गत्वा त्रिलोचनपल्लवमधिक्षिप्य दैवदुरीहया लोकांतरमगमत्। तस्मिन् संकुले पुरोहितेन वृद्धामात्यैश्च सार्द्धमंतर्व्वत्नी तस्य महादेवी मुडिवेमनामाग्रहारमुपगम्य तद्वास्तव्येन विष्णुभट्टसोमयाजिना दुहितृनिर्व्विशेषमभिरक्षिता विष्णुवर्द्धनं नंदनमसूत। सा च तस्य कुमारकस्य कुलक्रमोचितानि कर्म्माणि कारयित्वा तमवर्द्धयत्। च मात्रा विदितवृत्तांतो निर्ग्गत्य चलुक्यगिरौ नंदाभगवतीं गौरीमाराध्य कुमारनारायणमातृगणांश्च संतर्प्य श्वेतातपत्रैकशंखपंचमहाशब्दादीनि कुलक्रमागतानि निक्षिप्तानीव साम्राज्यचिह्नानि समादाय कडंबगंगादिभूमिपान्निर्ज्जित्य सेतुनर्मदामध्यं दक्षिणापथं पालयामास ॥

तस्यासीद्विजयादित्यो विष्णुवर्द्धनभूपतेः।
पल्लवान्वयजातायामहादेव्याश्च नंदनः॥ २॥


तत्सुतः पुलकेशिवल्लभः। तत्पुत्रः कीर्त्तिवर्म्मा। तस्य तनयः श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतिपुत्राणां कौशिकीवरप्रसादलब्धराज्यानामश्वमेधावभृथस्नानपवित्रीकृतवपुषां चालुक्यानां कुलमलंकरिष्णोस्सत्याश्रयवल्लभेंद्रस्य भ्राता कुब्जविष्णुवर्द्धनोष्टादश

S.No. 8 - Inscription No. 40





Teki Plates of Rajaraja - Chodaganga (17th Year of Kulottunga I)



वर्षाणि वेंगीदेशमपालयत्। तत्सुतो जयसिंहवल्लभस्त्रयस्त्रिंशतम्। तदनुज इंद्रभट्टारकस्सप्त दिनानि। तत्सुतो विष्णुवर्द्धनो नव वर्षाणि। तत्सूनुर्म्मंगियुवराजः पंचविंशति। तत्पुत्रो जयसिंहस्त्रयोदश। तदवरजः कोकिलिष्षण्मासान्। तस्य भ्राता विष्णुवर्द्धनस्तमुच्चाट्य सप्तत्रिंशतम्। तत्पुत्रो विजयादित्योष्टादश। तत्तनयो विष्णुवर्द्धनष्षट्त्रिंशत्। तत्सुतो नरेंद्रमृगराजोष्टाचत्वारिंशतम्। तत्सुतः कलिविष्णुवर्द्धनोध्यर्द्धवर्षम्। तत्सुतो गुणगविजयादित्यश्चत्वारिंशतम्। तद्भ्रातुर्व्विक्रमादित्यस्य तनयश्चालुक्यभीमस्त्रिंशतम्। तत्सुतः कोल्लविगण्डविजयदित्य-ष्षण्मासान्। तत्सुतोम्मराजस्सप्त। तत्तनयबालमुच्चाट्य ताडपो मासमेकम्। तं जित्वा विक्रमादित्य एकादश मासान्। ततस्ताडप-राजसुतो युद्धमल्लस्सप्त। तमुच्चाट्य देशादम्मराजानुजो राजभीमो द्वादश। तत्सूनुरम्मराजः पंचविंशति। तस्य द्वैमातुरो दाननृपस्त्रीणि। ततस्सप्तविंशतिवर्षाणि दैवदुरीहया वेंगिमहिरनायिकाभूत्। ततो दानाण्र्णवसुतश्शक्तिवर्म्मनृपो द्वादश ॥

ततस्तदनुजस्सप्त वत्सरान् भूतवत्सलः।
विमलादित्यभूपालः पालयामास मेदिनीं ॥ ३ ॥
तत्तनयो नयशाली जयलक्ष्मीधाम राजराजनरेंद्रः।
चत्वारिंशतमब्दानेकं च पुनर्म्महीमपालयदखिलाम् ॥ ४ ॥
यो रूपेण मनोभवं विशदया कांत्या कलानान्निधिं
भोगेनापि पुरंदरं विपुलया लक्ष्म्या च लक्ष्मीधरम्।
भीमं भीमपराक्रमेण विहसन् भाति स्म भास्वद्यशाः

श्रीमत्सोमकुलैकभूषणमणिर्दीनैकचिंतामणिः ॥ ५ ॥

राजासावनुरूपरूपविभवामम्मंग्गनाम्ना भुवि

प्रख्यातामुपयच्छति स्म विधिवद्देवीं जगत्पावनीम् ।

याजह्नोरिव जाह्नवी हिमवतो गौरीव लक्ष्मीरिव

क्षीरोदाद्विवसेशवंशतिलकाद्राजेंद्रचोडादभूत् ॥ ६ ॥

पुत्रस्तयोरभवदप्रतिघातशक्तिनिश्शेषितारिनिवहो महनीयकीर्त्तिः ।

गंगाधराद्रिसुतयोरिव कार्त्तिकेयो राजेंद्रचोड इति राजकुलप्रदीपः ॥ ७ ॥

भासामुन्नतिहेतुं प्रथमं वेंगीश्वरत्वमध्यास्य ।

यस्तेजसा दिगंतानाक्रमत सहस्रभानुरुदयमिव ॥ ८ ॥

उद्यच्चण्डतरप्रतापदहनप्लुष्टाखिलद्वेषिणा

सर्व्वान् केरलपाण्ड्यकुंतलमुखान्निर्ज्जित्य देशान् बलात् ।

आज्ञा मौलिषु भूभृतां भयरुजा चित्तेषु दुर्म्मेधसां

प्रीतिस्सत्सु दिशासु कीर्त्तिरतुला येनार्प्पितोज्जृंभते ॥ ९ ॥

भोगीशाभीलभोगप्रतिमनिजभुजाभर्त्सितात्यंतबिभ्य

न्नानाभूपाललोकप्रहितबहुविधानर्घ्यरत्नाभिरामम् ।

धत्ते मौलिं परार्द्ध्यो महति नृपकुले यः कुलोत्तुंगदेवो

देवेंद्रत्वादनूने सुरपतिमहिमा चोडराज्येभिषिक्तः ॥ १० ॥

प्रख्यातभूभृत्कुलजन्मभाजस्सदाभिमुख्यस्सरसाः प्रसन्नाः ।

तस्याभवन् पार्त्थिवपुंगवस्य देव्यश्शुभा नद्य इवांबुराशेः ॥ ११ ॥

आत्मानुरूपैरथ तासु लब्धैर्द्देवीषु देवप्रतिमः कुमारैः ।

स नंद्यमानो नरदेववंद्यैर्न्नूनं हसत्येककुमारमीशम् ॥ १२ ॥

आत्मेवेंद्रियवर्ग्गं सुतवर्ग्गं तेषु तेषु विषयेषु ।
क्रमशस्स नियुंजानो मुम्मडिचोडं कुमारमित्यवदत् ॥ १३ ॥
वत्स वेंगीमहीराज्यम्मया दिग्विजयैषिणा ।
मत्पितृव्ये पुरा न्यस्तं विजयादित्यभूभुजि ॥ १४ ॥
स च पंचदशैवाब्दान् पंचाननपराक्रमः ।
महीं रक्षन् महीनाथो दिवं देवोपमो गतः ॥ १५ ॥
इत्युक्त्वा तां धुरं दत्तां गुरुणा चक्रवर्त्तिना ।
असह्यतद्वियोगोपि विनयाद्वहति स्म सः ॥ १६ ॥
श्रीपादसेवासुखतो गुरूणां न जातु राज्यं सुखमित्यवेक्ष्य ।
संरक्ष्य वेंगीभुवमेकमब्दं भूयस्स पित्रोरगमत्समीपम् ॥ १७ ॥
ततस्तदनुजो धीरो वीरचोडकुमारकः ।
आदिष्टो गुरुणा त्रातुं वेंगीभुवमुपागमत् ॥ १८ ॥
तेन भ्रातृषु पूर्व्वजस्य चरणांभोजप्रणामार्त्थिना
भक्त्यानम्रनिजोत्तमांगमनुजं तृष्णावतालिंगितुम् ।
शुश्रूषाविधिलंपटेन च गुरोः पादांबुजध्यायिना
नीतास्तातनियोगलंघनभिया वत्सेन षड्वत्सराः ॥ १९ ॥
इत्थं गुरुभ्रातृसमागमैकमनोरथं तं तनयन्नयज्ञः ।
निजांतिकं निर्ज्जितभूमिपालस्समानयन्मानवदेवदेवः ॥ २० ॥
अथाग्रजं गुणोदग्रं शास्त्रज्ञं शस्त्रकोविदम् ।
नयज्ञं विनयाधारमुदारमुदितोदितम् ॥ २१ ॥
शंभोश्शुंभत्पदांभोजभ्रमरीभूतचेतसम् ।

धार्म्मिकन्निर्म्मलाचारं चालुक्यकुलभूषणम् ॥ २२ ॥

वाचां वाचस्पतिं लक्ष्म्या विक्रमेण त्रिविक्रमम् ।

प्रज्ञातृतीयनेत्रेण निर्म्मलेन त्रिलोचनम् ॥ २३ ॥

गांभीर्य्येण महांभोधिं महोन्नत्या महीधरम् ।

लोकानंदितया चंद्रं तेजसा तिग्मतेजसम् ॥ २४ ॥

भूभारभरणक्षांत्या भुजगानामधीश्वरम् ।

तुलयंतं कलाभिज्ञं चोडगंगं प्रियात्मजम् ॥ २५ ॥

राजीवलोचनो राज्ञामयं राजाभवेदिति ।

राजराजाभिधानेन सात्र्थैनाहूय सादरम् ॥ २६ ॥

कृतप्रणाममाश्लिष्य कृत्यवेदो कृतांजलिम् ।

विक्रमाक्रांतभूचक्रश्चक्रवर्त्तीदमब्रवीत् ॥ २७ ॥

अस्ति प्रशस्तजातीनां रत्नानामिव वारिधिः ।

जन्मभूमिश्चलुक्यानां देशो वेंगीति विश्रुतः ॥ २८ ॥

तत्रोदय इवासाद्य ग्रहा इव महोन्नतिम् ।

अधःकुर्व्वन्ति मद्वंश्यास्तुंगानपि महीभृतः ॥ २९ ॥

सर्व्वामुर्व्वीमक्षतं रक्षितुं ते

वेंगीदेशे सिंहपीठासनस्य ।

नानाभूभृन्मौलिरत्नालिचक्रैः

पादाब्जश्रीर्भ्राजतां राजराज ॥ ३० ॥

पातालं पाति यावत्त्वमिव फणिपतिन्नागयूथैकनाथो

यावत्संसेव्यमानो विबुधगणशतैर्न्नाकनाथोपि नाकम् ।

तावत्वं रक्ष धात्रीं निशितनिजभुजस्फारकौक्षेयधारा
वारिप्रक्षालितारिच्छलमलविमलीभूतदिक्चक्रवालः ॥ ३१ ॥
इत्याशिषं नृपसुतस्य नृपादवाप्य
सत्याशिषस्तदनु मातुरुभौ प्रणम्य ।
देशन्निजं जिगमिषोरगमद्दिगंतान्
प्रस्थानशंखपटुमंगलतूर्य्यघोषः ॥ ३२ ॥
ध्वस्ता वैरिदशानिशा प्रतिहतं ध्वांतं द्विषच्छद्मकं
वैरिस्त्रीककुभांगणादपगता हारच्छलास्तारकाः ।
तापव्याजहुताशनो रिपुवधूहृत्सूर्य्यकांतेष्वभू
द्वेंगीदेशमहोदयोन्नतिमिति श्रीराजराजे रवौ ॥ ३३ ॥
शाकाब्दे रसखांबरेंदुगणिते ज्येष्ठेथ मासे सिते
पक्षे पूर्णतिथौ दिने सुरगुरोर्ज्येष्ठां शशांके गते ।
सिंहे लग्नवरे समस्तजगतीराज्याभिषिक्तो मुदे
लोकस्योद्वहति स्म पट्टमनघः श्रीराजराजो विभुः ॥ ३४ ॥
भूलोकादुदितामहोन्नतिमती दिङ्मण्डलव्यापिनी
संक्रांताखिलसत्पथा परिगता लोकानथोर्ध्वानपि ।
सन्मार्ग्गाच्चलितां भुवीह पतितां पश्चादधोगामिनीं
गंगां कीर्त्तिरमंगलप्रमथनी यस्यातिशेतेतराम् ॥ ३५ ॥
कोदण्डे रामभद्राद्रिपुकुलदलने भार्ग्गवान्मंदराद्रे
स्सारे शास्त्रांबुराशौ कलशभवमुनेर्व्विक्रमे वायुसूनोः ।
यस्माद्बन्धापसर्प्पप्रमथनगिलनोल्लंघनावृत्तिशंकी

नूनं रत्नाकरोयं प्रदिशति बहुशो रत्नराशीन् विचित्रान्॥ ३६ ॥

यः पुनरिद्धतेजोधिकतया मध्यमलोकपालोयमिति लोकेन लोकपालैस्सह बहुमतोपि गोत्रवर्द्धनतया वर्द्धितविशालकीर्त्तिर्ग्गोत्रभेदनप्रवादिनो वृत्रशत्रोस्समस्तभुवनाश्रयः स्वाश्रयप्रदाहिनो दहनात्। वदान्यकुलमान्यपुण्यचरितो दक्षिणाशावलंबनशीलपरिपालिनः कालात्। सकलविबुधसमाजसंसेव्यमानो विबुधविपक्षतो राक्षसाधीश्वरात्। विक्रमाक्रांतनिखिलभूभुवनो लुब्धकादिव वनमात्रगोचराद्वरुणात्। भुवनभवरक्षणास्थितस्थैर्य्यकोटिस्संततचपलस्वभावात् प्रभंजनात्। सकललोकोपभोगसफलीकृतधनसंचयो निष्फलधनसंग्रहाद्धनेश्वरात्। निखिललोकनिर्व्याजबान्धवो धनदैकमित्राद्गिरिधन्वनः। यश्च बहुश्रुतिरखिलभूभुवनभारभरणलीलातुलितादपि श्रुतिविहीनाच्चक्षुःश्रवसामधिश्वरात्। अखण्डितसद्वृत्तमण्डलो जगदाह्लादनविधिसधर्म्मणोपि खण्डितसद्वृत्ताच्च शशलक्ष्मणो गुणविशेषाभिज्ञानमहनीयमतिमहिम्ना महाजनेन नूनं बहुमन्यते। स सर्वलोकाश्रयश्रीविष्णुवर्द्धनमहाराजाधिराजो राजपरमेश्वरः परममाहेश्वरः परमभट्टारकः परमब्रह्मण्यो राजराज इत्यन्वितापरनामधेयानंदितसकलदिङ्मण्डलो मण्डलेश्वरमौलिविलसितचरणारविंदरेणुस्सकलभुवनसंस्तूयमानविशदविशालयशोराशिविशदीकृताशेषदिक्चक्रवालश्चक्रवर्त्तिलक्षणाभिरामः श्रीचोडगंगदेवः सकलधरातलसाम्राज्यलीलासुखमनुभवन् कदाचित् कुलराजधान्यां जननाथनामनगर्य्यामशेषभुवनाभ्यंतरापूरणातिरिक्तनिजयशोराशिशंकांजनयतः कैलासशैलविलासिनस्समुत्तुंगशिखरस्य सौधस्यास्थानभूमौ

सकलसामंतचक्रप्रमुखेण परिवारेण परितस्सेव्यमानः मन्नेटिमहेंद्र-मध्यवर्त्तिनो राष्ट्रकूटप्रमुखान् कुटुंबिनस्सर्व्वान् समाहूय मंत्रिपुरोहित-सेनापतियुवराजदौवारिकप्रधानसमक्षमित्थमाज्ञापयति। यथा।

संति मद्वंशभूपालपादपद्मोपजीविनः।

भृत्याः कृत्यविधौ दक्षाः शौर्यादिगुणशालिनः॥ ३७॥

तन्मध्ये परया भक्त्या शक्त्या च प्रज्ञया सदा।

मदीयान्वयभूपालचित्ताराधनतत्पराः॥ ३८॥

निजैरर्थैर्न्निजैः प्राणैर्व्विक्रमाद्यैर्ग्गुणैर्न्निजैः।

ये चालुक्यक्षितीशानां प्रस्तावप्रतिपालिनः॥ ३९॥

अयोध्याधीश्वरेणादौ दक्षिणाशाजयैषिणा।

ये सहैव समायाताः विजयादित्यभूभुजा॥ ४०॥

राजवंशावतंसानां राजधान्या महीभुजाम्।

पुरो विजयवाटाया ये वास्तव्यकुटुंबिनः॥ ४१॥

[Here follow in ll.90-92 a list of Telugu names of ten Teliki families]

स्वधर्म्मकर्म्मनिष्ठितमनसस्तेषाममीषां विजयवाटप्रमुखनिखिलपुरनगर-ग्रामपट्टनप्रभृतिषु स्थानेषु सर्व्वेषु विवाहोत्सवेषु प्रवर्त्तमानेषु मिथुनस्य वीथिषु तुरगरोहणेन पर्यटनमथ विवाहोत्सवावसाने राजश्रीपादमूले महार्घ्यवासयुगलं निधाय प्रणतानामेषां कनकपात्रेण तांबूलप्रदानं च पूर्व्वमर्य्यादासमागतमधुना परमभक्तिपरितोषितैरस्माभिराचंद्रार्कं शासनीकृत्य दत्तमिति विदितमस्तु वः। धर्म्मोयमस्मद्वंशजैः पार्त्थिवैः प्रयत्नेन पालनीयः।

शत्रुणापि कृतो धर्म्मः पालनीयो मनीषिणाम्।

शत्रुरेव हि शत्रुः स्याद्धर्म्मश्शत्रुर्न्न कस्यचित्॥ ४२॥

धर्म्मात् पैजवनो राजा चिराय बुभुजे भुवम्।

अधर्म्माच्चैव नहुषः प्रतिपेदे रसातलम्॥ ४३॥

यः स्वयं कुरुते धर्म्मं यश्च पाति कृतं परैः।

तयोः पालयिता श्रेष्ठ इति प्राहुर्म्मनीषिणः॥ ४४॥

धर्म्माद्विवर्द्धते राज्यं धर्म्मात् कीर्त्तिश्च शाश्वती।

धर्म्मात् तृप्यंति पितरो धर्म्मात्तुष्यंति देवताः॥ ४५॥

तस्माद्धर्म्मः प्रयत्नेन रक्षणीयो महीक्षिता।

स्वकृतोन्यकृतो वापि लोकद्वयहितैषिणा॥ ४६॥

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम्।

षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः॥ ४७॥

बहुभिर्व्वसुधा दत्ता बहुभिश्चानुपालिता।

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥ ४८॥

श्रीविजयराज्यसंवत्सरे सप्तदशे दत्तस्यास्य शासनस्याज्ञप्तिः कटकाधिपः

कर्त्ता विद्दयभट्टः लेखकः पेन्नाचार्य्यः॥

Summary

This inscription, engraved on a set of 5 copper-plates, consists 109 lines of excellently preserved and elegant writing. Its seal bears the legend *Śrī-Tribhuvanāṁkuśa* and the standing boar with the other usual objects, *chaurīs etc.* The text is composed in verse and prose. This inscription records conferment of certain

honorary privileges on the descendants of the Teliki family.

The inscription opens with the same genealogical account of the Eastern Chālukya family as the Chellūr and Piṭhāpuram plates of Vīra-Chōḍa (Nos.41-42 below), but begins to differ in the discription of the reign of Kulōttuṅga I. It does not mention his queen Madhurāntakī, but states that he had several queens (v.11), who bore him several sons (v.12). On one of these, Mummaḍi-Chōḍa, - whose name is given as Rājarāja in the Chellūr and Piṭhāpuram plates, - he conferred the governorship of Vēṅgī after the death of his own paternal uncle Vijayāditya (VII) (vv.13-16). One year later (v.17) he bestowed the same appointment on Mummaḍi–Chōḍa's younger brother, Vīra–Chōḍa (v.18), who held it for six years (v.19), when he was recalled (v.20). Then the eldest son, Chōḍagaṅga, surnamed Rājarāja (vv.21-26), ascended the throne of Vēṅgi (v.33) in Śaka-Saṁvat 1006, on Thursday, the full-moon tithi of Jyēshṭha, in the *nakshrtra* Jyēshṭhā and in the *lagna* Siṁha (v.34). This date probably corresponds to the 22nd May A.D.1084. At the end of the inscription another date is given *viz.,* the seventeenth year of the reign.

This inscription gives a different list of sons of Kulōttuṅga I and a different reference has been suggested to the dates at the end of the Chellūr and Piṭhāpuram plates, *viz.* The 21st and 23rd years respectively. These years were referred hitherto to the reign of Vīra-Chōḍa. Similarly it may seem correct to refer the year 17 mentioned at the end of the Ṭēki plates to the reign of Rājarāja-Chōḍgaṅga. But such a reckoning would result in

a chronological anomaly. It is suggested, therefore, that all these years may be referred to the accession of Kulōttuṅga I in A.D.1070. That way the dates of the three inscriptions can be reconciled. These dates would then fall in A.D.1086-87 (Ṭēki plates), 1090-91 (Chellūr plates) and 1092-93 (Piṭhāpuram plates). The following table shows the relationship and dates of the three successive governors of Vēṅgī

Kulōttuṅg-Chōḍa I.;
Married Madhurāntakī

Rājarāja *alias* Chōḍagaṅga; A.D.1084 to 1088-89.	Rājarāja *alias* Mummaḍi-Chōḍa; A.D.1077 to 1078.	Vīra-Chōḍa; A.D.1078 to 1084 and 1088-89- -to atleast 1092-93	Vikrama-Chōḍa *Three other sons*


Chōḍagaṅgadēva (l.80), surnamed Rājarāja (l.78), bore the traditional titles of Sarvalōkāśraya, Vishṇuvardhana, *etc.* (ll.76-78), and (like his younger brother Vīra-chōḍa) resided at Jananāthanagarī (l.81), identified with Rājamahēndri. He addressed the edict contained in the inscription to the inhabitants of the country between the Mannēṟu (river) and the Mahēndra (mountain) (l.83). These must have been the northen and the southern boundaries of the Vēṅgī province. The Mahēndra mountain is in the Gañjām district near the Mandasa Railway station, and the Mannēṛu river passes Siṅgarāyakoṇḍa, now a Railway Station in Kandukūr taluka of the Nellore district.

As stated earlier the inscription records the bestowal of certain privileges on the descendants of the

Teliki family. These were subdivided into a thousand families, Pattipālu, Nariyūḷḷu, Kumudāḷḷu, *etc.*, and were hereditary servants of the Eastern Chālukya family (v.38 f.). They were believed to have migrated with the mythical king Vijayāditya of Ayōdhyā (v.40) and to have settled at Vijayavāṭā (the modern Bezvāḍa), which seems to have been the former capital of the Eastern Chālukyas (v.41).

As regards the privileges mentioned above it is stated that when marriage festivals were celebrated at all places such as Vijayavāṭa and all other towns, cities, villages and hamlets, the married couple might proceed on the roads on horse-back, and that afterwards when, at the end of the marriage festival, they placed a pair of valuable cloths at the feet of the king and prostrated themselves, betel (*tāmbūla*) would be given to them in a golden vessel, as handed down by old custom.

The composer and the writer of this charter were the same persons as in the case of the Chellūr plates and the Piṭhāpuram plates of Vīra-Chōḍa, *viz.* Viddayabhaṭṭa and Pennāchārya respectively.



No.41

CHELLUR PLATES OF VIRA-CHODADEVA

Location : Chellūr, Godavari District, Andhra Pradesh

Date : Regnal year 21 (of Kulōttuṅga I) = 1090-91 A.D.

Script : Telugu-Kannaḍa

Language : Sanskrit

King : Vīra-Chōḍadēva

Dynasty : Eastern Chālukya

Reference : *S.I.I.,* vol. I, pp.49-62

Text

Metre: Vv. 1, 3, 6, 7, 10, 12, 13, 20, 21, 29, 32 *Śārdūlavikrīḍita;* 2, 4, 5, 14-16, 22-26 *Anushṭubh;* 8, 19, 28, 31 *Vasantatilakā;* 9 *Gīti;* 11, 30 *Sragdharā;* 17, 34, 36, 37 *Upajāti;* 18, 27 *Mālinī;* 33 *Śālinī;* 35 *Indravajrā*

श्रीधाम्नः पुरुषोत्तमस्य महतो नारायणस्य प्रभो

र्न्नाभीपंकरुहात् बभूव जगतः स्रष्टा स्वयंभूस्ततः।

जज्ञे मानससूनुरत्रिरिति यस्तस्मान्मुनेरत्रित

स्सोमो वंशकरस्सुधांशुरुदितः श्रीकण्ठचूडामणिः ॥ १ ॥

तस्मादभूत्सुधासूतेर्ब्बुधो बुधनुतस्ततः

जातः पुरूरवा नाम चक्रवर्त्ती सविक्रमः ॥ २ ॥

तस्मादायुस्ततो नहुषः। ततो ययातिश्चक्रवर्त्ती वंशकर्ता। ततः पुरुः ततो जनमेजयः ततः प्राचीशः ततस्सैन्ययातिः ततो हयपतिः ततस्सा-र्व्वभौमः ततो जयसेनः ततो महाभौमः तस्मादैशानकः ततः क्रोधाननः

ततो देवकिः तस्माद्दभुकः तस्माद्दक्षकः ततो मतिवरस्सत्रयागयाजी सरस्वतीनदीनाथः ततः कात्यायनः ततो नीलः ततो दुष्यंतः तत्सुतः गंगायमुनातीरयोरविच्छिन्नान्निधाय यूपान् क्रमशः कृत्वा तथाश्वमेधन्नाम महाकर्म्म भरत इति योलभत। ततो भरताद्भूमन्युः। ततो हस्ती ततो विरोचनः। तस्मादजमिलः ततस्संवरणः ततस्सुधन्वा। ततः परिक्षित् ततो भीमसेनस्ततः प्रदीपनः ततश्शंतनुः ततो विचित्रवीर्य्यः ततः पाण्डुराजः ततः पाण्डवाः।

येनादाहि विजित्य खाण्डवमठो गाण्डीविना वज्रिणं
युद्धे पाशुपतास्त्रमन्धकरिपोश्चालाभि दैत्यान् बहून्।
इंद्रार्द्धासनमध्यरोहि जयिना यत् कालिकेयादिकान्
हत्वा स्वैरमकारि वंशविपिनच्छेदः कुरूणांविभोः॥ ३॥

ततोर्ज्जुनादभिमन्युः ततः परिक्षित् ततो जनमेजयः ततः क्षेमुकः ततो नरवाहनः ततश्शतानीकः तस्मादुदयनः ततःप्रभृतिष्वविच्छिन्न-संतानेष्वयोध्यासिंहासनासीनेष्वेकान्नषष्टिचक्रवर्त्तिषु गतेषु तद्वंश्यो विजयादित्यो नाम राजा। विजिगीषया दक्षिणापथं गत्वा त्रिलोचनपल्लवमधिक्षिप्य दैवदुरीहया लोकांतरमगमत्। तस्मिन् संकुले पुरोहितेन वृद्धामात्यैश्च सार्द्धमंतर्व्वती तस्य महादेवी मुडिवेमुनामा-ग्रहारमुपगम्य तद्वास्तव्येन विष्णुभट्टसोमयाजिना महामुनिप्रभावेण दुहितृनिर्व्विशेषमभिरक्षिता सती विष्णुवर्द्धनन्नंदनमसूत। सा तस्य कुमारकस्य मानव्यसगोत्रहारीतिपुत्रद्विपक्षगोत्रक्रमोचितानि कर्म्माणि कारयित्वा तमवर्द्धयत्। स च मात्रा विदितवृत्तांतस्सन्निर्ग्गत्य चलुक्य-

गिरौ नंदां भगवतीं गौरीमाराध्य कुमारनारायणमातृगणांश्च संतर्प्य श्वेतातपत्रैकशंखपंचमहाशब्दपालिकेतनप्रतिढक्कावराहलांच्छनपिच्छ-कुंतसिंहासनमकरतोरणकनकदण्डगंगायमुनादीनि स्वकुलक्रमागतानि निक्षिप्तानीव साम्राज्यचिह्नानि समादाय कडंबगंगादिभूमिपान्निर्ज्जित्य सेतुनर्म्मदामध्यंसार्द्धसप्तलक्षं दक्षिणापथं पालयामास ।

तस्यासीद्विजयादित्यो विष्णुवर्द्धनभूपतेः ।

पल्लवान्वयजाताया महादेव्याश्च नंदनः ॥ ४ ॥

तत्सुतः पुलकेशिवल्लभः तत्पुत्रः कीर्त्तिवर्म्मा तस्य तनयः स्वस्ति श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतिपुत्राणां कौशिकीवरप्रसादलब्धराज्यानाम्मातृगणपरिपालितानां स्वामिमहा-सेनपादानुध्यातानां भगवन्नारायणप्रसादसमासादितवरवराहलांच्छने-क्षणक्षणवशीकृतारातिमण्डलानामश्वमेधावभृथस्नानपवित्रीकृतवपुषां चालुक्यानां कुलमलंकरिष्णोस्सत्याश्रयवल्लभेंद्रस्य भ्राता कुब्जविष्णुवर्धनोष्टादश वर्षाणि वेंगी देशमपालयत् तदात्मजो जयसिंहवल्लभस्त्रयस्त्रिंशतम्। तदनुज इन्द्रराजस्सप्त दिनानि। तत्सुतो विष्णुवर्धनो नव वर्षाणि। तत्सूनुर्म्मंगियुवराजः पंचविंशतिम् तत्पुत्रो जयसिंहस्त्रयोदश तदवरजः कोक्किलिष्षण्मासान् तस्य ज्येष्ठो भ्राता विष्णुवर्द्धनस्तमुच्चाट्य सप्तत्रिंशतम् तत्पुत्रो विजयादित्यभट्टारकोष्टादश। तत्तनुजो विष्णुवर्धनः षट्त्रिंशतम् तत्सुतो नरेंद्रमृगराजोष्टाचत्वारिंशतं तत्सुतः कलिविष्णुवर्धनोद्ध्यर्द्धवर्षं तत्सुतो गुणगांकविजया-दित्यश्चतुश्चत्वारिंशतं तद्भ्रातुर्व्विक्रमादित्यस्य तनयश्चालुक्य-

भीमस्त्रिंशतम्। तत्सुतः कोल्लभिगण्डविजयादित्यष्षण्मासान्। तत्सुतोम्मराजस्सप्त वर्षाणि। तत्सुतं विजयादित्यं बालमुच्चाट्य ताडपो मासमेकम्। तं जित्वा चालुक्यभीमसुतो विक्रमादित्य एकादश मासान् तत्ताडपराजसुतो युद्धमल्लस्सप्त वर्षाणि। तमुच्चाट्य देशादम्मराजानुजो राजभीमः द्वादशवर्षाणि तत्सूनुरम्मराजः पंचविंशतिम्। तस्य द्वैमातुरो दाननृपस्त्रीणि वर्षाणि ततः सप्तविंशतिवर्षाणि दैवदुरीहया वेंगिमहिरनायिकाभवत्। ततो दानार्णवसुतश्शक्तिवर्म्मभूपतिर्द्वादश वर्षाणि समरक्षदुर्व्वीम्।

ततस्तदनुजस्सप्त वत्सरान् भूतवत्सलः।
विमलादित्यभूपालः पालयामास मेदिनीम्॥ ५॥

तत्तनयो नयशाली जयलक्ष्मीधाम राजराजनरेंद्रश्चत्वारिंशतमब्दानेकं च पुनर्म्महीमपालयदखिलाम्।

यो रूपेण मनोभवं विशदया कांत्या कलानान्निधिं
भोगेनापि पुरंदरं विपुलया लक्ष्म्या च लक्ष्मीधरम्।
भीमं भीमपराक्रमेण विहसन् भाति स्म भास्वद्यशाः
श्रीमत्सोमकुलैकभूषणमणिर्द्दीनैकचिंतामणिः॥ ६॥

तस्यासीदपकल्मषा सुचरितैरम्मंगनाम्ना भुवि
प्रख्याता शुभलक्षणैकवसतिर्द्देवी जगत्पावनी।
या जाह्नोरिव जाह्नवी हिमवतो गौरीव लक्ष्मीरिव
क्षीरोदाद्दिवसेशवंशतिलकाद्राजेंद्रचोडादभूत्॥ ७॥

पुत्रस्तयोरभवदप्रतिघातशक्तिनिश्शेषितारिनिवहो महनीयकीर्त्तिः।

गंगाधराद्रिसुतयोरिव कार्त्तिकेयो राजेंद्रचोड इति राजकुलप्रदीपः ॥ ८ ॥

भासामुन्नतिहेतुं प्रथमं वेंगीश्वरत्वमध्यास्य ।

यस्तेजसा दिगंतानाक्रमदुदयं सहस्त्ररश्मिरिव ॥ ९ ॥

उद्यच्चण्डतरप्रतापदहनप्लुष्टाखिलद्वेषिणा

सर्व्वान् केरलपाण्ड्यकुंतलमुखान् निर्ज्जित्य देशान् क्रमात् ।

आज्ञा मौलिषु भूभृतां भयरुजा चित्तेषु दुर्म्मेधसां

कीर्त्तिर्दिक्षु सुधांशुधामधवला येनार्प्पितोज्जृंभते ॥ १० ॥

भोगीशाभीलभोगप्रतिभयभुजनिर्ब्भर्त्सनात्यंतबिभ्य

न्नानाभूपाललोकप्रहितबहुविधानर्घ्यरत्नाभिरामम् ।

धत्ते मौलिं पराद्ध्यों महति नृपकुले यः कुलोत्तुंगदेवो

देवेंद्रत्वादनूने सुरपतिमहिमा चोडराज्येभिषिक्तः ॥ ११ ॥

हस्तभ्राजितशंखचक्रजलजं यं राजनारायणं

लोक स्तौति स सूर्य्यवंशतिलकाद्राजेंद्रदेवार्ण्णवात् ।

संभूताम्मधुरांतकीति विदितान्नाम्नापरेण स्वयं

लक्ष्मीमुद्वहति स्म लोकमहितां देवीं चरित्रोन्नताम् ॥ १२ ॥

गंगौघा इव निर्म्मलाः कृततमोध्वंसा दिनेशा इव

क्षोणीध्रा इव भूभरश्रमसहा जातास्तयोस्सूनवः ।

तन्मध्ये नयविक्रमैकनिलयं श्रीराजराजं प्रति

प्रेम्णा वाचमिमामवोचत पिता सर्व्वोर्व्वराधीश्वरः ॥ १३ ॥

मया वेंगीमहीराज्यं चोडराज्याभिलाषिणा ।

मत्पितृव्ये पुरा न्यस्तं विजयादित्यभूभुजि ॥ १४ ॥

स च पंचदशाब्दानि पंचाननपराक्रमः।
महीं रक्षन्महीनाथो दिवं देवोपमो गतः॥ १५॥
इत्युक्त्वा तान्धुरं दत्तां गुरुणा चक्रवर्त्तिना।
अनिष्टतद्वियोगोपि विनीतो वहति स्म सः॥ १६॥
श्रीपादसेवासुखतो गुरूणान्न जातु राज्यं सुखमित्यवेक्ष्य।
संरक्ष्य वेंगीभुवमेकमब्दं भूयस्स पित्रोरगमत्समीपम्॥ १७॥
तदनुजमथ धीरं वीरचोडं कुमारं
गुणमिव तनुबद्धं विक्रमं चक्रवर्त्ती।
उदयमिव रविस्त्वं प्राप्य वेंगीश्वरत्वं
वितनु शिरसि पादं भूभृतामित्यवोचत्॥ १८॥
इत्याशिषं समधिगम्य नृपादवन्ध्यां
देव्यास्तथाग्रजनृपद्वितयात् क्रमेण।
आनम्य तानवनतोवरजैः कुमारः
सृष्टः स्वदेशगमनाय स तैः कथंचित्॥ १९॥
शत्रुध्वांतमपास्य राजनिकरानाच्छाद्य धाम्नापरान्
दुर्व्वृत्तान्विनिवर्त्य भूकमलिनीं कृत्वा तथा नंदिनीम्।
आरूढो जगनाथनामनगरीहर्म्म्योदयाद्रिं विभु
र्वेंगीभूतलभूषणं नृपसुतो बालार्क्कबिंबद्युतिः॥ २०॥
शाकाब्दे शशिखद्वयेंदुगणिते सिंहाधिरूढे रवौ
चंद्रे वृद्धिमति त्रयोदशतिथौ वारे गुरोर्व्वृश्चिके।
लग्नेथ श्रवणे समस्तजगतीराज्याभिषिक्तो मुदा

लोकस्योद्वहति स्म पट्टमनघः श्रीविरचोडो नृपः ॥ २१ ॥

स सर्व्वलोकाश्रयश्रीविष्णुवर्द्धनमहाराजाधिराजो राजपरमेश्वरः परममा-
हेश्वरपरमभट्टारकः परमब्रह्मण्यश्रीवीरचोडदेवः गुद्दवाटिविषयनिवासिनो
राष्ट्रकूटप्रमुखान् कुटुंबिनस्सर्व्वान् समाहूय मंत्रिपुरोहितसेनापति-
युवराजदौवारिकसमक्षमित्थमाज्ञापयति । यथा ।

पावने ब्रह्मवंशे भूत्परमाह्लाददर्शनः ।
मुनींद्रो मुद्गलो नाम क्षीरोद इव चंद्रमाः ॥ २२ ॥

येनातर्क्यानुभावेन समाहूते दिवाकरे ।
यस्यष्टिस्सतमादिष्टा रविचेष्टामचेष्टित ॥ २३ ॥

आसीत्पवित्रचारित्रस्तद्गोत्रे गोत्रवर्द्धनः ।
दिशो निजयशोधाम्ना द्योतयन् पोतनाह्वयः ॥ २४ ॥

गुणाधिको गुणज्ञेन राजराजाधिपेन यः ।
राजराजब्रह्ममहाराजनाम्ना स्तुतो मुदा ॥ २५ ॥

तस्य पुण्यनिधेः पत्नी कन्नमांबा जगन्नुता ।
अत्रेरिवानसूयासीदनसूया गुणोन्नता ॥ २६ ॥

सुतमिव वसुदेवाद्देवकी वासुदेवं
गुहमिव गिरिकन्या नंदनं चंद्रमौलेः ।
अथ तनयमसूत श्रीनिधिं सा च तस्मा
दखिलविबुधसंघैरीडितम्मेडमार्य्यम् ॥ २७ ॥

उद्दामधामविमलीकृतदिग्विभागे
नित्योदयस्थितिमति प्रविकासिपद्मे ।

यत्रोदिते निखिलबन्धुकुलानि लक्ष्मी

रघ्यास्त वारिजवनानि विवस्वतीव ॥ २८ ॥

यस्मिन्नाश्रितवत्सले कृतयुगाचारैकधीरे स्थितिं

बिभ्राणा गुणरत्नभूषण इति प्रख्यातनाम्नि स्वयम् ।

सत्यत्यागपराक्रमप्रभृतयस्संभूय सर्व्वे गुणा

वर्द्धते गुणराशिलोपनिपुणं निर्ज्जित्य कालं कलिम् ॥ २९ ॥

धीरो नित्यानुरक्तो दृढनिशितमतिर्ब्रह्मवंशप्रदीपो

लक्ष्मीभूरिद्धतेजा नयविनयनिधिश्शास्त्रशस्त्रप्रवीणः ।

मान्यः शैलेन्द्रसारस्थिर इति च मया सादरं सप्रसादं

सैनापत्येभिषिक्तो वहति जनमदे पट्टमारोपितं यः ॥ ३० ॥

शुश्रूषया गुरुजनंच्चरितेन लोक

म्मानेन बन्धुजनमिष्टधनेन शिष्टान् ।

यो माम्मदीयनिखिलक्षितिराज्यभार

क्षांत्याभिनंदयति भक्तिभरेण शौरिम् ॥ ३१ ॥

यस्य प्रांगणभूमिषु प्रतिदिनं प्रक्षाल्यमानामित

क्षोणीदेवसमूहपादविगलद्वारिप्रवाहैश्शुभैः ।

शश्वन्मार्ग्गसहस्रपूरिभिरहो गंगाप्रवाहा जिता

देवेष्वन्यतमस्य पादगलिता मार्ग्गत्रयापासिताः ॥ ३२ ॥

द्राक्षारामे पावने पुण्यभाजा पुण्यक्षेत्रे पीठपुर्यां च येन ।

भोक्तुं प्रीत्या प्रत्यहं ब्राह्मणानामाकल्पांतं कल्पितं सत्रयुग्मम् ॥ ३३ ॥

चेब्रूरुनामप्रथिताभिराममशिष्टाग्रहारोत्तरदिग्विभागे ।

महत्तटाकम्मधुरांबुपूर्ण्णमचीकरद्यः करुणारसात्मा ॥ ३४ ॥

विप्रैरगस्त्यप्रतिमैरसंख्यैर्न्नित्योपभोग्येन शशिप्रभेण ।

यद्वारिणाब्धिं हसतीव भूयो निश्शेषपीतं कलशोद्भवेन ॥ ३५ ॥

महौजसा तेन महामहिम्ना ग्रामस्य तस्यापरदिग्विभागे ।

निम्मार्पितं धर्म्मपरायणेन विष्णोर्गृहं वैष्णवपुंगवेन ॥ ३६ ॥

समुन्नते चंद्रमरीचिगौरे लक्ष्मीनिवासे नयनाभिरामे ।

तत्राविरासीत्स्वयमेव देवो लक्ष्मीपतिर्ल्लक्षितशंखचक्रः ॥ ३७ ॥

तस्मै श्रीविष्णुभट्टारकाय प्रत्यहं चरुबलिपूजार्त्थं खण्डस्फुटित-नवकर्म्मार्त्थं च भवद्विषये कोलारु नाम ग्रामस्सर्व्वकरपरिहारेण देवभो-गीकृत्य उदकपूर्व्वकं दत्त इति विदितमस्तु वः अस्य ग्रामस्य सीमानः पूर्व्वतः [Lines 105 to 108 are illegible.] * * * * * * * * * * *

सीमा ॥ अस्योपरि न केनचिद्बाधा कर्त्तव्या ।

यः करोति स पंचमहापातकयुक्तो भवति । तथा चोक्तं भगवता व्यासेन ।

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।

षष्टिं वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥

गामेकां स्वर्ण्णमेकं वा भूमेरप्येकमंगुलम् ।

हरन्नरकमाप्नोति यावदाभूतसंप्लवम् ॥

बहुभिर्व्वसुधा दत्ता बहुभिश्चानुपालिता ।

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

श्रीविजयराज्यसंवत्सरे एकविंशे दत्तस्यास्य शासनस्याज्ञप्तिः पंच प्रधानाः काव्यकर्त्ता विद्दयभट्टः लेखकः पेन्नाचारिः ॥

Summary

This inscription, engraved on a set of 5 copper-plates, consists 114 lines of fairly well-preserved writing. Its seal rests on an expanded lotus-flowr and bears in relief on a counter-sunk surface the legend *Śrī-Tribhuvanāṁkuśa.* Over the legend is a boar, which faces the right and is surrounded by two lamp stands and other auspicious objects. Similar objects are also found below the legend.

The text of the genealogy upto Vimalāditya embodied in the present inscription presents close textual affinities, with slight variations here and there with the other Chālukya charters of the period. Thus for example, text lines 1-52 of the Kalidiṇḍi grant of Rājarāja I correspond to lines 1-47 of the present record, of course, with slight variations at places.

The major portion of the text is occupied by genealogical accouts, both Puranic and historical, and *praśasti.* The description of the *sēnāpati* Mēḍamārya and his ancestors also spreads over a considerable length, the grant portion proper being limited to a very small portion of the text.

The genealogical account furnished in this inscription consists of 4 parts:


I. (Lines 1-16). A legendary genealogy of the lunar race beginning with Nārāyaṇa down to Udayana, commencing with whom 59 emperors are supposed to have reigned at Ayōdhyā.

II. (Lines 16-28) An account of five early Chālukya kings, *viz.,*:- Vijayāditya I, killed in a battle with Trilōchana-

Pallava; his posthumous son, Vishṇuvardhana, married to a Pallava princes; his son Vijayāditya II; his son Pulakēśi-Vallabha; and his son Kīrtivarman. Here it may be noted that the historicity of the first three persons, *viz.*, Vijayāditya I, Vishṇuvardhana and Vijayāditya II has not been established.

III. (Lines 28-46) The usual succession of the Eastern Chālukyas of Veṅgī from Kubja-Vishṇuvardhana, brother of Satyāśraya-Vallabhēndra (*i.e.* Pulakēśin II, son of Kīrtivarman) to Vimalāditya.

IV. (Lines 46-78) An account of the later Eastern Chālukyas during their connection with Chōḷas, *viz.,*:-



The first part of the genealogy is entirely mythical, and the sencond has been considered a mere medley of vague tradition and Puranic myths, of no authority. The third part corresponds with the genealogy furnished in the

Raṇastipūṇḍi grant of Vimalāditya (No.36 above) and the grants of his son Rājarāja I.

It is the fourth part of the genealogy that gives the parentage of the donor of the present grant. The son of Vimalāditya, Rājarāja (I), who ruled for 41 years (l.47), married Ammaṅga-dēvī, the daughter of a Rājēndra-Chōḍa of the solar race (v.7). Their son Rājēndra-Chōḍa (v.8), Kulōttuṅga-dēva (v.11) or Rājanārāyaṇa (v.12) at first ascended the throne of Veṅgī (v.9), conqucred Kērala, Pāṇḍya, Kuntala and other countries (v.10), and was anointed to the Chōḍa kingdom (v.11). He married Madhurāntakī, the daughter of a Rājēndra-dēva of the solar race (v.12) and had by her seven sons (v.13). When he rose to the Chōḍa kingdom, he had given the kingdom of Veṅgī to his paternal uncle Vijayāditya (v.14), who died after a reign of fifteen years (v.15). Then he gave Veṅgī to his son Rājarāja (II) (vv.13 and 16) and, when the latter had returned after one year's reign (v.17), to Rājarāja's younger brother Vīra-Chōḍa (v.18), who was crowned at Jaganātha-nagarī[1] (v.20) in Śaka 1001 (v.21).

After the genealogical portion commences the grant portion from line 78. Here the donor, king Vīra-Chōḍa, is introduced formally with the usual epithets, *Sarvalōkāśraya* Śrī Vishṇuvardhana *Mahārājādhirāja, etc.* He is stated to have called together house holders, heads of provinces, *etc.,* who inhabited the district of Guddavāṭi, and issued his order in the presence of ministers, *etc.* The order stated that in the 21[st] year[2] of his reign the king gave a village of the above-mentioned district, whose name is indistinct, but seems to have been Kōlāṟu, to a temple of Vishṇu at the *agrahāra* of Chellūru.[3] This Vishṇu temple

had been founded by the king's *sēnāpati* Mēḍamārya *alias* Guṇaratnabhūshaṇa, who had also constructed a pond at the same village of Chellūru and founded two *sattras* at Drākshārāma[4] and Piṭhapuri.[5] He was the son of Pōtana of the Mudgala *gōtra,* who had received from Rājarāja (I) the somewhat lengthy title *Rājarāja-bahma-mahārāja,* by Kannamāmbā.

Verses 22-37 contain conventional praise of the *sēnāpati* Mēḍamārya and his father and mention philanthropic activities undertaken by the former.

The grant was made for the purposes of daily performance of *charu* (offering to the manes), *bali* (offering to creatures) and *pūjā* (worship) and for the repairs of gaps and cracks at the temple of Vishṇu.

Text portion that contained boundaries of the gift village (ll.105-108) has become illegible.

The executors of the grant were the five ministers (*pañcha-pradhānāḥ*). The author of the composition was Viddaya-bhaṭṭa, and the writer, Pennāchāri.

Notes

1. Jaganātha is a Prakrit form of Jagannātha. Jaganātha-nagari may be identified with Jagannāthapuram, which is the portion of the town of Cocanada lying south of the river (*S.I.I.,* I, p.51, *n.*3). The correct reading of this place-name is said to be Jananāthanagari, which is perhaps a practical form of Rājamahēndrapura, the modern Rājamahendri (*EI.,* V, p.71).

2. Subsequently this year has been referred to the accession of Kulōttuṅga I. in A.D. 1070 (See *EI.,* VI, p.335).

3. Chellūru is the modern village of Chellūr whence the plates were obtained (*ibid.,* p.52, *n.*3).

4. Drākshārāma is one of the most sacred places in the Godavari District, with a large and important temple dedicated to Bhīmēśvara (*ibid.*, p.53, *n.* 1).

5. Piṭhapurī is probably the modern Piṭṭāpuram, the residence of the Rājā of this name in the Gōdāvarī District (*ibid., n.* 2).



No.42

PITHAPURAM PLATES OF VIRA-CHODA

Location	: Piṭhāpuram, Godavari District, Andhra Pradesh
Date	: Regnal year 23 (of Kulōttuṅga I) =1092-93 A.D.
Script	: Telugu-Kannaḍa
Language	: Sanskrit
King	: Vīra-Chōḍadēva
Dynasty	: Eastern Chālukya
Referrence	: Krishna Sastri, H., *EI.*, V, pp.70-100

Text

Metres: Vv. 1, 7, 19, 22, 23, 26 *Vasantatilakā;* 2, 3, 13-16, 25, 33-35 *Anushṭubh;* 4 *Āryāgīti;* 5, 6, 9, 11, 12, 20, 21, 27 *Śārdūlavikrīḍita;* 8 *Gīti;* 10, 24, 28 *Sragdharā;* 17, 29, 30-32 *Upajāti;* 18 *Mālinī*

श्रीमाञ्जगत्रयमिदं हरिरादिदेवः

स्त्रष्टुं विरिंचिमसृजन्निजनाभिपद्मात् ।

तस्मादभूत्किल महामुनिरत्रिरत्रे

स्सोमो महेश्वरशिखांत्तकृतप्रतिष्ठः ॥ १ ॥

तस्माद्बुधः ततश्चक्रवर्त्ती पुरूरवाः तस्मादायुः ततो नहुषः ततो ययातिः ततः पूरुः ततो जनमेजयः ततः प्राचीशः ततस्सैन्ययातिः ततो हयपतिः ततस्सार्व्वभौमः ततो जयसेनः ततो महाभौमः तस्मादैशानकः ततः क्रोधाननः ततो देवकिः तस्मादद्भुकः तस्माद्दक्षकः ततो मतिवरः ततः कात्यायनः ततो नीलः ततो दुष्यंतः ततो भरतः ततो भूमन्युः ततो हस्ती ततो विरोचनः तस्मादजमीलः ततस्संवरणः ततस्सुधन्वा ततः

परिक्षित् ततो भीमसेनः ततः प्रदीपनः ततश्शंतनुः ततो विचित्रवीर्यः ततः पाण्डुराजः ततः पाण्डवाः तेषु वंशकरादर्जुनादभिमन्युः ततः परिक्षित् ततो जनमेजयः ततो क्षेमुकः ततो नरवाहनः ततश्शतानीकः तस्मादुदयनः ततः प्रभृत्यविच्छिन्नसंतानेष्वयोध्यासिंहासनासीनेष्वे-कान्नषष्टिचक्रवर्तिषु गतेषु तद्वंश्यो विजयादित्यो नाम राजा विजिगीषया दक्षिणापथं गत्वा त्रिलोचनपल्लवमधिक्षिप्य दैवदुरीहया लोकांत्तर-मगमत्। तस्मिन् संकुले पुरोहितेन वृद्धामात्यैश्च सार्द्धमन्तर्व्वत्नी तस्य महादेवी मुडिवेमुनामाग्रहारमुपगम्य तद्वास्तव्येन विष्णुभट्टसोमयाजिना दुहितृनिर्व्विशेषमभिरक्षिता सती विष्णुवर्द्धनन्नंदनमसूत। सा च तस्य कुमारकस्य कुलक्रमोचितानि कर्म्माणि कारयित्वा तमवर्द्धयत्। स च मात्रा विदितवृत्तांतो निर्ग्गत्य चलुक्यगिरौ नंदाभगवतीं गौरीमाराध्य कुमारनारायणमातृगणांश्च संतर्प्य श्वेतातपत्रैकशंखपंचमहाशब्दादीनि कुलक्रमागतानि निक्षिप्तानीव साम्राज्यचिह्नानि समादाय कडंबगंगादिभूमिपान्निर्जित्य सेतुनर्म्मदामध्यं दक्षिणापथं पालयामास।

तस्यासीद्विजयादित्यो विष्णुवर्द्धनभूपतेः।
पल्लवान्वयजाताया महादेव्याश्च नन्दनः॥ २॥

तत्सुतः पुलकेशिवल्लभः तत्पुत्रः कीर्त्तिवर्म्मा तस्य तनयः। श्रीमतां सकलभुवन्वसंस्तूयमानमानव्यसगोत्राणां हारीतिपुत्राणां कौशिकीवर-प्रसादलब्धराज्यानामश्वमेधावभृथस्नानपवित्रीकृतवपुषां चालुक्यानां कुलमलंकरिष्णोस्सत्याश्रयवल्लभेन्द्रस्य भ्राता कुब्जविष्णुवर्द्धनोष्टादश

वर्षाणि वेंगीदेशमपालयत्। तत्सुतो जयसिंहवल्लभस्त्रयस्त्रिंशतं तदनुज इन्द्रभट्टारकः सप्त दिनानि तत्सुतो विष्णुवर्द्धनो नव वर्षाणि तत्सूनुर्म्मङ्गियुवराजः पंचविंशतिं तत्पुत्रो जयसिंहस्त्रयोदश तदवरजः कोक्किलिः षण्मासान् तस्य भ्राता विष्णुवर्द्धनस्तमुच्चाटय सप्तत्रिंशतं वर्षाणि तत्पुत्रो विजयादित्योष्टादश तत्तनयो विष्णुवर्द्धनः षट्त्रिंशतं तत्सुतो नरेंद्रमृगराजोष्टाचत्वारिंशतं तत्सुतः कलिविष्णुवर्द्धनोध्यर्धवर्षं तत्सुतो गुणगविजयादित्यश्चत्वारिंशतं वर्षाणि तद्भ्रातुर्व्विक्रमादित्यस्य तनयचालुक्यभीमस्त्रिंशतं तत्सुतः कोल्लभिगण्डविजयादित्यष्णमासान् तत्सुतोम्मराजस्सप्त वर्षाणि तत्तनयं बालमुच्चाटय ताडपो मासमेकं तंजित्वा विक्रमादित्य एकादश मासान् तत्ताडपराजसुतो युद्धमल्लस्सप्त तमुच्चाटय देशादम्मराजानुजो राजभीमो द्वादश तत्सूनुरम्मराजः पंचविंशतिं तस्य द्वैमातुरो दाननृपस्त्रीणि। ततस्सप्तविंशतिवर्षाणि दैवदुरीहया वेंगीमहिरनायिकाभवत्। ततो दानाण्णर्वसुतः शक्तिवर्म्मनृपो द्वादश वर्षाणि भुवमपालयत्।

ततस्तदनुजस्सप्त वत्सरान् भूतवत्सलः।
विमलादित्यभूपालः पालयामास मेदिनीम्॥ ३॥
तत्तनयो नयशाली जयलक्ष्मीधाम राजराजनरेंद्रः।
चत्वारिंशतमब्दानेक च पुनर्म्महीमपालयदखिलाम्॥ ४॥
यो रूपेण मनोभवं विशदया कांत्या कलानान्निधिं
भोगेनापि पुरंदरं विपुलया लक्ष्म्या च लक्ष्मीधरम्।
भीमं भीममभुजाबलेन विहसन् भाति स्म भास्वद्यशाः

श्रीमत्सौमकुलैकभूषणमणिर्द्दीनैकचिंतानणिः ॥ ५ ॥

राजासावनुरूपरूपविभवामम्मंगनाम्ना भुवि

प्रख्यातामुपयच्छति स्म विधिवद्देवीं जगत्पावनीम् ।

या जह्नोरिव जाह्नवी हिमवतो गौरीव लक्ष्मीरिव

क्षीरोदाद्दिवसेशवंशतिलकाद्राजेंद्रचोडादभूत् ॥ ६ ॥

पुत्रस्तयोरभवदप्रतिघातशक्ति

निश्शेषितारिनिवहो महनीयकीर्त्तिः ।

गंगाधराद्रिसुतयोरिव कार्त्तिकेयो

राजेंद्रचोड इति राजकुलप्रदीपः ॥ ७ ॥

भासामुन्नतिहेतुं प्रथमं वेंगीश्वरत्वमध्यास्य ।

यस्तेजसा दिगंतानाक्रमितसहस्रभानुरुदयमिव ॥ ८ ॥

उद्यच्चण्डतरप्रतापदहनस्पृष्टाखिलद्वेषिणा

सर्व्वान् केरलपाण्ड्यकुंतलमुखान्निर्जित्य देशान् बलात् ।

आज्ञां मौलिषु भूभृतां भयरुजा चित्तेषु दुर्म्मेधसां

प्रीतिस्सत्सु दिशासु कीर्त्तिरतुला येनार्पितोज्जृम्भते ॥ ९ ॥

भोगीशाभीलभोगप्रतिमनिजभुजाभर्त्सितात्यंतबिभ्य

न्नानाभूपाललोकप्रहितबहुविधानर्घरत्नाभिरामम् ।

धत्ते मौलिं परार्धो महति नृपकुले यः कुलोत्तुंगदेवो

देवेन्द्रत्वादनूने सुरपतिमहिमा चोडराज्येभिषिक्तः ॥ १० ॥

हस्तभ्राजितशङ्खचक्रजलजं यं राजनारायणं

लोक स्तौति स सूर्य्यवंशतिलकाद्राजेंद्रदेवार्णवात् ।

संभूतान्मधुरान्तकीति विदितानाम्नापरेण स्वयं

लक्ष्मीमुद्वहति स्म लोकमहितां देवीं जगत्पावनीम् ॥ ११ ॥

गांगौघा इव निर्म्मलाः कृततमोध्वंसा दिनेशा इव

क्षोणीध्रा इव भूभरश्रमसहाजातास्तयोस्सूनवः ।

तन्मध्ये नयविक्रमैकनिलयं श्रीराजराजं प्रति

प्रीत्या वाचमिमामवोचत पिता सर्वोर्वराधीश्वरः ॥ १२ ॥

वत्स वेंगीमहीराज्यं मया दिग्विजयैषिणा ।

मत्पितृव्ये पुरा न्यस्तं विजयादित्यभूभुजि ॥ १३ ॥

स च पंचदशाब्दानि पंचाननपराक्रमः ।

महीं रक्षन्महीनाथो दिवं देवोपमो गतः ॥ १४ ॥

कुलक्रमागतां धीर धुरं वेंगीभुवो वह ।

बाला अपि स्वकार्य्येषु क्षमास्तेजस्विनः खलु ॥ १५ ॥

इत्युक्त्वा तां धुरं दत्तां गुरुणा चक्रवर्त्तिना ।

असह्यतद्वियोगोपि विनयाद्वहति स्म सः ॥ १६ ॥

श्रीपादसेवासुखतो गुरूणां न जातु राज्यं सुखमित्यवेक्ष्य ।

संरक्ष्य वेंगीभुवमेकमब्दं भूयस्स पित्रोरगमत्समीपम् ॥ १७ ॥

तदनुजमथ धीरं विरचोडं कुमारं

गुणमिव तनुबद्धं विक्रमं चक्रवर्त्ती ।

उदयमिव रविस्त्वं प्राप्य वेंगिश्वरत्वं

वितनु शिरसि पादं भूभृतामित्यवोचत् ॥ १८ ॥

इत्याशिषं समुपगम्य नृपादवंध्या

म्मातुस्तदग्रजनृपद्वितयात्क्रमेण ।

आनम्य तामवरजैः प्रणतः कुमार

स्सृष्टः स्वदेशगमनाय स तैः कथंचित् ॥ १९ ॥

शत्रुध्वान्तमपास्य राजनिकरानाच्छाद्य धाम्ना परा

न्दुर्वृत्तान्विनिवर्त्य भूकमलिनीं कृत्वा तथा नन्दिनीम् ।

आरूढो जननाथनामनगरीहर्म्योदयाद्रिं विभु

र्व्वेंगीभूतलभूषणं नृपसुतो बालार्क्कबिंबद्युतिः ॥ २० ॥

शाकाब्दे शशिखांबरेन्दुगणिते सिंहाधिरूढे रवौ

चन्द्रे वृद्धिमति त्रयोदशतिथौ वारे गुरोर्व्वृश्चिके ।

लग्नेथ श्रवणे समस्तजगतीराज्याभिषिक्तो मुदे

लोकस्योद्वहति स्म पट्टमनघः श्रीवीरचोडो नृपः ॥ २१ ॥

यो दीनकोटिमभिवांच्छितवस्तुदानै

र्भीतानुपाश्रितभयापनुदा भुजेन ।

रक्षन्समस्तभुवनाश्रयनाम सात्थं

धत्ते प्रजाश्च निजधर्म्मपरिग्रहेण ॥ २२ ॥

भूलोकादुदिता महोन्नतिमती दिङ्मण्डलव्यापिनी

संक्रान्ताखिलसत्पथा परिगता लोकानथोद्ध्र्वानपि ।

सन्मार्गाच्चलितां भुवीह पतितां पश्चादधोगामिनीं

गंगां कीर्त्तिरमंगलप्रमथिनी यस्यातिशेतेतराम् ॥ २३ ॥

त्यक्त्वा भूभारखेदं फणिपतिरचलं पाति पाताललोकं

सर्वा निर्व्याकुलासीत् परकुपितपरित्यागिनी मेदिनी च ।

लक्ष्मीभाजां द्विजानामपि मखनिवहैर्न्नंदितं देववृंदै

रित्थं त्रैलोक्यमेतद् ध्रुवमतिमुदितं यत्र भूभारभाजि ॥ २४ ॥

अक्षतं यो महीं रक्षन्गुरुणा चक्रवर्त्तिना ।

आहूतो यव्वनोद्दामदेहलक्ष्मीदिदृक्षया ॥ २५ ॥

कांतिन्नवामनुदिनन्नयनाभिरामां

पुष्णंतमिंदुमिव यं तरुणं नृपेंद्रः ।

पश्यन्नतृप्तनयनोप्यथ पंचमाब्दे

प्रास्थापयत्पुनरुदीच्यजयाय सूनुम् ॥ २६ ॥

स सर्व्वलोकाश्रयः श्रीविष्णुवर्द्धनमहाराजाधिराजो राजपरमेश्वरः परम-भट्टारकः परमब्रह्मण्यः श्रीवीरचोडदेवः प्रोलुनाण्डुविषयनिवासिनो राष्ट्रप्र-मुखान् कुटुंबिनस्सर्व्वान् समाहूय मंत्रिपुरोहितसेनापतियुवराजदौवा-रिकसमक्षमित्थमाज्ञापयति । यथा ।

वेदानां परिरक्षणे कृतमतिर्द्देवादिदेवस्तप

स्तप्त्वा संजनयांबभूव भगवान् नारायणो ब्राह्मणान् ।

यैराश्चर्य्यमहानुभावभवनैरग्नौ यथाचोदितं

सायं प्रातरिहार्प्पितेन हविषा जीवंति देवादिवि ॥ २७ ॥

दुष्टो जात्या प्रकृत्या कलुषितहृदयः क्रूरकर्म्मापि येषा

मेकं विप्रं प्रसाद्य प्रशमितदुरितः स्वर्ग्गमाप्तस्त्रिशंकुः ।

राज्ञां वंशे विराजन् बहुसुकृतबलाद्देवराज्येभिषिक्तो

येषामेकस्य कोपात् प्रभुरपि नहुषः पातितो नाकलोकात् ॥ २८ ॥

आज्ञाविधेयानि भवंति यस्य जगंति सर्व्वाणि स चन्द्रमौलिः ।

विधाय येषां विधिवत् सपर्य्यां त्रिलोकनाथस्त्रिपुरं विजिग्ये ॥ २९ ॥

येषां प्रभावेण सहस्त्रधामा रक्षांसि संध्याद्वितये विधूय ।

विभाति निर्व्विघ्नवियत्प्रचारो जगंति रक्षञ्जगदेकचक्षुः ॥ ३० ॥

वंशेषु तेषामृषिपुंगवानां विख्यातभूदेवकुलोत्तमेषु ।

प्रशस्तवाक्याश्शुभलक्षणांगा ये भांति वेदा इव मूर्त्तिमंतः ॥ ३१ ॥

ये वाङ्मयांभोनिधिसारतत्वज्ञानोज्वलत्कौस्तुभरत्नभासा ।

कृतप्रकाशं हृदयं दधानाः विभांति विष्णोरिव मूर्त्तिभेदाः ॥ ३२ ॥

ते नामतो गोत्रतश्च निरूप्यंते। तत्र तावदभिराममूर्त्तिराचारनिधिरस्मत्पुरोहितो भागद्वयवान्। चीडभट्टः। श्रीकृष्णभट्टः। श्रीधरभट्टः। आच्चभडारभट्टः। श्रीकृष्णभट्टः। सर्व्वदेवभट्टसोमयाजी। केशवभट्टः तिरुवरंग्गमुडयान्भट्टः। यज्ञात्मभट्टः। नारसिंहभट्टः। तिरुवरंग्गमुडयान्भट्टः तिरुमलयुडयान्भट्टः सज्जनभट्टः श्रीधरभट्टः। माधवभट्टः श्रीरामभट्टः। कडलुसिरिकालभट्टः केशवभट्टः नारसिंहभट्टः। केशवभट्टः। वेन्नकूतभट्टः। वामनभट्टः। सर्व्वदेवभट्टः। श्रीरंगशायिभट्टः। गोविंदभट्टः। वेन्नयषडंगवित्। नंदिकुमारभट्टः। तिरुमलयुड्यान्भट्टः श्रीवासुदेवभट्टः सोमदेवभट्टः दामोदरभट्टः। जान्नियत्रिवेदी। नित्यानंदत्रिवेदी। नारायणषडंगवित्। कामियषडंगवित्। अरुलालदशपुरिभट्टः। गंगाधरभट्टः अरुलालभट्टः श्रीकृष्णभट्टः। माधवभट्टः। तिरुमलयुडयान्भट्टः वामनभट्टः माधवभट्टः। नारायणषडंगवित्। श्रीरंगनाथभट्टः। तिल्लनायकभट्टः। विष्णुभट्टः। तिरुवरंगसहस्त्रः। विष्णुभट्टः। नारायणभट्टः। पार्थसारथिः। नारायणभट्टः। वेन्नकूत-

भट्टः। कुमारस्वामिभट्टः। नागदत्तभट्टः कुप्पयभट्टः। नगदोनयभट्टः। अम्बलत्ताडिभट्टः। चेंदामरकण्णभट्टः श्रीकृष्णभट्टः। तिरुवेंगडसहस्त्रः। नारायणभट्टः। त्रिविक्रमभट्टः। गोविंदभट्टः। पोतियभट्टः। जातवेदिभट्टः। श्रीकृष्णभट्टः श्रीरामसहस्त्रः सिंहपिरान्सहस्त्रः कुमारस्वामिभट्टः। गुंडदेवभट्टः। दोनयभट्टः। श्रीनारसिंहभट्टः। वामनभट्टः। वेन्नकूतसहस्त्रः। नारायणसहस्त्रः। पोन्नयसहस्त्रः। श्रीरामभट्टः। केशवभट्टः। कामयसहस्त्रः दोनयभट्टः श्रीरामभट्टः। दक्षिणामूर्त्तिभट्टः। लक्ष्मीधरभट्टः। नारायणभट्टः सोमदेवभट्टः। नारायणभट्टः। केशवभट्टः। नारायणभट्टः। तिरुवरंगनारायणसहस्त्रः। दामोदरभट्टः। मावयभट्टः। वामयभट्टः। तिरुमलयुडयान्भट्टः। गंगाधरभट्टः। श्रिगरुडभट्टः। माधवभट्टः। तिरुमलयुडयान्भट्टः आलसहस्त्रः। विष्णुभट्टः। नागदेवसहस्त्रः। पोन्नयसहस्त्रः श्रीधरभट्टः। तणियपेरुमान्सहस्त्रः श्रीकैलासमुडयान्सहस्त्रः आलवंदान्भट्टः। पिट्टयभट्टः। घृताशिभट्टः। आरामुदुभट्टः श्रीकृष्णभट्टः। गंगाधरभट्टः। गोविंदसहस्त्रः नारायणभट्टः। श्रीधरभट्टः। नारायणभट्टः नारायणभट्टः इत्येकान्नविंशत्युत्तरशतसंख्या भारद्वाजगोत्रजाः। गोविंदभट्टः कुमारस्वामिभट्टः। यज्ञात्मभट्टसोमयाजी। ताडिकुमारभट्टः। विष्णुभट्टः दोनयभट्टः। करियकोसहस्त्रः नारायणभट्टः देनयभट्टः। इति संकृतिगोत्रजा नव। श्रीकृष्णभट्टः दोड्डियभट्टः। तिरुवरंगमुडयान्भट्टः। दोनयभट्टः त्रिविक्रमभट्टः। वेन्नकूतभट्टः। गंगाधरभट्टः दामयषडंगवित्। गोविंदभट्टः उलहमुण्डान्भट्टः। श्रीरंगनाथभट्टः। कुमारस्वामि भट्टः

नारायणभट्टः। माधवभट्टः। तिरुमलुडया-न्भट्टः। विष्णुभट्टः।
मावनभट्टः चीडियषडंगवित्। दोनयभट्टः नारायणभट्टः।
कोलवामनभट्टः। अत्ताडिभट्टः। अत्तामभट्टः। दामोदरभट्टः।
सीरलंगोभट्टः। अडहियमणवालुभट्टः। आदित्यभट्टः। दोनियसहस्रः।
कुमारपेरुमान्भट्टः। तिरुप्पनंगाडभट्टः। शिवदेवभट्टः। भीमनाथभट्टः।
गोविंदभट्टः। यज्ञदोणभट्टः। उत्तरीश्वरषडंगवित्। अत्ताडिभट्टः।
शंकरनारायणभट्टः। विष्णुसहस्रः श्रीरामभट्टः। वासुदेवभट्टः
चेल्वसहस्रः। मधुसूदनभट्टः नारायणभट्टः। श्रीरामभट्टः माधरवभट्टः
इति पंचोत्तरचत्वारिंशत् कश्यपगोत्रजाः। शंभुभट्टः। कुमारस्वामिभट्टः।
विष्णुभट्टः। माधवभट्टः। देवकुमारभट्टः विद्दयषडंगवित्।
मलहिनियनिण्ड्रान्भट्टः। श्रीकृष्णभट्टः। अरुलारभट्टः यज्ञमूर्त्तिभट्टः।
दीनियत्रिवेदिभट्टः। रेमनषडंगवित्। श्रीधरषडंगवित्। माधवभट्टः।
कामयत्रिवेदी। कुमारस्वामिभट्टः। श्रीकुमारभट्टः शंकरषडंगवित्।
अय्यपिरान्सहस्रः। नामयभट्टः। वेन्नकूतभट्टः। ईश्वरभट्टः।
दोनयषडंगवित्। शंकरनारायणभट्टः। तिरुमलुडयान्भट्टः। हृषीकेश-
भट्टः। श्रीधरभट्टः। आकोण्डविल्लभट्टः। केशवभट्टः अरुलारसहस्रः।
तिरुनीलकण्ठभट्टः। तिरुवाक्कुलमुडयान्सहस्रः। यज्ञदोणभट्टः। सिंग्ग-
पिरान्भट्टः। तिण्डयसहस्रः। कोलवामनसहस्रः। सुंदरतोलुडया-
न्सहस्रः। नारायणभट्टः। वेण्णकूतसहस्रः। चंद्रशेखरभट्टः नंबियाण्डा-
न्भट्टः कामयभट्टः श्रीधरसहस्रः। विद्दयभट्टः। मावियषडंगवित्।
दामोदरसहस्रः। सीरलंगोभट्टः। चेल्वयभट्टः। कंदयसहस्रः।

रुद्रसहस्त्रः। चिरियाण्डान्भट्टसोमयाजी। पेरियाण्डान्भट्टसोमयाजी श्रीरामभट्टः। पेरियनंबिभट्टः। इति हरितगोत्रजाः पंचोत्तरपञ्चाशत्। नारायणभट्टः। गंगाधरभट्टः। नारायणभट्टः। श्रीरामदशपुरिभट्टः। सीरलंगोभट्टः। सर्व्वदेवभट्टः। श्रीवासुदेवभट्टः। मेडयभट्टः। पोतियषडंगवित्। मनत्तुक्किनियान्भट्टः। भास्करभट्टः। एरसेवकभट्टः। मेडयषडंगवित्। नीलकण्ठभट्टः। तिरिमलयुडयान्भट्टः माधवभट्टः उलहमुण्डान्भट्टः। जन्नयसहस्त्रः श्रीहनुमसहस्त्रः अप्पयभट्टः वेन्नयभट्टः तेवडिसहस्त्रः। शंकरसहस्त्रः तिरुमलुडयान्भट्टः। पेरियाण्डान्भट्टः श्रीधरभट्टः श्रीरामभट्टः। शिवदेभट्टः। आदित्यषडंगवित् दामोदरभट्टः। वासुदेवभट्टः। जातवेदिंभट्टः माधवषडंगवित्। अत्तियषडंगवित्। नंदिकुमारभट्टः। केशवभट्टः वीट्टिरिंदान्भट्टः। आयिरंजोतिसहस्त्रः। भट्टदेवभट्टः। वामनभट्टः। दामोदरभट्टः। पेरियाण्डान्भट्टः। कुमार-स्वामिभट्टः। दामयसहस्त्रः। अडिहनंबिचतुर्व्वेदिभट्टः श्रीवेदव्यासभट्टः। इति कौशिकगोत्रजाः। अष्टोत्तरचत्वारिंशत्। श्रीगरुडदशपुरीयभट्टः। वेण्णकूतभट्टः। इति द्वौ गर्ग्गगोत्रजौ। रेमयभट्टः। अरुलारदशपुरीय-भट्टः॥ चंद्रशेखरभट्टः। भीमनाथभट्टः। आरामदुभट्टः। श्रीकृष्णदश-पुरीयभट्टः। तिरुवरंगमुडयान्भट्टः। आदित्यभट्टः इत्यष्टौ वाधूल-गोत्रजाः। श्रीकृष्णभट्टः। श्रीकृष्णभट्टः। इति द्वौ कपिगोत्रजौ॥ यज्ञमूर्त्तिभट्टः। दारयषडंगवित्। दोनयत्रिवेदी॥ भीमयभट्टः। इति चत्वाराः कुत्सगोत्रजाः। श्रीकृष्णभट्टः नारायणभट्टः। यज्ञकेशवभट्टः। केशवभट्टः। श्रीकुमारभट्टः। सूर्य्यदेवभट्टः। श्रीकृष्णभट्टः। वासुदेव-

भट्टः। इत्यष्टौ बादरायणगोत्रजाः। तिरुवरंगदेवभट्टः। सर्व्वदेवभट्टः। श्रीरामभट्टः। सर्व्वदेवभट्टः। वेण्णकूतभट्टः। श्रीधरभट्टः। श्रीकृष्ण-सहस्रः। कामियषडंगवित्। वीट्टिरिंदान्भट्टः कोवाण्डान्भट्टः। मनत्तिकि-नियान्सहस्रः इत्येकादश लोहितगोत्रजाः। श्रीकृष्णभट्टः। श्रीकृष्णभट्टः नारायणभट्टः। इति त्रयः कामकायनगोत्रजाः। श्रीरामभट्टः। श्रीकृष्ण-भट्टः। परमेश्वरग्भट्टः। यज्ञस्कंदभट्टः। देवदेवेशभट्टः। मधुसूदनभट्टः माधवभट्टः श्रीरामभट्टः। श्रीवासुदेवभट्टः। विष्णुभट्टः। रुद्रभट्टः। दोनयभट्टः। दक्षिणामूर्त्तिभट्टः। यज्ञात्मभट्टः। कुमारस्वामिभट्टः। श्रीरामभट्टः। शीरलंगोभट्टः। शंकरनारायणभट्टः। यज्ञमूर्त्तिभट्ट-सोमयाजी। दामोदरभट्टः। श्रीवासुदेवभट्टः नारायणभट्टः। भीमसेनभट्टः दोनयभट्टः। सुब्रह्मण्यभट्टः। अरुलारभट्टः। तिरिमलयुडयान्भट्टः। वासुदेवभट्टः। दामोदरभट्टः। श्रीकृष्णभट्टः। सुर्य्यदेवभट्टः। वासुदेव-भट्टः। माधवभट्टः सिंगपिरान्सहस्रः वेन्नकूतसहस्रः। अरुलारसहस्रः। पद्मनाभभट्टः दक्षिणामूर्तिभट्टः श्रीरामदेवभट्टः। सिंगपिरान्भट्टः। श्रीकृष्णसहस्रः। ईश्वरभट्टः। माधवसहस्रः। अरसब्रह्मा। जनार्द्दनभट्टः माधवभट्टः। दारयभट्टः। अरुलारसहस्रः तिरुवरंगमुडयान्सहस्रः। तिरिवायिक्कुलमुडयान्सहस्रः। नारायणभट्टः पुरुषोत्तमभट्टः पोन्नयसहस्रः नारायणभट्टः नित्यानंदभट्टः। सोमदेवभट्टः। पार्थसारथिभट्टसोमयाजी। विद्वयभट्टः। सीरलंगोभट्टः। निरवद्यभट्टः वाजपेययाजी भागद्वयवान् इति षष्टिः कुंडिनगोत्रजाः। दत्तत्रिवेदिभट्टः। केशवभट्टः तिरुवेंगडभट्टः रमण्डयभट्टः। ईश्वरभट्टः वेमनभट्टः। अत्तियारालिभट्टः वेन्नयभट्टः।

वेन्नकूतभट्टः। षष्टिरुद्रभट्टः। केशवभट्टः। मणिनागभट्टः श्रीकृष्णभट्टः। विष्णुदीनयभट्टः। कुमारस्वामिसहस्रः दक्षिणामूर्त्तिभट्टः दामोदरभट्टः कामकोटिसहस्रः। तेरुपोलियनिण्ड्रान्सहस्रः श्रीवासुदेवसहस्रः श्रीरामभट्टः माधवभट्टः। शंकरनारायणसहस्रः सिंगपिरान्सहस्रः। रच्चेनषडंगवित्। आरामदुभट्टः। दोनयसहस्रः दक्षिणामूर्त्तिभट्टः। सोमयभट्टः इत्यात्रेयगोत्रजास्त्रिंशत्॥ पेरुंबुरक्कडल्भट्टसोमयाजी। आरामदुभट्टः। केशवभट्टः गोविंदभट्टः इति चत्वारो रथितरगोत्रजाः। श्रीधरभट्टः। शंकरनारायणभट्टः। लाल्कोण्डवेल्लिभट्टः। नारायणभट्ट-सोमयाजी। तिरुकुरुगुडिभट्टः। तिरुवरंग्गनारायणभट्टः। तिरिवायिक्कु-लमुडयान्भट्टः। माधवभट्टः। पल्लिगोण्डान्भट्टः। यज्ञमूर्त्तिभट्टः। नारायणभट्टसोमयाजी। चंद्रशेखरभट्टः श्रीरामभट्टः तिरिवाक्कुल-मुडयान्भट्टः। गंगाधरभट्टः। श्रीरंग्गनाथभट्टः। रुद्रकुमारभट्टः। श्रीरामभट्टः पोतयषडंगवित्। वेन्नकूतभट्टः नारायणभट्टः वेमयषडंगवित्। अप्पयषडंगवित्। माधवभट्टः। श्रीरामभट्टः श्रीरामभट्टः सुब्रह्मण्यभट्टः। श्रीरामभट्टः। केशवभट्टः पुरुषोत्तमभट्टः नारायणसहस्रः दक्षिणामूर्त्ति-भट्टः। वेन्नकूतभट्टः। सोमनाथभट्टः तिरिवायिक्कुलमुडयान्भट्टः। सिंगपिरान्भट्टः ईश्वरसहस्रः नारायणसहस्रः श्रीभरतसहस्रः। श्रीकृष्णभट्टः। दक्षिणामूर्त्तिभट्टः केशवसहस्रः तिरुवरंगमुडयान्भट्टः। तिरुप्पनंगाड्डुसहस्रः सीरलंगोसहस्रः दक्षिणामूर्त्तिभट्टः गोविंदभट्टः केशवभट्टः त्रिविक्रमभट्टः एरियपोतषडंगवित्। श्रीधरभट्टः शंकरनारा-यणभट्टः आदित्यदेवभट्टः नारायणभट्टः श्रीधरभट्टः। दोनयभट्टः भीमय-

भट्टः। केशवभट्टः पद्मनाभभट्टः गंगाधरभट्टः इत्येकोत्तरषष्टिर्व्वत्स-
गोत्रजाः। मण्डयभट्टः त्रिविक्रमभट्टः। रुद्रकुमारभट्टः। सिंगपिरा-
न्भट्टः। आलिदेवयभट्टः। पद्मनाभभट्टः नारायणभट्टः तिरुवरंगमुडया-
न्भट्टः श्रीधरभट्टः मणिनागभट्टः विष्णुभट्टः श्रीरामभट्टः नारायणभट्टः
तिरिप्पोरिभट्टः तिरिमलुडयान्सहस्त्रः वामनभट्टः कोण्डयसहस्त्रः
आदित्यदेवसहस्त्रः इत्यष्टादश गौतमगोत्रजाः। अडशियमणवालभट्टः
तिरुपनंगाडभट्टः माधवभट्टः दोनयसहस्त्रः वामनभट्टः केशवसहस्त्रः
गोविंदसहस्त्रः कुमारस्वामिभट्टः अरुलारभट्टः इति वसिष्ठगोत्रजाः नव।
कुमारस्वामिभट्टः। श्रीधरभट्टः श्रीभरतभट्टः दामोदरभट्टः कुमारस्वामि-
भट्टः आण्डमणिभट्टः दामोदरभट्टः भागद्वयवान् करिमाक्यभट्टः
इत्यष्टनितुंदिगोत्रजाः। दोनयषडंगवित्। कोण्डयषडंगवित् जन्नयभट्टः।
जन्नयषडंगवित्। दोनयभट्टः जनार्द्दनषडंगवित्। इति शालावत-
गोत्रजाष्षट्। यज्ञात्मभट्टसोमयाजी श्रीकृष्णभट्टः गोविंदभट्टः
श्रीभरतभट्टः। इति चत्वारो विश्वामित्रगोत्रजाः। सूर्य्यदेवसहस्त्रः।
अप्पयभट्टः। केशवभट्टः कुलोत्तुंगचोडब्रह्ममहाराजः। सेनापती
राजराजब्रह्ममहाराजो भागचतुष्टयवान् कुमारनारायणब्रह्ममहाराजो
भागद्वयवान्। दिवाकरभट्टः। नडविरुक्कुं कालकालभट्टः। केशवभट्टः।
इति मुद्गलगोत्रजाः नव। नारायणसहस्त्रः प्र॥ इति द्वौ वालखिल्य-
गोत्रजौ। दामोदरभट्टसोमयाजी। दुग्गयभट्टः॥ तिरुनाण्डुडयान्भट्टः।
आण्डमणिभट्ट इति चत्वारश्शटगोत्रजाः। वासुदेवभट्टः। वेण्णकूत-
सहस्त्रः नारायणभट्टः। इति शाण्डिल्यगोत्रजास्त्रयः। निंबदेवभट्टः।

इत्येको विष्णुवृद्धः। नारायणभट्टः। गोविंदभट्टः श्रीकृष्णभट्टः इति त्रयः पाराशर्य्यगोत्रजाः। इति षट्त्रिंशदुत्तरपंचशतसंख्येभ्यः। षट्कर्म्मनिरतेभ्यः न्यूनाधिकभावेन चतुश्चत्वारिंशदधिकपंचशतसंख्यान् भागान् परिकल्प्य भवद्विषये द्वादशपूण्डिसहितमालवेल्लिनामग्रामः पोन्नतोर्रनामग्रामश्च उत्तरवरुसविषये आलमिनामग्रामश्चेति ग्रामत्रयमेकीकृत्य श्रीवीरचोडचतुर्व्वेदिमंगलनाम्ना सुप्रतिष्ठाग्रहारीकृत्य प्रतिसंवत्सरमत्र प्रतिभागं सार्द्धं निष्कं करं परिकल्प्य यदतोन्यत्सिद्धायावेण्डायाभिनवादिकं यच्च क्रीडरशुल्कनामकं यच्च वणिग्भ्यः पूर्णोपजीविभ्यश्च राजग्राह्यं तत्सर्व्वं परिहृत्य सर्व्वकरपरिहारेण धारापूर्व्वकमस्माभिराचंद्रार्कमुत्तरायणनिमित्ते दत्तमिति विदितमस्तु वः॥ अस्य ग्रामसीमानः।

[Here follow boundaries of the granted village described in Telugu language, in lines 187-271]

अत्र व्याकरणं व्याचक्षाणस्य वृत्यर्थं भाग एकः मीमांसाव्याख्यात्रे द्वौ। वेदांतं व्याख्यातुरेकः ऋग्वेदमध्यापयितुरेकः यजुर्व्वेदमध्यापयितुरेकः सामानि गापयितुरेकः रूपावतारं व्याचक्षाणस्यैकः पुराणं वाचयितुरेकः वैद्यस्यैकः अंबष्ठस्यैकः विषवादिन एकः ज्योतिर्व्विद एकः। इति गुणवृत्तिभागाद्द्वादश। ग्राममध्यमधिवसते विष्णुभट्टरकाय भागौ द्वौ। पश्चिमं दिग्भागमधिवसते च द्वौ श्रीकैलासदेवाय द्वौ इतरेभ्यः वास्तुदेवताभ्यः एक इति सप्त देवभागाः। अस्योपरि न केनचित् बाधा कर्त्तव्या यः करोति स पंचभिर्महापातकैर्य्युक्तो भवति तथा चोक्तं भगवता व्यासेन।

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम्।

षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः ॥ ३३ ॥

गामेकां स्वर्णमेकं वा भूमेरप्येकमंगुलम् ।

हरन्नरकमाप्नोति यावदाभूतसंप्लवम् ॥ ३४ ॥

बहुभिर्व्वसुधा दत्ता बहुभिश्चानुपालिता ।

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ ३५ ॥

श्रीविजयराज्यसंवत्सरे त्र्युत्तरविंशतिसंवत्सरे दत्तस्यास्य शासन-स्याज्ञप्तिः पंच प्रधानाः काव्यकर्त्ता विद्दयभट्टः लेखकः पेन्नाचार्य्यः ॥

Summary

This inscription, engraved on a set of 9 copper – plates, consists 280 lines of well-preserved writing. It is composed in verse and prose. The description of the boundaries is in a mixture of Telugu and Sanskrit prose. It records the gift of a village made by the king Vīra-Chōḍa in favour of several Brāhmaṇas.

Like the Chellūr plates of Vīra-Chōḍa (No.41 above) and other inscriptions of the later Eastern Chālukyas, the present inscription opens with a mythical genealogy of the Chālukya family (ll. 1-18) and a historical account of the Eastern Chālukya kings (l.19 ff.). This part of the inscription contains nothing new to us, but agrees in every detail with the account given in the Chellūr plates just referred. The reign of Vīra-Chōḍa is described in vv.18-26. Of these verses, 18-21 correspond to vv.18-21 of the Chellūr plates. Verse 20 gives the correct reading of the town where Vīra-Chōḍa was crowned, *viz.* Jananāthanagarī, which is said to be perhaps a poetical form of Rājamahēndrapura, the modern Rājamahēndri. In v.21 the Śaka date of Vīra-Chōḍa's

accession is expressed by the numerical words *śaśi-khāmbarēndu*, meaning 1001. The same is expressed by the words *śaśi-khadvay-ēndu* in the Chellūr plates. Verse 22 states that Vīra-Chōḍadēva bore the title *Samasta-bhuvanāśraya*. Verses 25 and 26 state that his father, the emperor, *viz.* Kulōttuṅga-Chōḷa I., recalled him, but sent him back for the conquest of the north, in the fifth year, apparently of Vīra-Chōḍa's reign.

The object of the inscription is to record that Vīra-Chōḍa granted, at a summer-solstice (*uttarāyaṇa*), the village of Vīrachōḍachaturvēdimaṅgala, which was formed by uniting three different villages, *viz.* Mālavelli with its 12 hamlets (*pūṇḍi*) and Ponnatoṟṟa, both in the district of Prōlunāṇḍu, ana Ālami in the district of Uttaravarusa (ll. 68-71 and 182-186). Lines 80-180 contain a list of the donees. The description of the boundaries of the granted village is given in ll.186-271. Lines 271-274 assign 12 shares in Vīrachōḍa-chaturvēdimaṅgala for the maintenance of certain village officers. Seven further shares were assigned to the presiding deities in the centre, in the west, and in the other quarters of Vīrachōḍachaturvēdimaṅgala (ll.274-276). The date of the grant was the 23rd year[1] of the king's reign (l.279 f.), *i.e.*, 2 years after the Chellūr plates. The inscription ends with the statement that the executors (*ājñapti*) of this edict were the five ministers (*pañcha-pradhānāḥ*), and that the composer was Viddayabhaṭṭa and the engraver Pennāchārya. The very same persons are mentioned at the end of the Chellūr plates.

The donees of the grant were no less than 536 Brāhmaṇas, who are grouped according to their *gōtras*.

The titles which are added to their names are:-*sahasra, shaḍaṅga-vid, bhaṭṭa, Daśapuribhaṭṭa*, or *Daśa-purīyabhaṭṭa, trivēdin* or *trivedibhaṭṭa*, and *sōmayājin* or *bhaṭṭasōmayājin*. Arasabrahmā and Pārthasārathi are the only two names that occur without any titles. The majority of the names are of Tamiḻ origin. Such an abundance of Tamiḻ names in the list of donees of Vīrachōḍa-chaturvēdimaṅgala leads one to infer that a large immigration or importation of Tamiḷ Brāhmaṇas to the north must have taken place during the reign of Kulōttuṅga-Chōla I. The large proportion of Vaishṇava names among the donees further suggests that about this time the Rāmānuja faith counted many devotees, who adopted as their names the Tamiḷ equivalents of Sanskrit names, which occur in the sacred works of Vaishṇavas. Three of the donees bear the title *Brahmamahārāja*, which must have been an invention of the Chōḷa king Rājarāja I in whose inscription it is first found.

The boundaries of Vīrachōḍachaturvēdimaṅgala were: in the south, Ponnavāḍa[2] and Mallavrōlu; in the west, Kolliprōlu[3] and Chembrōlu;[3] in the north, Polakumbaṟṟa, Ḍaṅkalapūṇḍi and Beṇḍapūṇḍi;[4] and in the east, the sea (ll. 186-188). With line 188 begins a second, much more detailed description of the boundary-line of the granted village. This passage enumerates various canals, tanks, ponds, hamlets, hills, boulders, pieces of waste-land and high ground, foot-paths, ant-hills, valleys, *etc*. It also includes the names of a number of trees.

Detailes of the assignment of 12 shares for the village officers referred to earlier are as follows:-one share for the maintenance of one who expounds grammar;

two to the expounder of *Mīmāṁsā*; one to the expunder of *Vēdānta*; one to the teacher of *Ṛigvēda*; one to the teacher of *Yajurvēda*; one to the teacher of singing of the *Sāmans*; one to the expounder of *Rūpāvatāra*; one to him who taught reciting of the Purāṇas; one to the physician; one to the barber; one to the poison-doctor; and one to the astrologer. Likewise, the seven shares assigned to the gods were distributed as follows:- Two shares to the god Vishṇu who resided in the centre of the village; two shares also to Vishṇu who resided on the western side of the village; - two shares to Śrī-Kailāsadēva; and one share to the other local deities.

As stated in text ll. 181-182, 544 shares in the village granted were assigned to 536 Brāhmaṇs, who were engaged in performing six duties (*shaṭkarmaniratēbhyō*). Lines 184-186 inform that an annual assessment of one and a half *nishka* was fixed on each of these shares. Thus the present grant is to be considered a *kara-śāsana*. But however, the grant village was exempted from all other taxes such as *siddhāya, avēṇḍāya, etc.*

Notes

1. Subsequently this year has been referred to the accesssion of Kulōttuṅga I in A.D. 1070 (See *El.*, VI, p.335).

2. Ponnavāḍa may be identified with Ponnada which is found to the east of Piṭhāpuram on the *Madras Survey Map* of the Piṭhāpuram division (*El.*, V, p.74).

3. Kolliprōlu and Chembrōlu are found on the same map as Gollaprol and Chebrolu, on the high-road from Piṭhāpuram to Kattipudi (*ibid*).

4. Beṇḍapūṇḍi, one of the northern boundaries, is Bendapudi, on the road to Vizagapatam (*ibid.*).



INDEX

The figures shown against the words denote the pages in the Volume. Following abbreviations have been used:- *au: author; Br. Brāhmaṇa; ca: capital; ch: chief; Chā; Chālukya; co: country; de: deity; do: ditto; E.Chā: Eastern Chālukya; engr. engraver; f: family; feu. feudatory; gen. general; J: Jaina; ju. junior; k: king; l. locality; l.m. land measure; m. male, mer: merchant; mod. modern; mt: mountain; n: name; off: office, peo. people; pl: place; pri: prince, pro. probably; r. ruler; ri. river; Rash: Rashṭrakūṭa; rel: religious; s.a.: same as; sac. sacrifice; sur. surname; t.d.: territorial division; te: temple; tit: title; v. verse; vi: village; W: Western; wk: work.*

R

***

NOTES

NOTES

NOTES

NOTES




Seal of Piṭhāpuram Plates of Vira-Chōḍa

(Eastern Chālukya)

This circular seal measures 3 1/8" in diameter. It rests on an expanded lotus flower and bears, in relief on a counter-sunk surface, the legend *śrī-Tribhuvanāṁkuśa* in Telugu letters. Above the legend it bears a boar which faces the proper left and has an elephant-goad overhead. In front of the boar are a *chaurī,* a conch, and the moon; and behind it, another *chaurī,* a *svastika,* and the sun. Below the legend there is a drum (?), an expanded lotus flower, and apparently a wooden stand for supporting *abhishēka* dish.







Seal of Pithapuram Plates of Vira-Choda, Eastern Chalukya